पारस्कर (पृष्ठ 46 के अनुसार)

- Title – गृह्यसूत्र
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 93 / 186 पृष्ठ
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning – – पालाश्यः प्रादेशमात्र्यः, स्रुवः खादिरो हस्तमात्रः अंगुष्ठपर्वमात्रखातपरिणा हवर्तुल पुष्करः।
- End – – अत्र प्रकरणे अहः शब्दो रात्रिशब्दश्च अहोरात्रोपलक्षकः एकोति
- Colophon-
- Illustrations -
- Source -
- Subject - – गृह्यसूत्र (वेदाङ्ग)
- Revisor -
- Author - अग्निहोत्री हरिहर विरचित, व्याख्याकारः

1. Remarks- अपूर्ण, 1/11/12/13/14/16/37/64/65/70/71/72/73/74/79/80/81/82/83/84/116/ पेज नम्बर उपलब्ध नहीं है।

पालाश्यः प्रादेशमात्र्यः। स्रुवः खादिरो हस्तमात्रः अंगुष्ठपर्वमात्रखातपरिणाहवर्तुलपुष्करः। आज्यं गव्यं। चरुसंस्थे।
ब्रीहितंडुलाः। षट्पंचाशदधिकमुष्टिशतद्वयपरिमितं पराद्ध्यं। बहुभोक्तृपुरुषाहारपरिमितमवराद्ध्यं। तंडुलाद्यन्नपूर्ण
पात्रं दक्षिणा वरो वा यथाशक्ति हिरण्यादिद्रव्यं। पवित्रे कृत्वा॥ सूत्रं॥ प्रथमं त्रिभिः कुशतरुणैरग्रतः प्रादेशमात्रं विहा
यद्वे कुशतरुणे प्रछिद्य। प्रोक्षणीः संस्कृत्य॥ सूत्रं॥ प्रोक्षणीपात्रं प्रणीतासन्निधौ निधाय तत्र पात्रांतरेण हस्तेन वा प्रणी
तोदकमासिच्य पवित्राभ्यामुत्पूय पवित्रे प्रोक्षण्यां निधाय दक्षिणेन हस्तेन प्रोक्षणीपात्रमुत्थाप्य सव्ये कृत्वा तदु
दकं दक्षिणेनोत्थाल्य प्रणीतोदकेन प्रोक्ष्य। अर्थवत्प्रोक्ष्य॥ सूत्रं॥ अर्थवंति प्रयोजनवंति आज्यस्थाल्यादीनि पूर्ण
पात्रपर्यंतानि प्रोक्षणीभिरद्भिरासादनक्रमेणैकैकशः प्रोक्ष्य। असंचरे प्रणीताग्न्योरंतराले प्रोक्षणीपात्रं निधाय। निरु
प्याज्यं॥ सूत्रं॥ आसादितमाज्यं आज्यस्थाल्यां पश्चादग्नेर्निहितायां प्रक्षिप्य चरुश्चेच्चरुस्थाल्यां प्रणीतोदकमा
सिच्य आसादितांस्तंडुलान्प्रक्षिप्य। अधिश्रित्य॥ सूत्रं॥ तत्राज्यं ब्रह्माधिश्रयति तदुत्तरतः स्वयं चरुमेवं युगपद्द्वावा
रोप्य पर्यग्निकुर्यात्। सूत्रं॥ ज्वलदुल्मुकं प्रदक्षिणमाज्यचर्वोः समंतात्भ्रामयेत्। ईषच्छृते चरौ। स्रुवं प्रतप्य॥ सूत्रं॥ दक्षि
णेन स्रुवमादाय प्रांचमधोमुखमग्नौ तापयित्वा सव्ये पाणौ कृत्वा दक्षिणेन सम्मार्गाग्रैर्मूलतोऽग्रपर्यंतं। संमृज्य॥ सूत्रं॥ मूलैरग्रमा॥

त्वाभिमुखं स्थापयित्वा ॥ दक्षिणतो ब्रह्मासनमास्तीर्य्य ॥ सूत्रं ॥ तस्याग्नेर्दक्षिणस्यां दिशि ब्रह्मणे आसनं वारणादि
यज्ञियदारुनिर्मितं पीठमास्तीर्य्य । कुशैः स्तीर्त्वा तत्र वरणाभ्यां पूर्वं संपादितं कर्मसु तत्त्वज्ञं ब्राह्मणं । तदभावे पंचाशत्कु
शनिर्मितं । अग्नेरुत्तरतः प्राङ्मुखमासीनं स्वयमुदङ्मुखं आसीनोऽनुलेपनपुष्पमाल्यवस्त्रालंकारादिभिः संपूज्यामु
ककर्माहं करिष्ये तत्र मे त्वममुकगोत्रामुकप्रवरामुकशर्मन् ब्राह्मण ब्रह्मा भवेति वृत्वा भवामीत्युक्तवंतमुपवेश्य प्रणी
य ॥ सूत्रं ॥ अपइतिशेषः ॥ तद्यथा । अग्नेरुत्तरतः प्रागग्रकुशेषासनद्वयं कल्पयित्वा वारणं द्वादशांगुलदीर्घं चतुरंगुलवि
स्तारं चतुरंगुलखातं चमसं सव्यहस्ते कृत्वा दक्षिणहस्तोद्धृतपात्रस्थोदकेन पूरयित्वा पश्चिमासने निधायालभ्य पूर्वासने
स्थापयित्वा परिस्तीर्य ॥ सूत्रं ॥ अग्निं बर्हिर्मुष्टिमादाय ईशानादि प्रागग्रैर्बर्हिभिरुदकसंस्थमग्नेः परिस्तरणं कृत्वा
अर्थवदासाद्य ॥ सूत्रं ॥ यावद्भिः पदार्थैरर्थः प्रयोजनं तावतः पदार्थानद्वंद्वं प्राक्संस्थान् उदगग्रानग्नेरुत्तरतः प
श्चादासाद्य । तद्यथा । पवित्रच्छेदनानि त्रीणि कुशतरुणानि । पवित्रे साग्रेऽनंतर्गर्भे द्वे कुशतरुणे । प्रोक्षणीपा
त्रं वारणं द्वादशांगुलदीर्घं करतलसम्मितखातं पद्मपत्राकृति कमलमुकुलाकृति वा आज्यस्थाली तैजसी मृन्मयी
वा द्वादशांगुलविशाला प्रादेशोच्चा । तथैव चरुस्थाली सम्मार्गकुशास्त्रयः । उपयमनकुशास्त्रिप्रभृतयः । समिधस्तिस्रः

क्रमते॥ आवसथ्यस्य गृह्यस्याग्नेराधानमावसथ्याधानं तद्दारकाले विवाहकाले चतुर्थीकर्मानंतरं कुर्यात्। प्राक्
चतुर्थीकर्मणः पत्न्या भार्यात्वस्यानुपपत्तेः सभार्यस्य चाधानेधिकारः। वैवाहिकोग्निरेवौपासनाग्निरित्याश्वलाय
नादीनां पक्षः। ते हि विवाहहोममेव दाराग्न्योः संस्कारकं मन्यंते। अस्माकं तु आवसथ्याधानं दारकाल इत्यारभ्याग्निसंस्कार
स्य पारस्कराचार्येण पृथक् अभिधानात् न तत्संस्कारकृतोग्निरौपासनः। दायाद्यकाल एकेषां॥ सूत्रं॥ एकेषामाचार्या
णां मते दायाद्यकाले भ्रातृणां पितृधनविभागकाले। अविभक्ते हि पित्र्ये धने सर्वेषां भ्रातृणां स्वत्वस्य साधारणत्वे
न विनियोगानर्हत्वात्। धनविनियोगसाध्यं हि आवसथ्यादिकर्मानुष्ठानं। अतो भ्रातृमतां विभक्तानां आधानेधि
कारः इति तेषामभिप्रायः। अभ्रातृकस्य दारकाले एवं व्यवस्थितो विकल्पः। एवं कृतविवाहस्याविभक्तधनस्य च
आधाने अधिकारमभिधाय इदानीमाहरणपक्षे आधानमाह॥ वैश्यस्य बहुपशोर्गृहादग्निमाहृत्य चातुष्प्राश्य
पचनवत्सर्वं॥ सूत्रं॥ तत्रावसथ्याधाने करिष्यन्। उक्तकालातिक्रमाभावे ज्योतिःशास्त्रे अग्न्याधानार्थोपदिष्टे
मासतिथिनक्षत्रवारादिके काले प्रातः सुस्नातः सुप्रक्षालितपाणिपादः स्वाचांतः सपत्नीकः गोमयोपलिप्तेशुचौ
देशे स्वासने उपविश्य। अद्येहेत्यादि देशकालौ स्मृत्वा आवसथ्याग्निमहमाधास्ये इति संकल्पं विधाय मातृपूजापू

न्यञ्चमधस्तान्मूलपर्यंतं ॥ अभ्युक्ष्य ॥ सूत्रं ॥ प्रणीतोदकेनाभिषिच्य ॥ पुनः प्रतप्य निदध्यात् ॥ सूत्रं ॥ पुनः पूर्ववत्प्रतप्य
दक्षिणतो निदध्यात् ॥ आज्यमुद्वास्य ॥ सूत्रं ॥ आज्यमुत्थाप्य चरोः पूर्वेण नीत्वाग्नेरुत्तरतः स्थापयित्वा चरुमुत्था
प्य आज्यस्य पश्चिमतो नीत्वा आज्यस्योत्तरतः स्थापयित्वा आज्यमग्नेः पश्चादानीय चरुं चानीय आज्यस्योत्तरतो निधा
य एवं त्रिचतुरादीन्यन्यान्यपि हवींष्युद्वासयेत् अधिश्रितानां पूर्वेणोद्वासितानां पश्चिमतो हविष उद्वासानयनमिति याज्ञिक
संप्रदायात् ॥ उत्पूय ॥ सूत्रं ॥ पूर्ववत्पवित्राभ्यां ॥ अवेक्ष्य ॥ सूत्रं ॥ अवलोक्याज्यं तस्माद्पद्रव्यनिरसनं ॥ प्रोक्षणीश्च पूर्ववत् ॥ सूत्रं ॥
पवित्राभ्यामुत्पूय पूर्ववत् उपयमनान् कुशानादाय ॥ सूत्रं ॥ दक्षिणपाणिना गृहीत्वा सव्ये निधाय ॥ समिधोभ्याधाय ॥ सूत्रं ॥
यतिष्ठन्समिधः प्रक्षिप्य ॥ पर्युक्ष्य जुहुयात् ॥ सूत्रं ॥ प्रोक्षण्युदकेन सपवित्रेण दक्षिणाचुलुकेन गृहीतेन अग्निमीशानादि उ
दगपवर्गं परिषिच्य जुहुयात् आघारादीन् संस्रवधारणार्थं पात्रं प्रणीताग्न्योर्मध्ये निदध्यात् ॥ एष एव विधिर्यत्र क्वचिद्धो
मः ॥ सूत्रं ॥ एषः परिसमूहनादिपर्युक्षणपर्यंतो विधिरेव न मंत्राः ॥ क्वचित् यत्र क्वचन लौकिके स्मार्त्ते वाग्नौ होमस्तत्र
वेदितव्यः ॥ इति हरिहरकृते गृह्यभाष्ये प्रथमकांडे प्रथमा कंडिका ॥ ॥ आवसथ्याधानं दारकाले ॥ सूत्रं ॥ आवसथ्या
ग्निनासाध्यानि कर्माणि व्याख्यातुं प्रतिज्ञातानि प्रथमसूत्रे सूत्रकृता पारस्करेण यतो न तस्याधानविधिं व्याख्यातुमुप

मुकवेदामुकशाखाध्यायिनं आवसथ्याधानं करिष्यन् कृताकृतावेक्षकत्वेन ब्रह्माणमेभिर्गंधपुष्पाक्षतवस्त्रालं
कारैस्त्वामहं वृणे। वृतोस्मीति तेन वाच्यं। केचिद्ब्रह्माणं मधुपर्केणार्चयंति। ऋत्विक्त्वाविशेषात्। ततः पत्न्या सहाह
तेवाससी परिधायाग्न्याधानदेशे स्थंडिलमुपलिप्य पंचभूसंस्कारान् कृत्वा तं देशं अहतवाससापिधाय ब्रह्मणा सह स
मृद्धं स्थालीमादाय ब्राह्मणैः परिवृतो वेदघोषमंगलगीतवाद्यादिभिर्जनितोत्साहो वैश्यस्य तृतीयवर्णस्य बहुपशोः पशु
भिः समृद्धस्य तदलाभे गोभिलादिसूत्रवचनात् भ्राष्ट्रगृहात् अंबरीषाद्बहुयाजिनो ब्राह्मणस्य गृहाद्वा। बह्वन्नपाकाद्ब्राह्म
णमहानसाद्वा स्थाल्यामग्निं गृहीत्वा तथैव गृहमागत्य परिसमूहनादिपंचभूसंस्कारसंस्कृते स्थंडिले प्राङ्मुख उपविश्या
त्माभिमुखमग्निं निदध्यात्। ततो ब्रह्मोपवेशनादि ब्राह्मणभोजनांतं वक्ष्यमाणं कर्म कुर्यात्। चातुष्प्राश्यपचनवत्सर्वमि
तिसूत्रकृता पूर्वपक्ष उपन्यस्तो न तु संमत इति कर्कोपाध्यायो भाष्ये निरूपितवान्। अधुनारणीयपक्षमाह। अरणिप्रदा
नमेके सूत्रं एके आचार्याः अरणिप्रदानं प्रपाद् उपशदृस्यार्थे। अरणीप्रदानमुपादानं कारणं। उत्पत्तिस्थानं यस्याग्नेः सो
रणिप्रदानस्तमरणीप्रदानमग्निमादधीतेति मन्यंते। पंचमहायज्ञा इति श्रुतेः॥ सूत्रं पंचमहायज्ञानां श्रौतत्वात्। आरणेये
ऽग्नावनुष्ठानं युक्तमित्यभिप्रायः। ततो ब्रह्मोपवेशनादि आज्यभागांतं कर्म कृत्वा। अग्न्याधेयदेवताभ्यः स्था ः०ः

वेकर्माभ्युदयिकंश्राद्धंयथोक्तंकुर्यात्। कालातिक्रमेतु। यावंत्यब्दान्यतीतानिनिरग्नेर्विप्रजन्मनः। तावंतिकृच्छ्राणिच
रेद्धोम्यंदद्याद्यथाविधि इतिवचनात्। अतिक्रांतसंवत्सरसंख्यया प्राजापत्यरूपंप्रायश्चित्तंमुख्यविधिनाचरित्वातद
शक्तौप्रतिप्राजापत्यंगांदत्वातदलाभेतन्मूल्यंनिष्कमेकंअर्द्धंतदर्द्धंवाद्वादशब्राह्मणभोजनमयुतगायत्रीजपंवागा
यत्र्यातिलाज्यसहस्रहोमंवाशक्त्यपेक्षयान्यतमंविधायहोम्यंसायंप्रातर्होमद्रव्यंप्रत्यहमाहुतिचतुष्टयपर्याप्तंअति
क्रांतदिवसान्गणयित्वाब्राह्मणेभ्योदद्यात्। प्रशंसावाक्यंतत्रगृह्यकांडे। नावसथ्यात्परोधर्मोनावसथ्यात्परंतपः।
नावसथ्यात्परंदानंनावसथ्यात्परंधनं। नावसथ्यात्परंश्रेयोनावसथ्यात्परंयशः। नावसथ्यात्परासिद्धिर्नावसथ्यात्प
रागतिः। नावसथ्यात्परंस्थानंनावसथ्यात्परंव्रतमित्यावश्यकत्वान्नित्यंतस्मात्तदकरणेप्रत्यवायात् तत्क्षयार्थंप्राय
श्चित्तमुचितं॥ तत्रवाक्यं। आवसथ्याधानमुख्यकालातिक्रांतेतावद्वर्षनिरग्नित्वजनितदुरितक्षयायएतावंतिप्राजाप
त्यव्रतानिचरिष्ये। तदशक्तौप्राजापत्यप्रत्याम्नायत्वेनप्रतिप्राजापत्यमेकैकांगांब्राह्मणेभ्योऽहंसंप्रददे। एवमन्ये
षुगोमूल्यदाननिष्कतदर्धार्द्धद्वादशब्राह्मणभोजनायुतगायत्रीजपगायत्र्यातिलाहुतिसहस्ररूपेषुवाक्यमूहनीयं।
ततः स्वशाखाध्यायिनंकर्मसुतत्वज्ञंब्राह्मणंगंधपुष्पमाल्यवस्त्रालंकारादिभिरभ्यर्च्यामुकगोत्रममुकशर्माणम

गृ॰ सू॰ भा॰ ह॰ ५

दिनाक्रमेण। उपरिष्टात् ऊर्ध्वं जुहोत्यष्टौ। किं कृत्वा हुत्वा काभ्यः अग्न्याधेयदेवताभ्यः पूर्वोक्ताभ्यः कस्य स्थालीपाक
स्य चरोः स्थालीपाकस्यावयवलक्षणा षष्ठी। स्विष्टकृते च॥ सूत्रं॥ स्विष्टकृते चाग्नये अष्टौ च होमान्ते स्थालीपाकस्य हु
त्वा। चशब्दात्॥ अयास्यग्नेर्वषट्कृतं यत्कर्मणात्यरीरिचं देवा गातुविद इति॥ सूत्रं॥ अयास्यग्नेर्वषट्कृतमित्यनेन मंत्रे
णाज्याहुतिं जुहोति। ननु स्विष्टकृते इति किमर्थमुक्तं। प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविरिति वक्ष्यमाण
त्वात्। अत्र चान्यस्य हविषः सद्भावात्। प्राङ्महाव्याहृतिभ्यः प्राप्तस्य स्विष्टकृद्धोमस्य उच्यते अयास्यग्नेरिति आज्या
हुतेर्महाव्याहृतिभ्यः पूर्वं प्राप्त्यर्थं॥ बर्हिर्हुत्वा प्राश्नाति॥ सूत्रं॥ बर्हिः परिस्तरणार्थं अग्नौ प्रक्षिप्य प्राश्नाति भक्षयति।
अत्र प्राशनोपदेशसामर्थ्यात्प्राश्यमाकांक्षितं। तत्किं हुतशेषः अन्यद्वा किंचित्। उच्यते पाकयज्ञेष्ववत्तस्यासर्वे
होमो हुत्वा शेषप्राशनमिति कात्यायनोक्तेः स्रुवेणावत्तस्य होमद्रव्यस्य सर्वस्य होमनिषेधात् हुतशेषस्य प्राश
नविधानात् सर्वेषामाहुतीनां होमद्रव्यं स्रुवे अवशेषितं संस्रवत्वेन प्रसिद्धं पात्रांतरे प्रक्षिप्यते तत्प्राश्यमिति। ननु अ
कृते वैश्वदेवे बलिन्यादिवचनाद्वैश्वदेवात् प्राक् स्थालीपाकानुष्ठाने प्राप्ते तत्र च संस्रवप्राशने विहितं तत्कृत्वा कथं मा
ध्यान्हिके वैश्वदेवादिकर्मण्यधिकारः इति चेत्। उच्यते। शेषप्राशनस्य कर्मांगत्वेन विधानात्। अप्राशने च कर्म

५

7

लीपाकं०ः श्रपयित्वाज्यभागाविष्ट्वाज्याहुती जुहोति त्वन्नो अग्ने स त्वन्नो अग्न इमम्मे वरुण तत्त्वा यामि ये ते शतम् अयाश्चा
ग्न उदुत्तमं भवतन्न इत्यष्टौ॥ सूत्रं॰ अग्न्याधेयस्य श्रौतस्य देवताः अग्निः पवमानोऽग्निः पावकोऽग्निः शुचिरिति अ
ग्न्याधेयदेवताः ताभ्यः स्थालीपाकं चरुं श्रपयित्वा यथाविधि पक्त्वा आज्यभागौ आग्नेयसौम्यौ आघारपूर्वकौ हुत्वा
आज्येनाहुतयो होतव्याः। आज्याहुतयस्ता आज्याहुती जुहोति। त्वन्नो अग्न इत्यादिभिर्भवतन्न इत्यन्ताभिरष्टभि
रृग्भिः प्रत्यृचमष्टौ। ननु अग्न्याधेयदेवताभ्यो हुत्वा जुहोति इति वक्ष्यति। तत्किमर्थमत्राग्न्याधेयदेवताभ्य इत्युक्तं। वह्नी
नां देवतानां देवतात्वज्ञापनायेति चेत्। ननु बहुत्वमस्त्येव। कुतः इयं शंका। पवमानादिविशेषणविशिष्टस्याग्नेरेकत्वात्
अग्निरेकाग्निरिति द्वितीयेति हेतुः एवाग्न्याधेयदेवतं इति हृयोरेव देवतात्वं मा भूदिति पुनर्ग्रहणात् वह्नीनामेव देवतात्वं वि
शिष्टस्य देवतान्तरत्वमिति। इन्द्रमहेन्द्राधिकरणे जैमिनीयेर्निर्णीतत्वात्। आज्यभागाविष्ट्वेति किमर्थं पुनर्वचनं आघारा
दीनां चतुर्दशानां क्रमेण पठिष्यमाणत्वात्। उच्यते। आज्याहुतीनां किंस्थानमिति संशये आज्याहुतीस्थानविधाना
र्थं अष्टग्रहणं तु मंत्रप्रतीकसंशयनिवृत्त्यर्थं। पुरस्तादेवमुपरिष्टात् स्थालीपाकस्याग्न्याधेयदेवताभ्यो हुत्वा जुहो
ति॥ सूत्रं॰ पुरस्तात् पूर्वं कस्य अग्न्याधेयदेवताहोमस्याष्टौ जुहोति यथा। एवमुपरिष्टात्। एवं तया त्वन्नो अग्न इत्या

8

एतावद्वर्षनिरग्नित्वजनितदुरितक्षयाय एतावन्ति प्राजापत्यव्रतानि चरिष्ये। तदशक्तो प्राजापत्यप्रत्याम्नायत्वे
न प्रति प्राजापत्यमेकैकां गां ब्राह्मणेभ्योऽहं संप्रददे एवमन्येष्वपि वाक्यमूहनीयं ॥ तद्यथा ॥ आवसथ्याधान
मुख्यकालातिक्रान्तैतावद्वर्षनिरग्नित्वजनितदुरितक्षयाय प्राजापत्यप्रत्याम्नायत्वेन प्राजापत्यं एतावतीनां
गवां मूल्यमिदमेतावत्सुवर्णं ब्राह्मणेभ्योऽहं संप्रददे। तद्वत्प्राजापत्यप्रत्याम्नायत्वेनैतावतो ब्राह्मणान्भोजयिष्ये
। आवसथ्याधानमुख्यकालातिक्रान्तैतावद्वर्षनिरग्नित्वजनितदुरितक्षयाय एतावत्प्राजापत्यप्रत्याम्नायत्वेन
गायत्र्या एतावन्त्ययुतानि जपिष्यत इदं तावन्ति तिलाहुतिसहस्राणि होष्यामीति। एवं कृतप्रायश्चित्तो होमद्रव्य
स्यात ॥ तद्यथा ॥ आवसथ्याधानमुख्यकालातिक्रान्तैतावद्दिनसंबंधिसायंप्रातर्होमद्रव्यं एतावत्परिमाणं दधितंडु
लयवानामन्यतमं ब्राह्मणेभ्योऽहं संप्रददे तन्मूल्यद्रव्यमेतावत्परिमाणं वा होम्यं स्यादिति वचनात् ॥ इतरपक्षाद्यारि
कर्मद्रव्यदाननिवृत्तिः। छंदर्षिस्मरणं ॥ इषेत्वादिखं ब्रह्मान्तं ॥ ततः स्वशाखाध्यायिनं कर्मसुतत्वज्ञं ब्राह्मणं गंधपु
ष्पमाल्यवस्त्रालंकारादिभिरभ्यर्च्य अमुकगोत्रममुकशर्माणममुकवेदममुकशाखाध्यायिनमावसथ्याधानंक
रिष्यन् कृताकृतावेक्षकत्वेन ब्रह्माणमेभिर्गंधपुष्पाक्षतवस्त्रालंकारैस्त्वामहं वृणे ॥ वृतोस्मीति तेन वाच्यम् ॥

णोवेगुण्यात्। नोत्तरकर्माधिकारनिवृत्तिः। बर्हिर्होममन्त्रविधानसामर्थ्यादग्न्याधान एव भवति नान्येषु कर्मसु त
तो ब्राह्मणभोजनं॥ सूत्रं ततः समाप्ते कर्मणि ब्राह्मणभोजनं दद्यात्। ब्राह्मणभोजनमित्यत्र एकस्मै द्वाभ्यां बहुभ्यो
वा भोजनं ब्राह्मणभोजनमिति समासस्य तुल्यत्वात्। एकस्मिन्नपि ब्राह्मणे भोजिते अर्थस्यानुष्ठितत्वात् एकस्यै
व भोजनमिति युक्तं॥ इति सूत्रार्थः॥ अथ पद्धतिः॥ तत्रावसथ्याधानं करिष्यन् उक्तकालातिक्रमाभावे अग्न्याधाना
र्थोपदिष्टमासतिथिनक्षत्रवारादिके काले प्रातः सुस्नातः सुप्रक्षालितपाणिपादः स्वाचांतः सपत्नीको गोमयोपलि
प्ते शुचौ स्वासने उपविश्य। अद्येहेत्यादि देशकालौ स्मृत्वा आवसथ्याग्निमहमाधास्ये इति संकल्पं विधाय। मातृपू
जापूर्वकमाभ्युदयिकं श्राद्धं यथोक्तं कुर्यात्। कालातिक्रमे तु॥ यावंत्यब्दान्यतीतानि निरग्नेर्विप्रजन्मनः तावंति कृच्छ्रा
णि चरेद्धोम्यं दद्याद्यथाविधि इति वचनादतिक्रांतसंवत्सरसंख्यप्राजापत्यरूपं प्रायश्चित्तं मुख्यविधिना चरित्वा तत्
दशक्तौ प्रतिप्राजापत्यं गां दत्वा तदलाभे तन्मूल्यं निष्कमेकमर्द्धं तदर्धं वा द्वादशब्राह्मणभोजनं वा अयुतगायत्री
जपं वा गायत्र्या तिलाज्यसहस्रहोमं वा शक्त्यपेक्षयान्यतमं विधाय होम्यं सायंप्रातर्होमद्रव्यं प्रत्यहमाहुतिचतु
ष्टयपर्याप्तं अतिक्रांतदिवसानां गणयित्वा ब्राह्मणेभ्यो दद्यात्॥ अथवा कं आवसथ्याधानमुख्यकालातिक्रां

प्रोक्तं देवयोनिः स उच्यते। तस्यां यो जायते वह्निः स कल्याणकृदुच्यते। प्रथमे मंथने त्वेष नियमो नोत्तरेषु च। अष्टां
गुलः प्रमंथः स्याच्चात्रं स्याद्द्वादशांगुलं। ओविली द्वादशैव स्यादेतन्मंथनयंत्रकं॥ गोवालैः शणसंमिश्रैस्त्रिवृद्वृत्त
मनंशुकं व्याममप्रमाणेन नेत्रं स्यात्तेन मथ्यो हुताशनः॥ चात्रबुध्ने प्रमंथाग्रं गाढं कृत्वा विचक्षणः। इत्युक्तलक्षणामर
णयादिकं संपाद्य उक्तकाले माघादिपंचमासीनामन्यतमे मासे। कृत्तिकारोहिणीमृगशिरःफल्गुनीद्वयहस्तानाघृस्ता
णामन्यतमर्क्षान्वितायां शुभायां तिथौ चंद्रशुद्धौ गृह्याग्निमादधीत॥ सुरभ्यकालातिक्रमे तु एतावान् विशेषः॥ उक्तवि
धिना कृतप्रायश्चित्तो दत्तहोम्यद्रव्यः स्नानादिपूर्वकं संकल्पादि मातृपूजाभ्युदयिकश्राद्धब्रह्मवरणाहतवासः परिधा
नादि कृत्वा शालायां यजमान उपविशति। तस्य दक्षिणतः पत्नी॥ अथ ब्रह्मा अरणी आदाय अधरारणिं पत्न्यै उत्तरारणिं
यजमानाय दद्यात्॥ तौ चावसथ्याग्निसाधनभूते इमे अरणी आवाभ्यां परिगृहीते। तत्रेयमधरा इयमुत्तरा। इदं चात्रं इयमो
विली इमानि स्रुवादीनि पात्राणि परिगृहीतानीति परिगृह्णीतः॥ ततोऽग्न्याधानदेशे शंकुं द्वादशांगुलं खादिरं चतुरंगुलम
स्तकं निखाय तत्र रज्जुपाशं क्षिप्त्वा सार्द्धत्रयोदशांगुलरज्ज्वंतं शंक्वंतराले संवेष्ट्य प्रदक्षिणपरिभ्रामणेन परिलिख्य तत्र।
परिसमूहनादिकं पंचभूसंस्कारान् कृत्वा आच्छाद्य मंथनमारभेत॥ तद्यथा॥ प्राग्ग्रीवमुत्तरलोमकृष्णाजिनमास्तीर्य तेन

केचित्ब्राह्मणं मधुपर्केणार्चयंति ॥ ऋत्विक्कार्यविशेषात् ॥ ततः पत्न्या सहाहते वाससी परिधाय अग्न्याधानदेशे स्थं
डिलमुपलिप्य पंचभूसंस्कारान्कृत्वा तं देशं वस्त्रेपिधाय ब्रह्मणा सहसम्हंस्थालीमादाय ब्राह्मणैः परिवृतो वि
दघोषमंगलगीतवाद्यादिभिर्जनितोत्साहो वैश्यस्य बहुपशोर्गृहात् ॥ सूत्रांतरमतेन ॥ अंबरीषाद्बहुयाजिनो ब्रा
ह्मणस्य गृहाद्वा बहून्नपाकाद्ब्राह्मणमहानसाद्वा स्थाल्यामग्निं गृहीत्वा तेनैव गृहमागत्य परिसमूहनादिपंचभूसंस्का
रसंस्कृते स्थंडिले प्राङ्मुख उपविश्य आत्माभिमुखमग्निं निदध्यात् ॥ इत्याहरणपक्षे ॥ आरण्यपक्षे तु गृह्याग्न्याधान
जाते श्वो यजमानः पुण्येऽहनि । अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः तस्य या प्राङ्मुखी शाखा उदीची चोर्ध्वगा
पि वा ॥ अरणी तन्मयी ज्ञेया तन्मध्ये चोत्तरारणिः ॥ सारवद्दारवं चात्र मोविली च प्रशस्यते ॥ संसक्तमूलो यः शम्या स श
मीगर्भ उच्यते । अभावे त्वशमीगर्भो दाहरेदविलंबितः ॥ चतुर्विंशत्यंगुला दीर्घा विस्तारेण षडंगुला ॥ चतुरंगुलमुत्सेधा
अरणिर्याज्ञिकैः स्मृता ॥ मूलादष्टांगुलं त्यक्त्वा अग्राच्च द्वादशांगुलं । अंतरं देवयोनिः स्यात्तत्र मथ्यो हुताशनः ॥ मूर्धाक्षिक
र्णवक्त्राणि कंधरा चापि पंचमी अंगुष्ठमात्राण्येतानि द्व्यंगुष्ठं वक्ष उच्यते ॥ अंगुष्ठमात्रं हृदयं त्र्यंगुष्ठमुदरं तथा ॥ एकांगुष्ठा कटि
र्ज्ञेया द्वौ वस्ती द्वौ च गुल्फकं । ऊरू जंघे च पादौ च चतुरस्त्र्येकं यथाक्रमं । अरण्यवयवा ह्येते याज्ञिकैः परिकीर्तिताः । यत्तद्गुह्यमिति

गृ॰सू॰
भा॰ह॰
८

कस्यजुहुयात॥तद्यथा॥॰त्वन्नोअग्नइतिवामदेवऋषिस्त्रिष्टुप्छंदोग्नीवरुणौदेवते॥प्रायश्चित्तहोमेविनियोगः
सत्वमितिपूर्ववत॥॰अयाश्चाग्नइतिप्रजापतिऋषिर्विराट्छंदोग्निर्देवता॥येतेशतमितिशुनःशेपऋषिर्जगतीछंदःव
रुणःसविताविष्णुर्विश्वेदेवामरुतःस्वर्कादेवताःप्रायश्चित्तहोमेविनियोगः॥॰उदुत्तममितिशुनःशेपऋषिस्त्रिष्टुब्वरु
णःविष्णुक्रमेषुपाशोन्मोचनेविनियोगः॥॰त्वन्नोअग्नइत्यादिमन्त्रमुमुग्ध्यस्मत्स्वाहा॥इदमग्नीवरुणाभ्यां॥॰सत्व
न्नोअग्नेसुहवानएधिस्वाहा॥॰इदमग्नीवरुणाभ्यां॥इमंमेवरुणचकेस्वाहा॥इतिवरुणाय॥॰तत्वायामिप्रमो
षीस्वाहा॥इदंवरुणाय॰येतेशतंवरुणायेसहस्रंयज्ञियाःपाशावितताम्महांतः॥तेभिर्नोअद्यसवितोतवि
ष्णुर्विश्वेमुंचंतुमरुतःस्वर्काःस्वाहा॥इदंवरुणाय॥॰सवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः॥केचिदि
दंवरुणायेति॥अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्त्वमयाअसि॥अयानोयज्ञंवहास्ययानोधेहिभेषजंस्वाहा
इदंजातवेदोभ्यां।केचिदिदमग्निभ्यो।अथस्थालीपाकेनचतस्रोग्न्याधेयदेवताः॥अग्नयेपवमानायस्वाहा इद
मग्नयेपवमानाय॥अग्नयेपावकायस्वाहा॥इदमग्नयेपावकाय॥अग्नयेशुचयेस्वाहा॥इदमग्नयेशुचये।अदित्यै
स्वाहा।इदमदित्यै।॰इत्यग्न्याधेयदेवताभ्यः।ततःपूर्ववदाज्येनाष्टचैहोमः॥ततोब्रह्मान्वारब्धःउत्तरार्धात॥स्रुवेण

८

त्रोदग्ग्राममधरारणिं निधाय तत्पूर्वत उत्तरारणिं च अधरारण्यां उक्तलक्षणां मंथनप्रदेशे प्रमंथमूलं निधाय चात्रायेचोवि
लीमुदग्ग्रां च नेत्रेण चात्रं त्रिर्वेष्टयित्वा गाढं धृत्वा पश्चिमाभिमुखोपविष्टया पत्न्या मंथयेत् ॥ यावदग्नेरुत्पत्तिः । पत्न्या
मंथनासामर्थ्ये अन्ये ब्राह्मणाः शुचयो मंथयंति ॥ एवं यजमानासामर्थ्ये अन्यो यंत्रं धारयति ॥ ततो जातमग्निं मृन्म
येपात्रे शुष्कगोमयपिंडचूर्णोपरिनिहिततूले सपुरीषं प्रक्षिप्य संधुक्ष्य प्रज्वाल्य पूर्वसंस्कृते देशे आदध्यात् ॥ तत्र ब्रह्मो
पवेशनादि देवताभिधानपर्युक्षणांतं कृत्वा ॥ स्रुवमादाय दक्षिणं जान्वाच्य ब्रह्मणान्वारब्धः प्रजापतये स्वाहेति मनसा
ध्यायन् प्रांचमूर्ध्वमृजुं संततमाज्येन अग्नेरुत्तरप्रदेशे पूर्वाघारमाघारयति । इदं प्रजापतय इति त्यागं कृत्वा हुतशेषं पा
त्रांतरे प्रक्षिपेत् ॥ तथैवेंद्राय स्वाहेति ॥ अग्नेर्दक्षिणप्रदेशे उत्तराघारमिदमिंद्रायेति त्यागं विधाय ॥ अग्नये स्वाहेति ।
अग्नेरुत्तरार्द्धपूर्वार्धे आग्नेयमाज्यभागं हुत्वा ॥ इदमग्नय इति त्यागं कृत्वा ॥ तथैव सोमाय ॥ स्वाहेति दक्षिणार्धपू
र्वार्द्धे सौम्यमाज्यभागं हुत्वा ॥ इदं सोमायेति स्वत्वं त्यजेत् ॥ समिद्धतमेवाग्निप्रदेशे आघारप्रभृत्याः सर्वाहुती र्जुहुया
त् ॥ अथाष्टर्च्चहोमः ॥ नान्वारंभः त्वन्नो अग्ने स त्वन्नो अग्न इमं मे वरुण तत्त्वा यामि ये ते शतमयाश्चाग्न उदुत्तमं
भवतन्न इत्येताभिरष्टभिर्ऋग्भिः प्रत्यृचमेकैकामष्टाज्याहुती र्हुत्वा यथादैवतं स्वस्वत्यागं च कृत्वा ॥ स्थालीपा

14

ग्निंपरित्यज्ययदिग्रामसीमामतीत्यवसेयात्तामेकांरात्रिंनत्वग्नातरागत्याग्निंमथित्वोक्तविधिनाब्रह्मोपवेशनादि
ब्राह्मणभोजनान्तमाधानंकुर्यात्।तत्रहोमलोपेतुएकतंत्रेणसायंप्रातर्होमंकुर्यात्।बहुहोमलोपेप्येवं।अथयदि
कृताधानोयजमानः प्रजार्थीकामार्थीवोद्वहेत्तत्रअन्यत्रारणीसंपाद्यप्रातर्होमंविधायद्वितीयविवाहंकृत्वाआचतुर्थीक
र्मणोहोमंत्यक्त्वातदंतेऽतिक्रांतहोमद्रव्यंदत्वापंचमेहनिपुनराधानंयथोक्तमित्येकः पक्षः प्रातर्होमंकृत्वाद्विवा
विवाहंसंपाद्यसद्यः चतुर्थीकर्मचकृत्वातद्दिनएवावसथ्याधानमितिद्वितीयः॥पक्षः॥अत्रपक्षद्वयेपिपूर्वारण्या
स्फोटितयोरावसथ्यदहनं।अन्यारण्याराधानं॥पात्राणितान्यपि।यत्तुछंदोगपरिशिष्टे।सदारोप्यः पुनर्दारानकथंचि
त्कारणांतरात्।यदिच्छेदग्निमान्कर्तुंक्वहोमास्यविधीयते।स्वाग्नावेवभवेद्धोमोलौकिकेनकदाचन।नत्वाहिताग्नेः
स्वंकर्मलौकिकेऽग्नौविधीयते।इतिपुनराधानाभावप्रतिपादनंतच्छंदोगविषयं॥अनेकपत्नीकस्यैकस्याः पत्न्यामर
णेऽरणिपात्रैः सहावसथ्येनतांदाहयित्वाशेषाचांतेपुनराधानं।एकपत्नीकस्यतुपत्नीमरणेकृतविवाहस्यचतुर्थीक
र्मानंतरंपुनराधानं॥अग्नावुपशांतेहोमकालद्वयातिक्रमेगृहपतौप्रोषितेप्रमादात् पत्न्याग्रामांतरवासेतथागृहस्थितेय
जमानेपत्न्याः॥प्रवासेप्राग्घोमकालादनागमनेपुनराधानं॥केचित्तुज्येष्ठायामग्निसन्निधौतिष्ठंत्यामन्यासांपत्नि ।

चरुमादायअग्नयेस्विष्टकृतेस्वाहेतिअग्नेरुत्तरार्धेजुहुयात॥ इदमग्नयेस्विष्टकृते॥ अथानन्वारब्धआज्येनआया
स्यग्नेर्वैषट्कृतंयत्कर्मणात्यरीरिचं देवागातुविदः स्वाहा॥ इदंदेवेभ्योगातुविद्भ्यः॥ इतिस्वत्वंत्यक्त्वा॥ अथब्रह्मान्वा
रब्धः॥ ॐ भूर्भुवःस्वरितिक्रमेणप्रजापतिऋषिर्गायत्रीछंदोग्निर्देवताप्रजापतिऋषिरुष्णिक्छंदोवायुर्देवता
प्रजापतिर्ऋषिरनुष्टुप्छंदः सूर्योदेवताव्याहृतिहोमेविनियोगः॥ ॐ भूः स्वाहा॥ इदमग्नये। इदंभूर्वा॥ ॐ भु
वःस्वाहा॥ इदंवायवे॥ इदंभुवइतिवा॥ ॐ स्वःस्वाहा॥ इदंसूर्याय॥ इदंस्वःइतिवा॥ ॐ त्वन्नोअग्नेसत्वन्नो
अग्नेअयाश्चाग्नयेतेशतंउदुत्तमंपंचमंत्राः प्राजापत्यांतानवाहुतीर्हुत्वाबर्हिर्होमं[illegible]कृत्वासंस्रवंप्राश्याचम्यप
वित्राभ्यांमुखंमार्जयित्वापवित्रेअग्नौप्रक्षिप्यप्रणीताअग्नेः पश्चिमतोनिनीयआस्तादितपूर्णपात्रवरयोरन्यत
रस्यब्रह्मणेदक्षिणात्वेनदानंकृत्वाएकब्राह्मणभोजनदानं। तथास्मृत्यंतरोक्तम[illegible]विंशतिब्राह्मणभोजनं। अत्रमा
र्जनंपवित्रप्रतिपत्तिः बर्हिर्होमः प्रणीताविमोकइत्येतेचत्वारःपदार्थाः भाष्यकारमतेगृह्यकर्मसुनभवंतिवचनाभावा
त्।आवसथ्याधानेबर्हिर्होमोवचनाद्भवति॥ इत्यावसथ्याधानं॥ ततःप्राणिकाधानपंचमहायज्ञसायंप्रातर्होमनिमि
त्तंचआद्यचतुष्पात्तद्दिनएवकार्यं॥ अथपुनराधाननिमित्तानिलिख्यंते॥ तत्रकृतावसथ्याधानौपत्नीयजमानौअ

गृ॰ सू॰
भा॰ हृ॰
१०

निरिति मंत्रेणारण्योः समारोप्य पूर्वेऽग्नौ होमादिकं विदध्यात्। यदा तु लौकिकाग्न्याद्यन्यतमं निधाय होमं कृत्वा मंथ
नेप्रारब्धे द्वितीयहोमकालात्तृतीयाद्वाग्नेर्जन्माभावस्तदा पुनराधानं॥ आरोपिताग्न्योरण्योर्नाशे एकस्या वा पुन
राधानं॥ असमारोपितयोस्तु एकतरविनाशे द्वितीयां छित्वा मंथनेन नष्टायाः प्रतिपत्तिरावसथ्ये दाहः। यदा पुनर्जंतुभक्ष
णेन मंथनेन वा मंथनायोग्ये भवतस्तदान्येऽरणी गृहीत्वा दर्शपक्षादिकर्म निर्वर्त्य जीर्णे मरणी हृत्य शकलीकृत्य तस्मिन्न
ग्नौ प्रज्वाल्य दक्षिणहस्तेन नूतनामुत्तरारणिं सव्यहस्तेनाधरारणिं गृहीत्वा दीप्तेऽग्नौ धारयन्॥ उद्बुध्यस्वाग्ने प्रविश स्वयो
निमन्यं देवयज्यां वोढवे जातवेदः॥ अरण्यारणिमनुसंक्रमस्व जीर्णां तनुमजीर्णया निर्णुदस्व॥ अयं ते योनिर्ऋत्वियो
इत्येतौ मंत्रौ जपित्वा मंथनयंत्रं निधायाग्निं मथित्वा भूसंस्कारपूर्वकं स्थाने निधाय पूर्णाहुतिवर्ज्यं संस्कृत्यानादिष्ट
होमं कुर्यात्॥ अथ पक्षहोमविधिः॥ तत्र यजमानस्यामयादिनिमित्ते रोगार्तो वध्वगमने राष्ट्रभ्रंशे धनाभावे गुरु
गृहवासे॥ अन्यास्वपि भयाद्यापत्सु होमानां समासो भवति॥ तद्यथा॥ प्रतिपदि सायंकाल आहुतिपरिमाणं होम
द्रव्यं चतुर्दश कृत्व एकस्मिन् पात्रे कृत्वा॥ अग्नये स्वाहेति हुत्वा पुनस्तथैव चतुर्दश कृत्वो होमद्रव्यं गृहीत्वा प्रजापतये
स्वाहेति जुहुयात्॥ एवमेव होमद्रव्यं चतुर्दश कृत्व एकस्मिन् पात्रे कृत्वा सूर्याय स्वाहेति प्रातर्हुत्वा पुनस्तथैव चतुर्दश

सहितानांकेवलानांवाकार्यवशाद्ग्रामांतरेस्थितानांपत्न्योर्वाग्निसन्निधौतिधृतिसर्वासांपत्नीनांग्रामांतरगमनेनाग्नि
नाशइत्याहुः तथापत्न्याग्निंविनासमुद्रगानद्यतिक्रमेभर्त्रारहितायाश्चाग्निनासहितायाः भयंविनासीमातिक्रमे
कर्मार्थहरणादन्यत्रशकटंविनाशम्यापरासादूर्ध्वंनिरुछ्रसतः प्रत्यक्षाग्निहरणेमथ्यमानस्यदृष्टस्याग्नेर्मथन
यंत्रोत्थापनादूर्ध्वंनाशे॥संवत्सरमेकंयजमानस्यहोमाकरणेप्राजापत्यब्रह्मकूर्चयोरन्यतरप्रायश्चित्ताचरणादू
र्ध्वंपत्न्याश्चपादकृच्छ्राचरणात्पुनर्विवाहवदाधानं॥उदकेनाग्न्युपशमनेशिवेपनाग्न्युद्वाहनेप्रत्यक्षस्यारणीसमारू
ढस्यवाग्नेः एकनामधेयशतयोजनगामिनदीयोजनाधिकगामिनदीसन्तरणेवासर्वेनसीमातिक्रमणेऽप्यादंतसीमा
तिक्रमणेवापत्नीयजमानयोरन्यारंभाभावेसूकरगर्दभकाकसृगालश्वकुक्कुटमर्कटशूद्रांत्यजमहापातकिशवसूतिकार
जस्वलारेतोमूत्रपुरीषमेदोसृक्श्लेष्मशोणितपूयास्थिमांसमज्जासुराप्रभृतिभिरमेध्यैः प्रत्यक्षस्यारणीसमारोपित
स्यवाग्नेः स्पर्शेऽन्यस्मान्निरंतरपक्षहोमकरणेपुनराधानं तथाग्नेरपहरणेप्रादुः करणादूर्ध्वंपूर्वेवाशांतेग्नौमथने
प्रारब्धेग्निजन्माभावेलौकिकाग्निर्ब्राह्मणदक्षिण हस्ताजादक्षिण कर्णकुशस्तंबजलानामन्यतमेग्निस्थानेऽप्र
कल्पितेसूर्यास्तमयउदयेवाजातेपुनराधानं॥अग्निनाशभ्रांत्याग्निंमथित्वापूर्वाग्निंदृष्ट्वामथितमग्निं॥अयंतेयो

अयंतेयोनिर्

गृ.सू. भा.टी. १५

तेभ्यश्च तेभ्योऽदनादिकमस्मिन्निति पाको गृह्याग्निः तस्मिन् पाके नान्यत्रेति भावः॥ पाके यज्ञाः पाकयज्ञाः यतः चैवा-
हिकेऽग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि॥ पंचयज्ञविधानं च पक्तिं चान्वाहिकीं गृहीति मनुनाऽऽनेन दिनपाको गृह्येऽग्नौ स्मर्य-
ते॥ ते चत्वारः चतुर्विधा भवंति॥ कथं॥ हुतोऽहुतः प्रहुतः प्राशित इति॥ सूत्रं॥ तत्र हुतः होममात्रं यथा सायंप्रातर्होमः
अहुतः होमबलिरहितकर्म यथा स्रस्तरारोहणं॥ प्रहुतो यत्र होमो बलिकर्म भक्षणं च॥ यथा पश्वादिकर्म। प्राशितः
यत्र प्राशनमात्रं न होमो न बलिः॥ यथा सर्वासां गवां पयसि पायसश्रपणानन्तरं ब्राह्मणभोजनमित्थं चतुर्विधः
॥ पंचसु बहिः शालायां विवाहे चूडाकरण उपनयने केशांते सीमन्तोन्नयने॥ सूत्रं॥ पंचसु संस्कारकर्मसु
बहिः शालायां॥ गृहाद्बहिः शाला बहिःशाला मंडप इति यावत्॥ तस्यां कर्म भवति॥ यथा विवाहे परिणयने
चूडाकरणे क्षौरकर्मणि॥ उपनयने मेखलाबंधे केशांते गोदानकर्मणि सीमंतोन्नयने गर्भसंस्कारे एतेषु पंचसु
बहिः शालायामनुष्ठानं॥ अन्यत्र गृहाभ्यंतरे मुख्यशालायामेव॥ उपलिप्त उद्धतावोक्षितेऽग्निमुपसमाधा-
य॥ सूत्रं॥ उपलिप्ते गोमयोदकेन॥ उद्धते॥ स्फ्येनोल्लिखिते नेति तिसृभिरेखाभिः॥ अवोक्षिते उदकेना-
भ्युक्षिते॥ बहिः शालागृहयोः अन्यतरस्मिन् प्रदेशे अग्निमुपसमाधाय॥ अग्निं लौकिकमावस-

पांसुपरिलिप्ताउत्सृजततृणान्यत्स्विति ब्रूयात् इत्येतमुच्चैः पठेत् ॥ नत्वेवामांसोर्घः स्यात् ॥ सूत्रं ॥ तुशब्दः पक्षव्या
वृत्तौ ॥ अर्घः अमांसः पश्वालंभवर्जितो नैव भवेत् ॥ अध्वरयज्ञे आलभेत ॥ यद्यप्युत्सिसृक्षेद् इत्यनेन सूत्रेण गवालंभस्य विक
ल्पं विधाय ॥ नत्वेवामांसः इत्यनेन गवालंभनमर्घमात्रे नियमेन विधत्ते तथा च सति द्वयोः स्मृत्योर्विरोधेन प्रमाणप
प्राप्ते व्यवस्थामाह ॥ अधियज्ञमधिविवाहं कुरुतेत्येव ब्रूयात् ॥ सूत्रं ॥ अधियज्ञं यज्ञे अधिविवाहं विवाहे ॥ कु
रुत विस्थत गवालंभं पाप्मानं हनामीत्यस्यां ते इत्येवं वदेत् ॥ अन्यत्र पाप्मा हत इति ॥ पाप्मानं हनामीति वा विकल्पः
॥ नान्यत्रेति भावः ॥ यद्यप्येवं मधुपर्के गवालंभ आचार्येणोक्तः तथापि अस्वर्ग्यत्वाल्लोकविद्विष्टत्वाच्च कलौ न वि
धेयः ॥ अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नतु इति याज्ञवल्क्यादिस्मृतिषु निषेधदर्शनात् ॥ यद्यप्यसकृत्संव
त्सरस्य सोमेन यजेत कृतार्घ्या एवैनं याजयेयुर्नाकृतार्घ्या इति श्रुतेः ॥ सूत्रं ॥ यद्यप्यसकृत्संवत्सरस्य संवत्सरे अ
सकृत्पुनः पुनः सोमेन ज्योतिष्टोमादिना यजेत तदापि एनं सोमयाजिनं कृतमर्घ्यं कृतार्घ्या येषां ते कृतार्घ्या एवं सं
तः याजयेयुर्यज्ञं कारयेयुः ॥ न अकृतार्घ्या याजयेयुरिति श्रुतिवचनात् ॥ सोमेन यजेतेत्यनेन सोमयागार्थमेव
वृता ऋत्विज अर्घ्या इति गम्यते न यागान्तरार्थं ॥ इति हरिहरभाष्ये तृतीया कंडिका ॥ ३ ॥ चत्वारः पाकयज्ञाः पञ्च

प्रवर्त्तंते॥ नात्रवचनमस्तिपाकयज्ञेषुस्वतोन्यकर्तृत्वविधायकं॥ श्रौतवत्समाख्यापिनास्ति॥ ननुस्मृतीनांवेद
मूलत्वात् यद्वेदमूलंस्मार्त्तंकर्मतद्वेदसमाख्ययाऽन्यस्यकर्तृत्वंकल्प्यतां॥ मैवंयतः स्मृतयोऽनिश्चितवेदमूलाः॥ अ
तोनज्ञायतेकिंवेदमूलमिदंकर्म॥ यद्वेदसमाख्ययाऽन्यः कर्त्ताकल्प्यते॥ मंत्रलिंगविरोधोपिपरकर्तृत्वे॥ कथंसा
मामनुव्रताभव॥ प्रजापतिष्ट्वानियुनक्तुमह्यं॥ अमोहमस्मीत्यादिसानः पूषाशिवतमेत्यादयोवैवाहिकमंत्राः आ
त्मलिंगाः तेचपरकर्तृत्वेविरुध्यंते॥ तस्मात् पाकयज्ञेषुस्वयंयजमानस्यैवकर्तृत्वमितिसिद्धं॥ अत्रवरोपिवास
सीपरिधत्तेनपरिधास्येयशसामेतिमंत्राभ्यां। अथैनौसमंजयतिसमंजन्तुविश्वेदेवाः समापोहृदयानिनौ। संमा
तरिश्वासंधातासमुदेष्ट्रीदधातुनावितिसूत्रं॥ अथवस्त्रपरिधानानंतरंपरस्परंसमंजेथामितिप्रैषेणकन्यापि
ताएनौवधूवरौसमंजयतिसम्मुखौकरोति॥ अत्रविशेषमाहऋष्यशृंगः। वरगोत्रंसमुच्चार्यप्रपितामहपूर्वकम्
नामसंकीर्त्तयेद्धीमान्कन्यायाश्चैवमेवहि॥ तत्रवरः समंजंतुविश्वेदेवाः इत्यादिकंमंत्रंकन्यासम्मुखीभूतः पठति॥ अ
थकन्यादानप्रयोगोलिख्यते॥ उत्तरत्रपित्राप्रत्ताइतिसूत्रस्मरणात्॥ तद्यथा॥ अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्म
णः प्रपौत्रायअमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्रायअमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रायइतिवरपक्षे

वर्चोरयिंचपुत्राननुसंव्ययस्वायुष्मतीदंपरिधत्स्ववास इतिसूत्रं॥ अथाग्निस्थापनानंतरंएनांकुमारींवासःअह
तंसदशंवस्त्रंपरिधापयतिपरिहितंकारयतिवरः॥जरांगच्छेतिमंत्रंपठित्वा॥कुमारीचस्वयंपरिधत्ते॥ अथोत्तरीयं
याअकृंतन्नवयंयाअतन्वत॥याश्चदेवीस्तंतूनभितोततंथतास्त्वादेवीजरसेसंव्ययस्वायुष्मतीदंपरिधत्स्ववास
इति सूत्रं॥ अथवस्त्रपरिधानानंतरंउत्तरीयंवासःपरिधापयतिवरःयाअकृंतन्नितिमंत्रमुक्त्वा।अत्रपरिधापय
तीतिणिजंतस्यकारितार्थत्वात।परिधत्स्ववासइतिमंत्रस्यापितदर्थत्वात परिधापयितान्यइत्यवगम्यतेसकिंवरः
अध्वर्युर्वा इतिसंशयः॥तत्राध्वर्युःकर्मसुवेदयोगादितिपरिभाषाबलात्॥अध्वर्युःपरिधापयितेतिचेत्।न त्वास्मार्त्ते
षुकर्मसुअध्वर्योःकर्तृत्वयोगाभावात्।समाख्ययाहिअध्वर्योःकर्मसुयोगःसमाख्याचवेदयोगात्॥नचस्मृति
वेदः॥स्मरणादेवस्मृतीनांप्रामाण्यात्नपुनर्वेदमूलत्वेन॥अतःसमाख्यायाअभावात्स्वयंकर्तृत्वंपाकयज्ञेषु
अतोवरएवपरिधापयिता॥ननुपूर्णपात्रोदक्षिणावरोवेतिपाकयज्ञेषुपरिक्रयार्थादक्षिणाश्रूयते॥साचदक्षि
णापरिक्रेतव्याभावेनोपपद्यते॥अतस्तदन्यथानुपपत्त्याअन्यस्यकर्तृत्वंकल्प्यतां॥नैतदेवं॥अन्यस्यब्राह्मणः
परिक्रेतव्यस्यकर्तुर्विद्यमानत्वात्परिक्रयार्थदक्षिणाश्रवणस्योपपत्तेः॥किंचावचनाभावेपरःपरस्यकर्मकर्तुंन

22

त्योजननीतथा॥ कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परइति याज्ञवल्क्येन अन्येषामपि कन्यादाने अधिकारस्मर
णात् अथैनौ समीक्षयति ॥ अघोरचक्षुरित्यादि॥ अथ निष्क्रमणानंतरमेनौ वधूवरौ परस्परं समीक्षेयातामिति प्रे
षेण कन्यापिता समीक्षयति समीक्षणं कारयति॥ तत्र समीक्षमाणो वरः अघोरचक्षुरित्यादीन् निविष्टाइत्यंता
न्मंत्रान्पठति॥ इति हरिहरभाष्ये प्रथमकांडे चतुर्थी कंडिका ४ ॥ प्रदक्षिणमग्निं पर्याणीयैके॥ सूत्रं॥ एके आचार्याः
अग्नेः प्रदक्षिणं कारयित्वा वासः परिधानं समंजनं समीक्षणं च मन्यंते एके न मन्यंते ॥ ततो विकल्पः॥ पश्चादग्नेस्तेज
नीं कटं वा दक्षिणपादेन प्रवृत्योपविशति॥ सूत्रं॥ समीक्षणानंतरं अग्निं प्रदक्षिणीकृत्याग्नेः पश्चिमतः प्राङ्मुख उप
विशति॥ दक्षिणतो वधूः किं कृत्वा दक्षिणपादेन तेजनीं तृणपूलिकां कटं वा तृणमयं स्तरं प्रवृत्य प्रक्रम्य उक्तं भवत्यर्थः
दक्षिणपादेनोल्लंघयन् चलन् चलित्वा उभयोः संस्कार्यत्वात् सवधूकः॥ अन्वारब्ध आघारावाज्यभागौ महाव्याहृत
यः सर्वप्रायश्चित्तं प्राजापत्यः स्विष्टकृच्चैतन्नित्यं सर्वत्र॥ सूत्रं॥ अनेन वैवाहिकहोमप्रसंगेन सर्वकर्मसाधारणीं परिभाषां
करोत्याचार्यः॥ तद्यथा॥ ब्रह्मणा दक्षिणे बाहौ दक्षिणहस्तेन अन्वारब्धे कर्तरि॥ आघारसंज्ञके आज्याहुती। यथा मनसा
प्रजापते स्वाहा इदं प्रजापतये मनसा त्यागमपि॥ इंद्राय स्वाहा इदमिंद्राय॥ आज्यभागौ आज्यभागसंज्ञकौ होमौ यथा ॥ अ

अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्रीं ॥ अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्रीं अमु
कगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रीं इति कन्यापक्षे। एवमेव पुनर्वारद्वयमुच्चार्य अमुकगोत्रायामुकप्र
वरायामुकशर्मणे ब्राह्मणाय इति ब्राह्मणवरपक्षे। इतरवरपक्षे वर्मणे अमुकगुप्ताय अमुकदासायेति विशेषः ॥ अ
मुकगोत्रां अमुकप्रवरां अमुकनाम्नीमिमां कन्यां प्रजापतिदैवतां यथाशक्त्यलंकृतां पुराणोक्तकन्यादानफलका
मो भार्यात्वेन तुभ्यमहं संप्रददे इति सकुशेन जलेन कन्याहस्तं वरस्य हस्ते दद्यात् ॥ वरः स्वस्तीत्युक्त्वा ददातु पृथिवी त्वा प्र
तिगृह्णात्विति मंत्रेण प्रतिगृह्णीयात् ॥ ततः कोदादिति कामस्तुतिं पठेत् ॥ ततः कन्यापिता कृतैतत्कन्यादानप्रति
ष्ठासिद्ध्यर्थं सुवर्णं गोमिथुनं च दक्षिणां दद्यात् ॥ आचारादन्यदपि यौतकत्वेन सुवर्णरजतताम्रगोमहिष्यश्वग्रा
मादि कन्यापिता यथासंभवं ददाति ॥ अन्येपि बांधवादयो यथासंभवं यौतकं प्रयच्छंति ॥ केचन यौतकं होमांते
प्रयच्छंति अत्र देशाचारतो व्यवस्था ॥ पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामति ॥ यदैषीति ॥ सूत्रं ॥ पित्रा जनकेन प्र
त्तां संकल्प्य दत्तामादाय प्रतिग्रहविधिना प्रतिगृह्य ॥ गृहीत्वा हस्ते धृत्वा निष्क्रामति गृहमध्यात् ॥ मंडपाद्वा ॥ अग्नि
समीपं गंतुं ॥ यदैषि मनसेत्यादिना मंत्रेण करोत्यमुकि देवि इत्यंतेन। अत्र पित्रेत्युपलक्षणं। पिता पितामहो भ्राता सकु

प्रागन्यत्रपि चरुप्रभृतिहविर्भवति॥ केवलाज्ययागेसर्वोहुतिशेषेभवति॥ सर्वप्रायश्चित्तंप्राजापत्यांतरमेतदावा
पस्थानंविवाहे॥ सूत्रं। सर्वप्रायश्चित्तंत्वन्नोअग्नइत्यास्यउदुत्तममित्यंतं आहुतिपंचकंप्राजापत्यः प्राजापत्याहुतिः
सर्वप्रायश्चित्तंच प्राजापत्यश्चसर्वप्रायश्चित्तप्राजापत्यौतयोरंतरं॥ सर्वप्रायश्चित्तप्राजापत्यांतरं। एतदावापस्थानं। क
स्मिन्कर्मणिविवाहे॥ आवापस्थानं॥ आवापश्चअन्यत्रविहितस्यहोमस्यजयादेः कर्मणः कर्मांतरप्रक्षेपः। आवाप
स्य आगंतुकत्वेनअंतेनिवेशोयुक्तः न्यायात्। तन्निवृत्त्यर्थंतमेवाह। राष्ट्रभृतइच्छन्॥ सूत्रं॥ विवाहेवैवाहिकेहोमकर्म
णि। राष्ट्रभृतः राष्ट्रभृत्संज्ञकाः आहुतीः आवपेदित्यध्याहारः। जयाभ्यातानांश्च॥ सूत्रं॥ जयाश्च अभ्यातानांश्च जयाभ्या
तानाः तान्जयाभ्यातानांश्च आवपेत्। किंकुर्वन्इच्छन्राष्ट्रभृज्जयाभ्यातानाहोमफलंकामयन्। किंप्रमाणमितिचेत्॥
जानन्येनकर्मणार्छेदितिवचनात्सूत्रं॥ येनकर्मणा अस्मिन्कर्मणि ओप्यतेनयत्फलंभवतीतिजानन्विदन्। तत्कर्मफ
लमिच्छन् तस्मिन्कर्मणितत्कर्म आवपेदितिवचनात्। श्रुतेरित्यर्थः॥ तत्रराष्ट्रभृतोयथा। ऋताषाडृतधामाग्निर्गंधर्व
इत्यादिकाद्वादशमंत्राराष्ट्रभृत्संज्ञकाः। चित्तंचचित्तिश्चाकूतंचाकूतिश्चविज्ञातंचविज्ञातिश्चमनश्चशक्वरीश्चदर्शश्चपौर्ण
मासंचबृहच्चरथंतरंचप्रजापतिर्जयानिंद्रायवृष्णेप्रायच्छदुग्रः पृतनाजयेषु। तस्मैविशः समनमंतसर्वाः सउग्रः सइह

25

१९

ग्नये स्वाहा। इदमग्नये॥ सोमाय स्वाहा॥ इदं सोमाय॥ महाव्याहृतयः भूराद्यास्तिस्रो यथा ॐ भूः स्वाहा इदमग्नये॥ इ
दं भूर्वा इति त्यागः॥ तथैव भुवः॥ इदं वायवे इदं भुव इति वा॥ स्वः स्वाहा॥ इदं सूर्याय॥ इदं स्व इति वा॥ सर्वप्रायश्चित्तं सर्व
प्रायश्चित्तसंज्ञकाः पंचाहुतयः॥ यथा त्वन्नो अग्न इत्यादि प्रमुमुग्ध्यस्मत्स्वाहा॥ सत्वन्नो अग्ने सुहवो न एधि स्वाहा इ
दमग्नीवरुणाभ्यां द्वाभ्यां त्यागः॥ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमया असि॥ अयानो यज्ञं वहास्ययानो धे
हि भेषजं स्वाहा॥ इदमग्नये॥ येते शतं वरुणाये सहस्रं यज्ञियाः पाशा वितता महांतः॥ तेभिर्नो अद्य सवितोत वि
ष्णुर्विश्वेमुंचंतु मरुतः स्वर्काः स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः॥ उदुत्तममित्या
दित्र दितये स्याम स्वाहेत्यंतं इदं वरुणाय॥ प्राजापत्यं॥ प्रजापतिदेवताको होमः॥ यथा प्रजापतये स्वाहा इदं प्रजा
पतये॥ स्विष्टकृच्च स्विष्टकृद्धोमः॥ यथा अग्नये स्विष्टकृते स्वाहा॥ इदमग्नये स्विष्टकृते॥ चकारः सर्वसमुच्चयार्थः॥ एत
न्नित्यं सर्वत्र। एतदाघारादिस्विष्टकृदवसानं सर्वत्र॥ सर्वेषु होमात्मकेषु कर्मसु नित्यं यत्र होमाभावस्तत्र नास्ति॥ यथा॥
स्वस्त्यारोहणलांगलयोजनपायसब्राह्मणभोजनेषु अंते विहितस्य स्विष्टकृद्धोमस्य कर्मविशेषे स्थानांतरमाह। प्राङ्म
हाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविः॥ सूत्रं॥ महाव्याहृतिभ्यः प्राक् पूर्वं स्विष्टकृद्यागो भवति। चेद्यदि आज्यात्सका

गृ॰ सू॰
भा॰ ह॰
२०

भ्राता शमीपलाशमिश्रांल्लाजान् शमीपत्रयुक्तान् अष्टानि धान्यानि अंजलिना कृत्वा वध्वा अंजलौ आवपतिनिक्षि
पति॥ तां जुहोति सा च तान् अंजलिस्थान् लाजान् संहतेन मिलितेन अंजलिना जुहोति विवाहाग्नौ प्रक्षिपतीति तिष्ठती
ऊर्ध्वा॥ अर्यमणं देवमित्यादि इयठं स्वाहेत्यंतं सूत्रं॥ अर्यमणं देवमिति प्रथमं॥ इयं नार्युपब्रूत इति द्वितीयं॥ इमांल्ला
जानिति तृतीयं॥ अथास्यै दक्षिणं हस्तं गृह्णाति सांगुष्ठं गृभ्णामि ते सौभगत्वायेत्यादि शृणुयाम शरदः शतमित्यं
तं सूत्रं॰ अथ लाजाहोमानंतरं अस्यै अस्याः कुमार्याः दक्षिणं हस्तं गृह्णाति स्वदक्षिणहस्तेन आदत्ते॥ कीदृशं ह
स्तं सांगुष्ठं अंगुष्ठेन सहितं इति हरिहरभाष्ये प्रथमकांडे षष्ठी कंडिका ६ अथैनामश्मानमारोहयत्युत्तरतोऽग्नेर्दक्षिणपादे
नारोह ममित्यादि एतनायत इत्यंतं सूत्रं॰ अथ पाणिग्रहणानंतरं एनां वधूं अश्मानं दृषदं उत्तरतोऽग्नेर्ध्रियमाणं द
क्षिणपादेन कृत्वा आरोहयति आरोहेममित्यादि एतनायत इति मंत्रेण। अथ गाथां गायतीति सूत्रं॰ अथ अश्मारोहणा
नंतरं गाथां गायति तां गाथामाह॥ सरस्वति प्रेदमवेत्यादि काउत्तमं यशः इत्यंतां॥ अथ परिक्रामतस्तुभ्यमग्न इति।
अथ गाथायां समाप्तायां अग्निं प्रदक्षिणेन परिक्रामतो वधूवरौ तत्र मंत्रः तुभ्यमग्रेपर्यवहन्नित्यादि कस्य प्रजया सहे
त्यंतस्य मंत्रस्य वरः पठितस्यांते। अत्र हस्तग्रहणादि परिक्रमणांतेषु कर्मसु वर एव मंत्रान् पठति। एवं द्विः पुनर्लाजादि सूत्रं ए

२०

28

ध्रोवध्रुवस्वाहा॥ सूत्रं॥ चित्तं चेत्येवमादीनां पदानां चतुर्थ्यंतानां केचिदिच्छंति तन्न संमतं। कुतः। नह्येतानि देवतापदानि
। किंतु मंत्रा एते। मंत्राश्च एते यथाम्नाता एव प्रयुज्यंते॥ अग्निर्भूतानामधिपतिः समावत्विंद्रो ज्येष्ठानां यमः पृथिव्या
वायुरंतरिक्षस्य सूर्यो दिवश्चंद्रमा नक्षत्राणां बृहस्पतिर्ब्रह्मणो मित्रः सत्यानां वरुणोपां समुद्रः स्रोत्यानामन्नं सा
म्राज्यानामधिपति तन्मावतु सोम ओषधीनां सविता प्रसवानां रुद्रः पशूनां त्वष्टा रूपाणां विष्णुः पर्वतानां मरुतो ग
णानामधिपतयस्ते मावंतु पितरः पितामहाः परेवरे तताः स्ततामहाः॥ इह मावंत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशि
ष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहेति सूत्रं॥ अभ्यातानामसंज्ञका ह्येते अष्टादश मंत्राः सर्वत्रानु
षजति॥ अग्निर्भूतानामित्यादिषु पितरः पितामहा इत्यंतेष्वष्टादशसु मंत्रेषु प्रतिमंत्रं यथालिंगं यथावचनं समा
वत्वित्यादि देवहूत्यां स्वाहेत्यंतं वाक्यैकदेशं अनुषजति संयुनक्ति। अग्निरैत्वित्यादि परं मृत्यवितिचैके प्राशनांते
सूत्रं॥ अग्निरैत्वित्यादिकाः परं मृत्यवित्यंताः पंचमंत्राः परं मृत्यवितिच जुहुयात्॥ एके आचार्याः परं मृत्यवित्ये
तामाहुतिं प्राशनांते संस्रवप्राशनांते जुहुयादितीच्छंति उदकस्पर्शः॥ इति हरिहरभाष्ये प्रथमकांडे पंचमी कंडिका
॥५॥ कुमार्या भ्राता शमीपलाशमिश्रांल्लाजानंजलिनांजलावावपति तां जुहोति संहतेन तिष्ठती सूत्रं॥ कुमार्याः कन्यायाः

थेक्रमोवलीयानितिन्यायात्॥ एकमिषइत्यादिभिः सप्तभिर्मंत्रैः। तद्यथा॥ एकमिषेविष्णुस्त्वानयत्वितिवरेणोक्तेमं
त्रेवधूरेकंपदंउदग्गच्छतितथाद्वेऊर्जेविष्णुस्त्वानयत्विति मंत्रांतेद्वितीयं॥ त्रीणिरायस्पोषायविष्णुस्त्वानयत्वित्यु
क्तेतृतीयं। चत्वारिमायोभवायविष्णुस्त्वानयत्वित्युक्तेचतुर्थं। पंचपशुभ्योविष्णुस्त्वानयत्वित्युक्तेपंचमं। षडृतुभ्यो
विष्णुस्त्वानयत्वित्युक्तेषष्ठं॥ सखेसप्तपदाभवसामामनुव्रताभवविष्णुस्त्वानयत्वित्युक्तेसप्तमं॥ विष्णुस्त्वानयत्वित्ये
तावन्मंत्रभागंसर्वत्रएकमिषइत्यादिषुसर्वेषुअनुषजतिसंबध्नाति॥ निष्क्रमणप्रभृत्युदकुंभंस्कंधेकृत्वादक्षिणतोमौ
वाग्यतःस्थितोभवत्युत्तरतएकेषांसूत्रं॥ निष्क्रमणप्रभृतिपित्राप्रत्तामादायगृहीत्वानिष्क्रामतीत्यादितआरभ्यक
श्चित्पुरुषोजलपूर्णंकलशंस्कंधेनिधायवधूवरयोःपृष्ठतआगत्यअग्नेर्दक्षिणस्यांदिशिमौनीस्थितआसीत्केषांचि
न्मतेउत्तरतः ततएनांमूर्द्धन्यभिषिंचतीत्यादिआपोहिष्ठेतिचतिसृभिः इत्येतावत्सूत्रं॥ ततस्तस्मात्स्कंधस्थिता
दुदकुंभात्॥ आचार्यादाम्रादिपल्लवसहितेनहस्तेनजलमादायएनांवधूंमूर्धनिशिरस्यभिषिंचतिवरः। आपःशिवा
इत्यादिनाभेषजमित्यंतेनमंत्रेणपुनस्तथैवोदकमादायआपोहिष्ठेत्यादिआपोजनयथाचनइत्यंताभिस्तिसृभिर्ऋ
ग्भिःअभिषिंचतीतिचकारादनुषज्यते॥ अथैनां सूर्यमुदीक्षयतितच्चक्षुरितिसूत्रं। अथअभिषेकादुपरिसूर्यमुदीक्षस्वेति

वमुना[illegible]रोरंजलिः·वारद्वयंअपरंपुनरपिलाजाःकुमार्याभ्रातेत्यारभ्यपरिक्रमणांतंकर्मभवति॥चतुर्थःशूर्पे
कुष्टयासर्वांल्लाजानावपतिभगायस्वाहेति सूत्रं॰ ततः तृतीयपरिक्रमणानंतरंकुमार्याभ्राताशूर्पपुटकुष्टयाशूर्प
स्यकोणेनसर्वान्यावच्छूर्पेवशिष्टान्लाजान्कुमार्याअंजलौआवपतिनिक्षिपति।तान्लाजान्तिष्ठंतीकुमारीभगा
यस्वाहेतिमंत्रेणचतुर्थंजुहोतिततःसमाचारात्तूष्णीं चतुर्थंपरिक्रमणंवधूवरौकुरुतः॥नेतरथावृत्ति॥इतरथावृत्तेःका
रणस्यअवायस्यअभावात्॥ब्रह्माग्न्योरंतरागमनंहिइतरथावृत्तिकारणं॥कुतइतिचेत्हविःपात्रस्याग्न्यृत्विजांपू
र्वपूर्वंमंतरमृत्विजांचयथापूर्वमितिपरिभाषासूत्रात्तेनपरिक्रमणंकुर्वंतौवधूवरौब्रह्माग्न्योर्मध्येनगच्छेतां॥त्रिःपरि
णीतांप्राजापत्यंहुत्वा सूत्रं॰ पूर्ववदुपविश्यप्रजापतयेस्वाहेतिब्रह्मान्वारब्धेहुत्वाइदंप्रजापतयेइतित्यागंविधाय।
इतिहरिहरभाष्येप्र॰का॰सप्तमीकंडिका ७ अथैनामुदीचींसप्तपदानिप्रक्रामयत्येकमिषेद्वेऊर्जेत्रीणिरायस्पोषाय
चत्वारिमायोभवायपंचपशुभ्यःषडृतुभ्यःसखेसप्तपदाभवसामामनुव्रताभवविष्णुस्त्वानयत्वितिसर्वत्रानुषजति
सूत्रं॰ अथप्राजापत्यहोमानंतरंएनांवधूंउदीचींउदङ्मुखींसप्तपदानिप्रक्रामयति॥सप्तप्रक्रमानदक्षिणपादेनका
रयतिउत्तरोत्तरंवरःकथंभूतांत्रिःपरिणीतांत्रीन्वारानग्नेःप्रादक्षिण्येनआनीतांइतिव्यवहितेनसंबंधःकृतःपाठक्रमार

30

गृ.सू.
भा.ह.
२२

31

णेपूर्णपात्रवरयोरन्यतरंदक्षिणात्वेनदत्त्वास्वकीयाचार्यायब्राह्मणः परितोताग्रांवरंददाति ॥ क्षत्रियश्चेद्राष्ट्रंग्रामं
ददाति ॥ वैश्यश्चेदश्वं ॥ यस्यास्तुनभवेद्भ्रातानविज्ञायेतवापिता ॥ नोपयच्छेततांकन्यांपुत्रिकाधर्मशंकयाइतिम
नुवचनात् ॥ अभ्रातृमतीपरिणयनंप्रतिषिद्धं ॥ तदतिक्रम्ययदिकश्चित्तामुद्वहेत ॥ तदातस्याः पुत्रिकात्वदोषप
रिहारायचएकरथेनअधिकंगवांशतंतत्पित्रेदत्त्वाउद्वहेत् ॥ ग्रामवचनंकुर्युः । अत्रविवाहेग्रामशब्दवाच्यानांस्वकु
लवृद्धानांस्त्रीणांश्मशानेचवाक्यंकुर्युः । अंकुरार्पणहरिद्रास्नातचंदनादिधर्मप्रतिपादकं ॥ कस्माद्विवाहश्मशान
योर्ग्रामंस्वकुलवृद्धाःस्त्रियःप्रविशंतात्शास्त्रातिरिक्तंकर्तव्यमाचारंपृच्छेदितिवचनात् इतिस्मृतेः ॥ नैकवत्वंस्मृते
श्रुतेश्चाकासाश्रुतिः ॥ तस्मात्तयोर्ग्रामः प्रमाणमिति ॥ यतःस्वकुलवृद्धाःस्त्रियःपूर्वपुरुषानुष्ठीयमानंसदाचार
स्मरंतितस्मात्तयोः विवाहश्मशानयोः ग्रामः प्रमाणंसदाचारबोधकमित्यर्थः ॥ अस्तमितेध्रुवंदर्शयतिसूत्रं० दि
वाविवाहश्चेत्तदाअस्तमितेसूर्येअमुकिध्रुवमीक्षस्वइतिप्रैषेणवधूंध्रुवंतारकाविशेषंदर्शयति ॥ रात्रौचेद्विवाह
स्तदावरदानानंतरमेव । तद्यथा ॥ ध्रुवमसीत्यादिसंजीवशरदःशतमित्यंतंवरेणपठितेनमंत्रेणवधूर्ध्रुवमीक्षते ॥ सायदि
नपश्येत्पश्यामीत्येवब्रूयात्सूत्रं० सावधूः यदिध्रुवंनेक्षेततथापिपश्यामीत्येवंवदेत् । नविपरीतं ॥ त्रिरात्र

२२

प्रैषेणसूर्यंएनांवधूंवरउदीक्षयतिसूर्यस्यनिरीक्षणंकारयतीत्यर्थः॥साचवरप्रेषितासतीतच्चक्षुरितिमंत्रेणस्वयंप ठितेनसूर्यंनिरीक्षेतदिवाविवाहपक्षे। अथास्यैदक्षिणांसमधिहृदयमालभते ममव्रतेतइतिसूत्रं अथसूर्योदीक्ष णानंतरं अस्यैइतिषष्ठ्यर्थेचतुर्थी। अस्यावध्वाः दक्षिणांसमधिदक्षिणस्यस्कंधस्योपरिहस्तंनीत्वातस्याः हृदयमाल भतेवरः स्पृशति॥ममव्रतेतेहृदयंदधामीत्यादिनानियुनक्तुमह्यमित्यंतेनमंत्रेण॥ अथैनामभिमंत्रयतेसुमंगलीरित्य दिविपरेतनेत्यंतेसूत्रं॥ अथहृदयालंभनानंतरंएनांवधूंवरोभिमंत्रयते॥सुमंगलीरित्यादिनामंत्रेण॥ अत्रशिष्टस माचारात॥उत्तरतआयतनाहिस्त्रीतिश्रुतिलिंगाच्चवधूंवरस्यवामभागेउपवेशयति। तांदृढपुरुषउन्मथ्यप्राग्वोद ग्वानुगुप्तआगारआनडुहेरोहितेचर्मण्युपवेशयति। इहगावइतिसूत्रं॥ ततः तांवधूंदृढपुरुषः बलवानकश्चित्पु मानउन्मथ्यउत्थाप्यप्राकपूर्वस्यांदिशिउदकउदीच्यांवादिशिपूर्वकल्पितेअनुगुप्तेसर्वतः परिवृतेआगारेगृहेत त्रचपूर्वमास्तीर्णेआनडुहेआर्षभेरोहितेलोहितवर्णेचर्मणिअजिनेप्राग्ग्रीवेउत्तरलोम्निउपवेशयतिइहगावइत्या दिनाविघ्नीदंत्विति अस्यमंत्रस्यपाठांते॥ केचनजामातैवदृढपुरुषइत्याहुः॥ तन्मतेजामातैववधूमुत्क्षिप्यमंत्र मुक्त्वाचर्मण्युपवेशयति॥ ततआगत्ययथास्थानमुपविश्यब्रह्मान्वारब्धःस्विष्टकृद्धोमंविधायसंस्रवंप्राश्यब्रह्म

गृ॰ सू॰
भा॰ हृ॰
२३

33

धुपर्कंतत्समीपमानयंति॥ अथार्चयिता॥ एवंविष्टरमादायतिष्ठति॥ अन्यःकश्चिद्ब्राह्मणोविष्टरोविष्टरोविष्टरइति
श्रावयति॥ प्रतिगृह्यतामित्यर्घ्यस्यहस्तयोर्ददाति॥ अर्घ्यंचवर्ष्मोऽस्मिसमानानामुद्यतामिवसूर्यः॥ इमंतमभिति
ष्ठामियोमाकश्चाभिदासतीत्यनेनमंत्रेणविष्टरमासनेनिधायतदुपर्युपविशति। ततोऽन्येनपाद्यंपाद्यंपाद्यमितिश्राविते
पादार्थमुदकमर्चयिताऽर्घ्यायप्रतिगृह्यतामित्युक्त्वासमर्पयति॥ अथार्घ्यस्तत्पात्रंभूमौनिधायांजलिनाजलमा
दायविराजोदोहोऽसिविराजोदोहमशीयमयिपाद्यायैविराजोदोह इतिमंत्रेणब्राह्मणोदक्षिणंपादंप्रक्षाल्यतथैववामंप्र
क्षालयति॥ क्षत्रियादयस्त्वन्यंसव्यंप्रक्षाल्यअनेनैवविधिनादक्षिणंप्रक्षालयंति॥ ततःपुनर्विष्टरोविष्टरोविष्टरइत्यने
नश्रावितेप्रतिगृह्यतामितियजमानदत्तंविष्टरंप्रतिगृह्यवर्ष्मोऽस्मीतिमंत्रेणपादयोरधस्तान्निदधाति। ततोऽर्घोऽर्घोऽर्घइत्यने
नश्रावितेऽर्चयिताप्रतिगृह्यतामित्युक्त्वाऽर्घ्यायार्घ्यंआपस्थयुष्माभिःसर्वान्कामानवाप्नवानीतिमंत्रंपठितवतेप्रयच्छति
अर्घ्यंचार्घ्यंप्रतिगृह्यमूर्द्धपर्यंतमानीयसमुद्रंवःप्रहिणोमिस्वांयोनिमभिगच्छत॥ अरिष्टास्माकंवीरामापरासेचिमत्य
यइत्यनेनमंत्रेणनिनयन्नभिमंत्रयते॥ अथाचमनीयमाचमनीयमाचमनीयमित्यन्येनश्राविते अर्चयिताऽर्घ्यायप्रतिगृह्य
तामितिउक्त्वाआचमनीयंप्रयच्छति। अर्घ्यश्चप्रतिगृह्यआमागन्यशसासंसृजवर्चसा॥ तंमाकुरुप्रियंप्रजानामधिप

२३

मक्षारालवणाशिनौस्यातामधःशय्यातांसूत्रं॰ विवाहदिनमारभ्यत्रिरात्रंत्रीणिअहोरात्राणिअक्षारालवणाशिनौ।अ
क्षारंचालवणंच अक्षारालवणंततअश्नीतइत्येवंशीलौअक्षारालवणाशिनौस्यातांभवेतां॥अधःआस्तृतभूमौनख
ट्वायांशयीयातां॥संवत्सरंनमिथुनमुपेयातांद्वादशरात्रंषड्रात्रंत्रिरात्रमन्ततःसूत्रं॰संवत्सरंवर्षंयावत्मिथुनंअभिग
मनंनोपयातांनोपगछेयातां॥अथवाद्वादशरात्रं॥अथवाषड्रात्रं॥यद्वात्रिरात्रं॥अंततःसंवत्सरादिपक्षाणामंतेत्रि
रात्रमित्यर्थः॥संवत्सरादिविकल्पाःसुशक्त्यपेक्षयाव्यवस्थिताज्ञेयाः॥संवत्सरादिपक्षाशक्तौत्रिरात्रपक्षाश्रयणेपि
चतुर्थीकर्मोनंतरंपंचम्यादिरात्राविभिगमनंचतुर्थीकर्मणःप्राक्तस्याभार्यात्वमेवनसंपन्नंविवाहैकदेशत्वाच्चतुर्थी
कर्मणः॥इतिसूत्रार्थः॥॰अथपद्धतिः॥अथप्रकृतंविवाहकर्माह॥तत्रपुराणेहनिमातृपूजापूर्वकंवरस्यपिता
स्वपितृभ्यःपुत्रविवाहनिमित्तंनांदीमुखंश्राद्धंविधायविवाल्यंपुत्रंमंगलतूर्यवेदघोषेणकन्यापितृगृहमानयतिक
न्यापिताचमातृपूजापूर्वकंकन्याविवाहनिमित्तकंस्वपितृभ्योनांदीमुखंश्राद्धंविधायमंडपद्वारमागतंवरंअभ्युत्था
नादिभिःप्रतीक्ष्यमधुपर्केणार्चयेत्॥तद्यथा॥अर्चयिताआसनमानाय्यतस्यासनस्यपश्चात्तिष्ठंतंअर्घ्यंप्रति
साधुभवानास्तामर्चयिष्यामोभवंतं॥इतिब्रवीति॥तत्रअर्चकपुरुषाःविष्टरंपद्यंपादार्थमुदकंअर्घमाचमनीयंम

लभेत॥ एवमाचांतोदकायखड्गहस्तोयजमानः॥ गौर्गौर्गौरालभ्यतामितिब्रूयात्॥ ततोर्घ्यैः मातारुद्राणांदुहिता
वसूनांस्वसादित्यानाममृतस्यनाभिः॥ प्रनुवोचंचिकितुषेजनायमागामनागामदितिंवधिष्ट॥ ममचामुक
शर्मणोयजमानस्यचपाप्मानंहनोमीतिगवालंभपक्षेप्रतिब्रूयात्॥ उत्सर्गपक्षेतुमातारुद्राणामित्यादिपाप्माह
तॐमित्युपांशूक्त्वाउत्सृजततृणान्यत्त्वित्युच्चैःप्रतिब्रूयात॥ ततोवरोवहिः शालायामीशान्यांदिशिचतुर्हस्ता
यांसिकतावछन्नायांवेदिकायांलौकिकंनिर्मथ्यंवाग्निंस्थापयित्वापश्चादग्नेः तृणपूलकंकटंवास्थापयेत्॥ अ
थकन्यापितावस्त्रचतुष्टयंवरायप्रयच्छति॥ वरस्तेषुमध्येजरांगच्छपरिधत्स्ववासोभवाकृष्टीनामभिशस्तिपावा॥
शतंचजीवशरदः सुवर्चारयिंचपुत्राननुसंव्ययस्वायुष्मतीदंपरिधत्स्ववासइत्यनेनमंत्रेणएकंकुमारींपरिधापय
ति॥ द्वितीयंयाअकृंतन्नवयंयाअतन्वत॥ याश्चदेवीस्तंतूनभितोततंथतास्त्वादेवीर्जरसेसंव्ययस्वायुष्मतीदंपरि
धत्स्ववासइतिमंत्रेण॥ स्वयंचपरिधास्येयशोधास्येदीर्घायुत्वायजरदष्टिरस्मि॥ शतंचजीवामिशरदःपुरूचीरायस्पो
षमभिसंव्ययिष्यइतिमंत्रेणएकंपरिधत्ते॥ यशसामाद्यावापृथिवीयशसेंद्राबृहस्पती॥ यशोभगश्चमाविदद्यशोमाप्रति
पद्यतामितिद्वितीयं॥ अथकुमार्याःपितारएनौपरिहिताहतसदृशवस्त्रौकन्यावरौसमंजयति॥ परस्परंसमंजथामितिप्रे

तिरश्चीनामरिष्टिंतनूनामितिमंत्रेणसकृदाचम्यस्मार्तेमाचमनंकरोति॥ अथमधुपर्कोमधुपर्कोमधुपर्कइत्यन्येनोक्तेय
जमानहस्तस्थितमुद्घाटितंमधुपर्कंमित्रस्यत्वाचक्षुषाप्रतीक्षइतिमंत्रेणप्रतीक्ष्यदेवस्यत्वासवितुःप्रसवेऽश्विनोर्बाहुभ्यां
पूष्णोहस्ताभ्यांप्रतिगृह्णामीतिमंत्रेणअंजलिनाप्रतिगृह्यसव्येपाणौनिधायदक्षिणस्यपाणेरुपकनिष्ठिकयांगुल्या
नमःश्यावास्यायान्नशनेयतआविद्धंतत्तेनिष्कृंतामीतिमंत्रेणसकृदालोड्यानुष्ठांसकृत्अनामिकांगुष्ठाभ्यामादायव
हिर्निक्षिप्यपुनरेवंद्विवारमालोडनंनिरूक्षणंचकरोति॥ ततोयन्मधुनोमधव्यंपरमंरूपमन्नाद्यं॥तेनाहंमधुनोमधव्ये
नपरमेणरूपेणान्नाद्येनपरमोमधव्योन्नादोसानीतिमंत्रेणअनामिकांगुष्ठाभ्यामादायत्रिःप्राश्नाति॥ मधुवाताऋता
यतइत्यादिभिस्तिसृभिर्ऋग्भिःप्रत्यृचंत्रिःप्राश्नातिवा॥ प्राशितशेषंपुत्रायशिष्यायवादद्यात्तत्सर्वंवाभक्षयेत॥ पूर्व
स्यांदिशिअसंचरेप्रदेशेवाक्षिपेत॥ ततःस्मार्त्तेनविधिनाचम्यवाङ्मआस्येस्त्वितिकराग्रेणमुखंस्पृशति॥ नसोर्मे
प्राणोस्त्विति दक्षिणवामेनासारंध्रे॥ अक्ष्णोर्मेचक्षुरस्त्वितिदक्षिणोत्तरेचक्षुषी॥ कर्णयोर्मेश्रोत्रमस्त्विति दक्षिणं
श्रोत्रंसंस्पृश्यपुनःकर्णयोर्मेश्रोत्रमस्त्वितिवामं॥ एवंबाह्वोर्मेबलमस्त्वितिदक्षिणोत्तरौबाहू॥ ऊर्वोर्मेओजोस्त्व
तियुगपदूरूअरिष्टानिमेंगानितनूस्तन्वामेसहसंत्वितिशिरःप्रभृतीनिपादांतानिसर्वाण्यंगान्युभाभ्यांहस्ताभ्यामा

36

ष्टुनंचदक्षिणांदद्यात्॥ अत्रआचारात् अन्यदपियौतकत्वेनसुवर्णरजतताम्रगोमहिष्यश्वग्रामादिकन्या
पितायथासंभवंददाति॥ अन्येपिबांधवादयः यथासंभवंयौतकंप्रयच्छंति॥ केचनयौतकंहोमांतेप्रयच्छंति॥ अ
त्रदेशाचारतोव्यवस्था॥ एवंपित्रादत्तांगृहीत्वाप्रतिग्रहस्थानान्निष्क्रामति। यदैषिमनसादूरंदिशोनुपवमानोवा
हिरण्यपर्णोवैकर्णः सत्वामन्मनसांकरोतुअसौइत्यनेनमंत्रेण॥ अथनिष्क्रमणप्रभृत्येकोजलपूर्णकलशंस्कं
धेनिधायदक्षिणतोग्नेर्वाग्यतःऊर्ध्वस्तिष्ठतिउत्तरतोवाअभिषेकपर्यंतं॥ अथैनौवधूवरौअग्निसमीपमागतौ
कन्यायाःपितापरस्परंसमीक्षेथामितिप्रैषेणसमीक्षयति॥ ततःप्रेषितोवरःसमीक्षमाणांकन्यांसमीक्षमाणः॥
अघोरचक्षुरपतिघ्न्येधिशिवापशुभ्यः सुमनाःसुवर्चाः वीरसूर्देवकामास्योनाशन्नोभवद्विपदेशंचतुष्पदे॥ सोमः
प्रथमोविविदेगंधर्वोविविदउत्तरः॥ तृतीयोग्निष्टेपतिस्तुरीयस्तेमनुष्यजाः सोमोददद्गंधर्वायगंधर्वोदददग्नये॥ र
यिंचपुत्रांश्चादादग्निर्मह्यमथोइमां॥ सानःपूषाःशिवतमामैरयसानऊरूउशतीविहर॥ यस्यामुशंतःप्रहरामशेपं
यस्यामुकामाबहवोनिविष्ट्यै॥ इत्यादिकान्चतुरोमंत्रान्पठति॥ ततःप्रदक्षिणमग्निंपरीत्यपश्चादग्नेःपूर्वस्यापि
ततेजनीकटयोरन्यतरेदक्षिणंपादमग्रेकृत्वोपविशतिवरः॥ तस्यदक्षिणतोवधूः॥ ततोब्रह्मोपवेशनादिचरुव

षेण ॥ ततो वरः कन्यास्तुमुखीभूतः समंजंतु विश्वेदेवाः समापो हृदयानि नौ। संमातरिश्वा संधाता समुदेष्ट्री दधातु नौ
इत्यादिकं मंत्रं पठति ॥ अथ कन्यादानं करोति पित्रादिः कन्यादानाधिकारी ॥ तत्र वाक्यं ॥ अमुकगोत्रस्यामुकप्र
वरस्यामुकशर्मणः प्रपौत्राय ॥ अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्राय ॥ अमुकगोत्रस्यामुकप्रव
रस्यामुकशर्मणः पुत्राय इति वरपक्षे ॥ अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्रीं ॥ अमुकगोत्रस्या
मुकप्रवरस्यामुकशर्मणः पौत्रीं ॥ अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रीं इति कन्यापक्षे। एवमेव पुनर्वा
रत्रयमभिहिते ॥ अथ कन्यापिता कुशजलाक्षतपाणिः उदङ्मुखोपविष्टः प्राङ्मुखोपविष्टाय वराय प्रत्यङ्मुखोप
विष्टां कन्यां अमुकगोत्राय अमुकप्रवराय अमुकशर्मणे ब्राह्मणाय इति ब्राह्मणवरपक्षे इतरवरपक्षे वर्मणे अमुक
गुप्ताय अमुकदासायेति विशेषः ॥ अमुकगोत्रां अमुकप्रवरां अमुकनाम्नीं इमां कन्यां सालंकारां प्रजापतिदैवतां पुरा
णोक्तशतगुणीकृतज्योतिष्टोमातिरात्रसमफलप्राप्तिकामो कन्यादानफलप्राप्तिकामो वा भार्यात्वेन तुभ्यमहं संप्रद
दे इत्युक्त्वा सकुशाक्षतजलं कन्यादक्षिणहस्तं वरदक्षिणहस्ते दद्यात् वरश्च द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णात्वित्यने
न मंत्रेण तां प्रतिगृह्णीयात् ॥ अथ कोदादिति कामस्तुतिं पठेत् ॥ ततः कृतैतत्कन्यादानप्रतिष्ठासिद्ध्यर्थं स्वर्णं गोमि

गृ॰ सू॰
भा॰ ह॰
२६

यथा।ऋताषाडृतधामाग्निर्गंधर्वः सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्।इदमृताषाहेऋतधाम्नेग्नयेगंधर्वाय।
ऋताषाडृतधामाग्निर्गंधर्वस्तस्यौषधयोप्सरसोमुदोनामताभ्यः स्वाहा।इदमोषधिभ्योप्सरोभ्योमुद्भ्यः।संहितोविश्व
सामासूर्योगंधर्वः सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्।इदंसंहितायविश्वसाम्नेसूर्यायगंधर्वाय।संहितोविश्वसामा
सूर्योगंधर्वस्तस्यमरीचयोप्सरसआयुवोनामताभ्यः स्वाहा।इदंमरीचिभ्योप्सरोभ्यआयुभ्यः॥सुषुम्णः सूर्यरश्मिश्चंद्र
मागंधर्वः।सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्।इदंसुषुम्णायसूर्यरश्मयेचंद्रमसेगंधर्वाय।सुषुम्णः सूर्यरश्मिश्चंद्र
मागंधर्वस्तस्यनक्षत्राण्यप्सरसोभेकुरयोनामताभ्यः स्वाहा।इदंनक्षत्रेभ्योप्सरोभ्योभेकुरिभ्यः।इषिरोविश्वव्यचावा
तोगंधर्वः सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्॥इदमिषिरायविश्वव्यचसेवातायगंधर्वाय।इषिरोविश्वव्यचावा
तोगंधर्वस्तस्यापोअप्सरसऊर्जोनामताभ्यः स्वाहा।इदमद्भ्योप्सरोभ्यऊर्ग्भ्यः।भुज्युः सुपर्णोयज्ञोगंधर्वः सनइदं
ब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्।इदंभुज्यवेसुपर्णाययज्ञायगंधर्वाय।भुज्युः सुपर्णोयज्ञोगंधर्वस्तस्यदक्षिणाअ
प्सरसस्तावानामताभ्यः स्वाहा।इदंदक्षिणाभ्योप्सरोभ्यस्तावाभ्यः।प्रजापतिर्विश्वकर्मामनोगंधर्वः सनइदंब्रह्म
क्षत्रंपातुतस्मैस्वाहावाट्।इदंप्रजापतयेविश्वकर्मणेमनसेगंधर्वाय।प्रजापतिर्विश्वकर्मामनोगंधर्वस्तस्यऋक्सामा

३९

२६

जेपर्युक्षणं तं कुर्यात् ॥ इयांस्तु विशेषः आचार्याय वरं दद्यं इत्येतावंति वस्तूनि उपकल्पयेत् । न प्रोक्षेत् ॥ ततः स्रु
वमादाय दक्षिणं जान्वाच्य आघारावाज्यभागौ महाव्याहृति सर्वप्रायश्चित्तं ब्रह्मान्वारब्धे हुत्वा राष्ट्रभृज्जयाभ्याता
नाग्निरैलिन्यादिकान्परं मृत्यवित्यंतान् ॥ अनन्वारब्धो जुहुयात् ॥ प्राशनांते वा परं मृत्यविति ॥ तद्यथा ॥ ॐ प्रजापत
ये स्वाहा ॥ इदं प्रजापतये ॥ इंद्राय स्वाहा । इदमिंद्राय । अग्नये स्वाहा । इदमग्नये । सोमाय स्वाहा । इदं सोमाय । ॐ भूः
स्वाहा इदमग्नये । भुवः स्वाहा इदं वायवे । ॐ स्वः स्वाहा इदं सूर्याय । त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासि सी
ष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्स्वाहा । इदमग्नीवरुणाभ्यां । स त्वन्नो अग्नेऽवमो
भवोती नेदिष्ठो अस्या उषसो व्युष्टौ । अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा ॥ इदमग्नीवरु
णाभ्यां । अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमया असि । अयानो यज्ञं वहास्ययानो धेहि भेषजं स्वाहा । इदम
ग्नये । ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महांतः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुंचंतु मरुतः स्व
र्काः स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ॥ उदुत्तमं वरुण पाशमस्मदवाधमं वि म
ध्यमं श्रथाय । अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा । इदं वरुणाय । ब्रह्मान्वारब्धो हुत्वा ततो राष्ट्रभृतो

५०

वंसमावत्वस्मिन्नित्यादिवक्ष्यमाणेषु सर्वमंत्रेष्वनुषंगः। यमः पृथिव्या अधिपतिः। इदं यमाय पृथिव्या अधिपत
ये। वायुरंतरिक्षस्याधिपतिः। इदं वायवेंतरिक्षस्याधिपतये। सूर्यो दिवोधिपतिः इदं सूर्याय दिवोधिपतये। चंद्रमा
नक्षत्राणामधिपतिः। इदं चंद्रमसे नक्षत्राणामधिपतये। बृहस्पतिर्ब्रह्मणोधिपतिः इदं बृहस्पतये ब्रह्मणोधिपत
ये॥ मित्रः सत्यानामधिपतिः। इदं मित्राय सत्यानामधिपतये। वरुणोपामधिपतिः। इदं वरुणायापामधिपतये
। समुद्रः स्रोत्यानामधिपतिः। इदं समुद्राय स्रोत्यानामधिपतये। अन्नं साम्राज्यानामधिपति तन्मावत्वस्मिन इ
त्यादि। इदमन्नाय साम्राज्यानामधिपतये। सोम ओषधीनामधिपतिः। इदं सोमायौषधीनामधिपतये। सविता प्रस
वानामधिपतिः इदं सवित्रे प्रसवानामधिपतये। रुद्रः पशूनामधिपतिः॥ इदं रुद्राय पशूनामधिपतये। उदकस्पर्शनं।
त्वष्टा रूपाणामधिपतिः। इदं त्वष्ट्रे रूपाणामधिपतये। विष्णुः पर्वतानामधिपतिः। इदं विष्णवे पर्वतानामधिपत
ये। मरुतो गणानामधिपतयस्ते मावंत्वस्मिन्॥ इदं मरुद्भ्यो गणानामधिपतिभ्यः॥ पितरः पितामहाः परेव
रेस्ततास्ततामहाः इह मावंत्वस्मिन ब्रह्मणीत्यादि समानं। इदं पितृभ्यः पितामहेभ्यः परेभ्योवरेभ्यस्ततेभ्यस्त
तामहेभ्यः॥ उदकस्पर्शनं॥ एतेष्टादशमंत्रा अभ्यातानसंज्ञिकाः॥ अग्निर्वै प्रथमो देवतानां सोस्मिप्र।

न्यप्सरसएष्टयोनामताभ्यः स्वाहा। इदमृक्सामभ्योप्सरोभ्य एष्टिभ्यः। केचिदन्यथामंत्रप्रयोगंकुर्वंतितन्नदर्श्यते
ऋताषाडृतधामाग्निर्गंधर्वः सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्। इतिप्रथमः। तस्यौषधयोप्सरसोमुदोनामताभ्यः
स्वाहेतिद्वितीयः। एवंसर्वेषुमंत्रेषु अस्मिन्नपिपक्षेत्यागाःकृतएव॥ अथजयाहोमः। चित्तंचस्वाहा इदंचित्ताय।
चित्तिश्चस्वाहा। इदंचित्त्यै। आकूतंचस्वाहा। इदमाकूताय॥ आकूतिश्चस्वाहा। इदमाकूत्यै। विज्ञातंचस्वाहा॥ इदं
विज्ञाताय। विज्ञातिश्चस्वाहा। इदंविज्ञात्यै। मनश्चस्वाहा। इदंमनसे शक्करीश्चस्वाहा इदं शक्करीभ्यः। दर्शश्चस्वाहा
इदंदर्शाय। पौर्णमासंचस्वाहा। इदंपौर्णमासाय। बृहच्चस्वाहा। इदंबृहते। रथंतरंचस्वाहा। इदंरथंतराय। चित्तंचेत्य
वमादीनांपरानांचतुर्थ्यंतानांप्रयोगंकेचिदिच्छंतितदसांप्रतं। कुतः। नत्त्वेतानिदेवतापदानिकिंतुमंत्राएते। मंत्राश्चय
थाम्नाताएवप्रयुज्यंते। प्रजापतिर्जयानिंद्रायवृष्णेप्रायच्छदुग्रः पृतनाजयेषु। तस्मैविशः समनमंतसर्वाः सउग्रः
सइहव्योबभूवस्वाहा। इदंप्रजापतयेजयानिंद्राय। अथाभ्यातानाः। अग्निर्भूतानामधिपतिः समावत्वस्मिन्
ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्यां स्वाहा इदमग्नयेभूतानामधिपतये।
इंद्रोज्येष्ठानामधिपतिः। समावत्वित्येवमादिस्वाहाकारांतोमंत्रः॥ इदमिंद्रायज्येष्ठानामधिपतये॥ ए

गृ॰ सू॰
भा॰ हा॰
२८

हा॥ इत्यनेनमंत्रेणसर्वांल्लाजानजुहोति। इदमग्नये। मंत्रत्रयंकन्यैवपठति। अथकुमार्याःसांगुष्ठंदक्षिणंहस्तंवरोगृह्णा
ति। गृभ्णामितेसौभगत्वायहस्तंमयापत्याजरदष्टिर्यथासः। भगोअर्यमासवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः। अमो
ऽहमस्मिसात्वंसात्वमस्यमोऽहं। सामाहमस्म्यृक्त्वंद्यौरहंपृथिवीत्वंतावेहिविवहावहैसहरेतोदधावहै। प्रजांप्र
जनयावहैपुत्रानविंद्यावहैबहून्तेसंतुजरदष्टयःसंप्रियौरोचिष्णूसुमनस्यमानौ। पश्येमशरदःशतंजीवेमशरदःश
तंशृणुयामशरदःशतमित्यंतेनमंत्रसंदर्भेण। अथकुमार्याःदक्षिणंपादंस्वदक्षिणहस्तेनगृहीत्वारोहेममश्मानम
श्मेवत्वंस्थिराभव। अभितिष्ठपृतन्यतोऽवबाधस्वपृतनायतइत्यनेनमंत्रेण। अग्नेरुत्तरतोऽवस्थितस्याश्मनःउपरि
वरःकरोति। अथाश्मन्यारूढायांकुमार्यांवरोगाथांगायति सरस्वतिप्रेदमवसुभगेवाजिनीवति। यांत्वाविश्वस्यभू
तस्यप्रजायामस्याग्रतः। यस्यांभूतंसमभवद्यस्यांविश्वमिदंजगत् तामद्यगाथांगास्यामियास्त्रीणामुत्तमंयश
इत्यंतां। अथवधूवरौ प्रदक्षिणमग्निंपरिक्रामतः तुभ्यमग्रेपर्यवहन्सूर्यांवहतुनासह। पुनःपतिभ्योजायांदाअग्नेप्रजया
सह। इत्यंतस्यमंत्रस्यवरपठितस्यांते। एवंपुनर्वारद्वयंलाजावपनादिपरिक्रमणांतंकर्मनिर्विशेषंभवति। ततस्तृतीयपरिक्रम
णानंतरंकुमार्याभ्राताशूर्पकोणप्रदेशेनसर्वांल्लाजानकुमार्यंजलावावपति। तानतिष्ठंतीकुमारीभगायस्वाहेत्यनेनजुहोति

२८

43

जां मुंचतु मृत्युपाशात । तदयं राजा वरुणोनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात्स्वाहा । इदमग्नये । इमामग्नि
स्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः । अशून्योपस्था जीवतामस्तु माता पौत्रमानंदमभिविबुध्यतामियं
स्वाहा । इदमग्नये । स्वस्ति नो अग्ने दिवा पृथिव्या विश्वानि धेह्ययथा यजत्र । यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु
द्रविणं धेहि चित्रं स्वाहा । इदमग्नये । सुगं नु पंथां प्रदिशन्न एहि ज्योतिष्मद्ध्येह्यजरन्न आयुः ॥ अपैतु मृत्युरमृतं म
आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहा इदं वैवस्वताय । परं मृत्यो अनुपरेहि पंथां यस्ते अन्य इतरो देवयानात । चक्षु
ष्मते शृण्वते ते ब्रवीमि मानः प्रजां रीरिषो मोत वीरान्स्वाहा । इदं मृत्यवे । एकैकं संस्रवप्राशनांते जुहुयादितीछंति । उ
दकस्पर्शः कुमार्या भ्राता उपकल्पितान् शमीपलाशमिश्रान् लाजान् शूर्पेकृतान् स्वेनांजलिना गृहीत्वा कुमार्या अं
जलावावपति । तांल्लाजान् प्राङ्मुखी तिष्ठंती कुमारी सव्यहस्तसहितेन दक्षिणहस्तेन अंजलिना विग्राहं जुहोति अ
र्यमणं देवं कन्या अग्निमयक्षत । स नो अर्यमा देवः प्रेतो मुंचतु मा पतेस्वाहा इत्यनेन मंत्रेण तृतीयांशं जुहोति । इदमर्य
म्णे इयं नार्युपब्रूते लाजानावपंतिका । आयुष्मानस्तु मे पतिरेधंतां ज्ञातयो मम स्वाहा । इत्यनेन मंत्रेण अंजलिस्थिता
ल्लाजानामर्द्धं जुहोति । इदमग्नये । इमांल्लाजानावपाम्यग्नौ समृद्धिकरणं तव मम तुभ्यं च संवननं तदग्निरनुमन्यतामियं स्वा

रातवधूं वरस्य वामभागे उपवेशयंति। तस्याः सीमंते वरेण सिंदूरं स्थापयंति। अथाग्नेः प्रागुदग्वा पूर्वकल्पिते नुगुप्ते आगारे उ
त्तरलोम्नि प्राग्ग्रीवे आनडुहे चर्मणि तां वधूं दृढपुरुष उत्थाप्योपवेशयति इह गावो निषीदंत्विहाश्वा इह पुरुषा। इहो सहस्र
दक्षिणो यज्ञ इह पूषा निषीदंत्विति मंत्रेण। यद्वा जामाता दृढपुरुषस्तस्मिन् पक्षे वर उपवेशयति वधूं। ततश्चागत्य पूर्वव-
द्यथास्थानमुपविश्य ब्रह्मान्वारब्धो वरः अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते। इति स्विष्टकृद्धोमं विधाय संस्रवान्
प्राश्य ब्रह्मणे पूर्णपात्रं वरयोरन्यतरं दत्वा स्वकीयाचार्याय वरं ददाति। ब्राह्मणश्चेद्गां क्षत्रियश्चेद्ग्रामं वैश्यश्चेदश्वं। अन्य
च्च सुवर्णादिद्रव्यं यथाश्रद्धं यथाशक्ति ब्राह्मणेभ्यो दातुं संकल्पयेत्॥ ग्रामवचनं च कुर्युरित्यनेन शिष्टाचारप्राप्तं तिलककर
णाक्षतचंदनमंत्रविप्राशीर्वचनप्रतिष्ठामंत्रपाठादिकं यथाकुलं यथादेशसमाचारं तत्तत्क्रियमाणमनुमन्येर
न्। दिवा चेद्विवाहस्तदास्तमिते ध्रुवं दर्शयति वरो वध्वाः। रात्रौ चेद्धस्तदानानंतरमेव तद्यथा। ध्रुवमीक्षस्वेति प्रेषिता वधूः। ध्रुव
मसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि मह्यं त्वादाद्बृहस्पतिर्मया पत्या प्रजावती संजीव शरदः शतमित्यनेन मंत्रेण
वरेण नोक्ते ध्रुवमीक्षते। सा वधूर्यदि ध्रुवं न पश्येत्तथापि पश्यामीत्येवं वदेत्। विवाहादारभ्य त्रिरात्रं क्षारालव
णाशिनौ स्यातां जायापती अधः खट्वारहिते भूभागे आस्तृते शयीयातां त्रिरात्रमेव॥ संवत्सरं समग्रं मिथुनं।

इदंभगायाततः समाचारात्तूष्णींचतुर्थंपरिक्रमणंकुरुतः। नेतरयाहुतिमा। अथप्रजापतयेस्वाहेति। प्रज्ञान्वारब्धोहु
त्वाइदंप्रजापतयइतित्यागंविधाय। एनांवधूंउदीचींसप्तपदानिप्रक्रामयति। तद्यथा। एकमिषेविष्णुस्त्वानयत्विति
वरेणोक्तेमंत्रेवधूरेकंपदमुदग्दद्याति। द्वेऊर्जेविष्णुस्त्वानयत्विति द्वितीयं। त्रीणिरायस्पोषायविष्णुस्त्वानयत्विति
तृतीयं। चत्वारिमायोभवायविष्णुस्त्वानयत्विति चतुर्थं। पंचपशुभ्योविष्णुस्त्वानयत्वितिपंचमं। षड्ऋतुभ्योविष्णुस्त्वान
यत्वितिषष्ठं। सखेसप्तपदाभवसामामनुव्रताभवविष्णुस्त्वानयत्वितिसप्तमं। एवंवरएकैकंमंत्रंसमुच्चार्योच्चार्यसप्त
पदानिदापयत्युत्तरोत्तरंदक्षिणपादेन। अथवरःस्कंधस्थितादुदकुंभादुदकमादायवधूमूर्धन्यभिषिंचति। आपःशिवाःशि
वतमाःशांताःशांततमास्तास्तेकृण्वंतुभेषजमित्यनेनमंत्रेणपुनस्तथैवोदकमादायापोहिष्ठेतिप्रत्यृचंपठित्वातथै
वमूर्धन्यभिषिंचति। अथवरःसूर्यमुदीक्षस्वेतिवधूंप्रेषयति साचप्रेषितासतीसूर्यमुदीक्षते। तच्चक्षुरित्यादिशृणुया
मशरदःशतमित्यंतंमंत्रंस्वयंपठित्वा। अथवरोवध्वाःदक्षिणांसस्योपरिहस्तंनीत्वातस्याहृदयमालभते ममव्रतेतेहृदयंदधामि
ममचित्तमनुचित्तंतेअस्तुममवाचमेकमनाजुषस्वप्रजापतिष्ट्वानियुनक्तुमह्यमित्यनेनमंत्रेण। अथहृदयालंभनानंतरंवरोव
धूमभिमंत्रयते। सुमंगलीरियंवधूरिमांसमेतपश्यत। सौभाग्यमस्यैदत्वायाथास्तंविपरेतनेत्यनेनमंत्रेण। अत्रशिष्टसमाचा

गृ॰ सू॰
भा॰ ह॰
३०

नियमः तथा चैतैत्तिरीयब्राह्मणं प्रातःप्रातरनृतं ते वदंति पुरोदयाज्जुह्वति येऽग्निहोत्रं दिवाकीर्त्यमदिवाकीर्तयंतः।
सूर्यो ज्योतिर्नतदा ज्योतिरेषामिति अनुदितहोमनिंदार्थवादः पुरःसरं तस्मादुदिते होतव्यमिति उदितेहोमविधान
त होमद्रव्यनियममाह दध्ना तंडुलैरक्षतैर्वा जुहुयात॥ सूत्रं॰ दध्ना गव्येन तंडुलैर्व्रीहिमयैः अक्षतैः सत्वक्कैर्य
वैः वा विकल्पेन एतेषामन्यतमेनेत्यर्थः अग्नये स्वाहा प्रजापतये स्वाहेति सायं सूर्याय स्वाहा प्रजापतये स्वा
हेति प्रातः तत्र सायं अग्नये स्वाहेति पूर्वाहुतिं प्रजापतये स्वाहेत्युत्तरां जुहुयात सर्वत्र प्रजापतियाग उपांशुः स्वा
हाकारः आज्यस्यागस्य आघारे तु स्वाहांतोपि मानसः तथा सूर्याय स्वाहेति पूर्वां प्रजापतये स्वाहेत्युत्तरां प्रातः त्या
गास्तु प्रयोगे वक्ष्यंते ते च यजमानेन कार्याः कुतः प्रधानत्वात्प्रधानं स्वामी फलयोगादिति कात्यायनवचनात।
प्रधानं द्रव्यस्वत्वपरित्यागः ततश्च प्रवसता यजमानेन यथाकालं यथादैवतं शुचिना आचांतेन प्राङ्मुखोपवि
ष्टेन सर्वकर्मसु कर्तव्याः तत्र सायमादिप्रातरंतमेकं कर्म प्रचक्ष्यते इति वचनात सायंहोमद्रव्येणैव प्रातर्होमः
कर्तव्यः तथा येन होत्रा सायं हुतं तेनैव प्रातर्होतव्यम् येनारंभस्तेनैव समाप्तिरिति न्यायाच्च तथा दधितंडुलय
वानामलाभे श्यामाकनीवारवेणुयवकंदमूलफलजलसर्पिषां पूर्वपूर्वालाभे परं परं नित्यहोमाय ग्राह्यं कंद

३०

47

नोपेयातां। द्वादशरात्रं षड्रात्रं त्रिरात्रं चेति एते विकल्पा मिथुनकरणाशक्यपेक्षया। अत्र त्रिरात्रपक्षाश्रयणं चतुर्थ्यु
त्तरकालहेतुसूत्रव्याख्याने विहितं॥ इति विवाहकर्मपद्धतिः॥ उपयमनप्रभृत्यौपासनस्य परिचरणं सूत्रं॥ अथौपास
नस्यावसथ्यस्याग्नेः परिचरणं उपासनं व्याख्यास्यते। कथमुपयमनप्रभृति। उपयमनकुशादानमारभ्य कोर्थः। उपय
मनकुशानादाय समिधोभ्याधाय पर्युक्ष्य जुहुयादिति यावत्। तस्य कालनियममाह॥ अस्तमितानुदितयोः सूत्रं॥ अ
स्तमितश्च अनुदितश्च अस्तमितानुदितौ तयोस्तथा सूर्ययोः सूर्यस्यास्तमयानुदिताभ्यां उपलक्षितयोः कालयोरित्यर्थः
तत्रास्तमितलक्षणं छंदोगपरिशिष्टे। यावत्सम्यङ्न भाव्यंते नभस्यृक्षाणि सर्वतः न च लोहितिमापैति तावत्सायं तु हूय
ते। अनुदितस्य द्वैविध्यं अनुदितः समयाध्युषितश्च। तत्रानुदितः स्पष्टतारकोपलक्षितः। ततः परं उदयात्प्राक् सम
याध्युषितः। तथा च मनुः। उदिते नुदिते चैव समयाध्युषिते तथा। सर्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिरिति। संपूर्णादि
त्यमंडलदर्शनोपलक्षित उदितः। तत्र वाजसनेयिनां नियमेन अनुदितहोमः। सूर्याह वा अग्निहोत्रमित्यारभ्य तस्मा
दुदितहोमिनां विछिन्नमग्निहोत्रं मन्यामह इत्यंतेन श्रुतिसमाम्नायेन उदितहोमनिंदापूर्वकं अनुदितहोमस्य समर्थि
तत्वात्। छंदोगानामुदितानुदितयोर्विकल्पः। उदिते नुदिते चेति गोभिलवचनात्। आश्वलायनानां पुनरुदितहोम

यते सूत्रकारस्य शैलीयं विवाहात्प्राक् आवसथ्याधानकथनं यथा न चेच्छंकनीयं विवाहाग्निरेवावसथ्याग्निरितिय
स्स्याचार्याभिमतः तेनात्र होमानुविधानं कृतमिति विवाहाग्नेरौपासनत्वं कुतो वागतमिति चेत् वैवाहिकेग्नौ कुर्वीत
स्मार्तकर्म यथाविधि पंचयज्ञविधानं च पंक्तिं चान्वाहिकीं द्विज इति मनुवचनात् कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं
गृही दायकालाहृते वापि श्रौतं वैतानिकाग्निषु इति याज्ञवल्क्यवचनात् कृतविवाहस्य सभार्यस्यावसथ्याधानाधि
कारः आश्वलायनगोभिलादिगृह्यकारवचनाच्च तस्मादिदं संमतत्वात् विवाहसमनंतरमेव होमविधानाच्चाचार्यस्य वि
वाहहोमसाधनाग्निरेवौपासनः संमत इति तन्नोच्यते आश्वलायनगृह्यमते मन्वादिवचनं तु यथा गृह्यमाहितौपास
नाग्निपरं स्वस्वशाखाधर्मप्रतिपादनपरं वाजसनेयिनां पंचदशशाखाश्रयिणां मध्यंदिनकाण्वप्रभृतीनां च पारस्करा
चार्यस्य तु आवसथ्याधानप्रयोगं विवाहप्रयोगात्पृथगनुविदधते नैष पक्षः संमत इति गम्यते यदि विवाहाग्निरे
वौपासनाग्निरिति संमतः स्यात्तदावसथ्याधानं दारकाल इत्यादिना पृथक्प्रयोगमनुविदध्यात् विवाहहोमेनैव
आवसथ्याग्नेः सिद्धेः पृथक्प्रयोगारंभस्य वैयर्थ्यात् तस्मादन्यस्थानपाठेन दोषः इदं च औपासनपरिचरणे
सर्वदा न सक्तून् यतः ततो हस्तमितेग्निपरिचर्य दर्व्यापघातं सक्तून् सर्पेभ्यो बलिं हरेत् इति बलिहरणं ।

स्मरणादि। फलंत्वाम्नादि। अस्यैव कर्मणः कामसंयोगमाह। इमां सौमित्रावरुणावित्यादिना पुनः स्वाहेति। पूर्वां गर्भ
कामस्य त्वे। इमां सौमित्रावरुणावित्यादिना मंत्रेण गर्भकामा पत्नी पूर्वामाहुतिं जुहुयात्। अत्र पूर्वां गर्भकामेत्यस्य कोर्थः
किं नित्ययोर्द्वयोराहुत्योः प्रथमा पूर्वशब्देन विवक्षिता उत ताभ्यां पूर्वा पूर्वहोतव्या अन्यैव किंतावत्प्राप्तं ॥ अन्यैवेति। मं
त्रांतरेण देवतांतरहोमविधानात्। मंत्रस्य देवतायाश्च गुणत्वेन कर्मभेदकत्वात्। किंच द्वयोः प्रथमायाः पूर्वत्वे विवक्षिते नि
त्याग्नेयस्य सौर्यस्य च होमस्य च बाधः प्रसज्येत। अत्रोच्यते। सत्यं। मंत्रदेवतयोः कर्मभेदकत्वं पूर्वां गर्भकामेतीदं का
म्यं कर्म प्रकृतं नतु नित्यं काम्यं नित्यस्य बाधकं। उरुषार्थसमासतेः काम्यं नित्यस्य बाधकमिति न्यायात्। तस्मादग्नये
स्वाहा सूर्याय स्वाहेति नित्ये आहुती बाधित्वा इमां सौमित्रावरुणावित्यादि मंत्रविहिता पत्नीकर्तृका कर्मांतररूपा हि
काम्याहुतिः प्रवर्तते यथा गोदोहनेन पशुकामस्य प्रणयेदित्यत्र काम्यगोदोहनप्रणयनं नित्यं चमसं बाधित्वा प्रवर्तते अ
त्र कथं बाध्यबाधकभावः उच्यते नित्यं तावदफलं अकरणे प्रत्यवायजनकं काम्यं तु फलवत्तत्र फलवत् बलवत् अफलं
दुर्बलं बाधते अत्र यदि केचित्प्रत्यवतिष्ठेरन् अधानानुविधानानंतरं सायंप्रातर्होमानुविधाने कर्तव्ये आचार्येण केन हे
तुना अकृतं को दोष इति चेत् पराप्रकरणाम्नातं कथं षड्ध्याभवेतीत्यारभ्य तामुद्दुत्स्येत्यंतं विवाहप्रकरणं यतः तत्र समाधी

गृ॰ सू॰ भा॰ टी॰ ३२

णो॰ उमाः सावश्विनाधुवौ। उमानिदन्ध्र सूर्यश्च उमाः संवर्ततांमयिपुनः स्वाहेतिपूर्वोमाहुतिं पत्नीजुहोति उत्तरा
ईयजमानः। इदंमित्रावरुणाभ्यां अग्निभ्यामिन्द्राय सूर्यायच॥ इतिनित्यहोमविधिः॥ अथनैमित्तिकमुच्यते
राज्ञोऽक्षभेदेनड्विमोक्षे यानविपर्यासेन्यस्यांवाव्यापत्तौस्त्रियाश्चोद्वहने सूत्रं। राज्ञः प्रजापालनाधिकृतस्य यात्रादिप्र
स्थितस्य अक्षभेदेनरथावयवभंगेनड्विमोक्षेनड्स्य रथस्यविमोक्षे सन्नहनच्छेदेवा यानविपर्यासे यानस्यविपर्यासे अ
धोमुखादिभावेवा अन्यस्यांवाव्यापत्तौ अन्यस्मिन्वा अशुभसूचके निमित्ते। स्त्रियाश्चोद्वहने उद्वाहितायाः पूर्वंपतिगृह
नयनेच शत्रुरथाक्षभेदादिकनिमित्ते संजाते नैमित्तिकंप्रायश्चित्तरूपंकर्मोच्यते। कर्मोपपाते प्रायश्चित्तंतत्कालमिति
वचनात्। निमित्तसमनंतरमेव नैमित्तिकंकुर्यात्। तद्यथा। तमेवाग्निमुपसमाधायआज्यं संस्कृत्येहरतिरितिजुहो
तिनानामंत्राभ्यां॥ सूत्रं॥ तमेवेति यदिराज्ञोनिमित्तंतदाप्रास्थानिकंसेनाग्निंयदिस्त्रियाः निमित्तंतदावैदिकमग्निं
पंचभूसंस्कारान्कृत्वा उपसमाधाय स्थापयित्वा ब्रह्मोपवेशनादिपर्युक्षणांतां कुशकंडिकांविधाय एवएवविधिर्ये
नक्वचिद्धोम इत्यनेनैवाज्यसंस्कारे प्राप्तेपुनराज्यं संस्कृत्येति वचनंआधारहोमात्प्रागेव इहरतिरित्याज्याहुतिद्वयप्रा
प्त्यर्थं। ततश्चपर्युक्षणांते इहरतिरितिनानामंत्राभ्यां द्वाभ्यां मंत्राभ्यांजुहोत्याहुतिद्वयं ततआधारादिस्विष्टकृदं।

३२

51

विधिपरेवाक्येपरिचरणस्यनित्यत्वंज्ञापयति छिन्नंनूनं चपिष्टं चसान्नाय्यंमृन्मयंतथा लोकसिद्धंगृहीतंचेन्मं
त्रात्प्रयमाः कण्ठाशयात् छिन्नादिलोकसिद्धंचेदाद्रियेतत्रात्प्रति तन्नमंत्रजपंप्राहभारद्वाजःकृताकृतं छिन्नेचावहनने
लूनेपिष्टेदुग्धेचमृन्मये खातेचलौकिकेप्राप्तेजपोनास्तिवदाजिनां अत्रचनमंत्रांतेस्वाहाकारहोमोकिंतु आद्यावेवनवो
कारःप्रतिमंत्रं किंतुआद्यएवपदाह स्वाहाकुर्यान्नमंत्रांतेनचैवजुहुयाद्धविः स्वाहाकारेणहुत्वाग्नौपश्चान्मंत्रंसमापये
त् सामगानामयंनोकुर्याद्धोममंत्राणांपृथगादिषुकुत्रचित् अन्येषांचाविकृष्टानांकालेनाचमनादिनाअविकृष्टानां
अनंतरितानांकालेनआचमनादिनावा अथप्रयोगः अवसथ्याधानोत्तरकालंतद्दिवसएवसायंप्रातर्होमनिमित्तंमा
तृपूजापूर्वकमाभ्युदयिकंश्राद्धंकृत्वासंध्यावंदनानंतरंअग्निसमीपंगत्वापश्चादग्नेःप्राङ्मुखउपविश्यउपयमनकु
शान् समिधस्तिस्रः मणिकवारिद्ध्यादीनामन्यतमंहोमद्रव्यं अग्नेरुत्तरतः प्रांचः आसाद्यउपयमनकुशानादायति
ष्ठन् समिधोऽभ्याधायपर्युक्ष्यद्वादशपर्वपूरकेणदधितंडुलयवानामेकतमेनद्रव्येणहस्तेनैवस्वांगारिणिस्वार्चिषिवह्नौ
मध्यप्रदेशेदेवतांध्यायनजुहुयात् अग्नयेस्वाहा। इदमग्नयेतदुत्तरतः मनसाप्रजापतयेस्वाहा॥ इदंप्रजापतयेतिसा
यंतथैवसूर्यायस्वाहा इदंसूर्याय। प्रजापतयेस्वाहा। इतिप्रातः। पत्नीचेद्गर्भकामाभवतितदापुमांसौमित्रावरु

न्पुरोहितोराजानंवरोवधूंउपवेशयेत्।प्रतिक्षत्रेप्रतितिष्ठामिराष्ट्रेआत्वाहार्षमितिमंत्राभ्यां।ततोब्राह्मणभोजनंच
तुर्थ्यामपररात्रेभ्यंतरतोग्निमुपसमाधायदक्षिणतोब्रह्माणमुपवेश्योत्तरतउदपात्रंप्रतिष्ठाप्यस्थालीपाकंश्रपयि
त्वाज्यभागाविष्ट्वाज्याहुतिर्जुहोति।चतुर्थ्यांतिथौविवाहतिथिमारभ्यअपररात्रेःरात्रेःपश्चिमेयामेअभ्यंतरतःगृहस्यम
ध्येअग्निंवैवाहिकमुपसमाधायपंचभूसंस्कारान्कृत्वास्थापयित्वादक्षिणतोब्रह्मासनमास्तीर्यतत्रपूर्ववद्ब्रह्माणमु
पवेश्यउत्तरतउदपात्रंप्रतिष्ठाप्यप्रणीतास्थानात्उत्तरतः।जलपूर्णंताम्रादिपात्रंस्थापयित्वाअत्रब्रह्माणमुपवेश्ये
ति।पुनर्वचनमुदपात्रप्रतिष्ठापनावसरज्ञापनार्थं।स्थालीपाकंचरुंयथाविधिश्रपयित्वापर्युक्षणांतेआधारानंतरमा
ज्यभागाविष्ट्वाज्याहुतीःआज्येनपंचाहुतिर्वक्ष्यमाणैर्मंत्रैर्जुहोति॥अग्नेप्रायश्चित्तइत्यादिभिः॥सूत्रं॥स्थालीपाक
स्यजुहोति।स्थालीपाकस्यचरोःप्रजापतयेस्वाहेत्येकामाहुतिंजुहोति।हुत्वाहुत्वैतासामाहुतीनामुदपात्रेसंस्र
वान्समवनीय।सूत्रं।अग्नयेप्रायश्चित्तइत्यादीनांप्राजापत्यंतानांषण्णामाहुतीनांप्रत्येकंहुत्वासंस्रवानहुतशेषानु
दपात्रेसमवनीयप्रक्षिप्यकेषांचिन्मतेस्विष्टकृदाहुतेरपिततएनांमूर्धन्यभिषिंचति।सूत्रं॥ततस्तस्मादुदपात्रादुदक
मादायएनांवधूंवरोमूर्धन्यभिषिंचति।यातेपतिघ्नीइत्यादिनासाजीर्यत्वंमयासहामुकिदेविइत्यंतेन ॥ १ ॥

53

ति अन्ययानमुपकल्प्यतत्रोपवेशयेद्राजानं स्त्रियं वा प्रतिक्षत्त्र इति यज्ञांतेनात्वाहार्षमिति चैतया॥ सूत्रं॥ अन्य
इथादिवं यानं यानं वाहनं उपकल्प्य संयोज्य तत्र तस्मिन् याने राजानं नृपं स्त्रियं चोद्वाहितां वधूं उपवेशयेत। आरोहये
त्। कथं प्रतिक्षत्त्रे प्रतितिष्ठामित्यादिना प्रतितिष्ठामि यज्ञ इत्यंतेन मंत्रेण। आत्वाहार्षमित्यनया ऋचा च धुर्यौ दक्षिणा प्रायश्चि
त्तिः सूत्रं॥ धुर्यौ धुरि साधू अनड्वाहौ दक्षिणा ब्राह्मणाय देया। दक्षिणाशब्दः परिक्रयार्थद्रव्ये वर्तते। येन ऋत्विजामानतिर्भव
ति इदं कर्म प्रायश्चित्तिः। दुर्निमित्तसूचितदुरितापहारिणी। अतः सति निमित्ते भवति। ततो ब्राह्मणभोजनं॥ सूत्रं॥ ततः
कर्मसमाप्त्यनंतरं ब्राह्मणस्य भोजनं कारयितव्यं॥ इति सूत्रार्थः॥ अथ प्रयोगः॥ अक्षादिनिमित्तानामेकतमे निमि
त्ते संजाते शुचौ देशं पंचभूसंस्कारान् कृत्वा राज्ञः पुरोहितः सेनाग्निमुपसमाधाय वध्वा वरः वैवाहिकमग्निं ब्रह्मोपवे
शनादिपर्युक्षणांते इहरतिरिहरमध्वमिहधृतिरिहस्वधृतिः स्वाहेति प्रथमामाहुतिं जुहुयात्। इदमग्नय इत्याहुति
द्वयं हुत्वा उपसृजन्धरुणं मात्रे धरुणो मातरं धयन्। रायस्पोषमस्मासु दीधरत्स्वाहेति द्वितीयां इदमग्नय इत्याहु
तिद्वयं हुत्वा ततः आधारादिस्विष्टकृदंतं चतुर्दशाहुतिकं होमं विधाय संस्रवं प्राश्याचम्य धुर्यावनड्वाहौ। ब्रह्मणे अस्य
कर्मणः प्रतिष्ठार्थं एतावनड्वाहौ ब्रह्मन् तुभ्यं ब्रह्मणे मया दत्तौ विनिप्रयोगेण दक्षिणां दत्वा। अन्ययानमानीयतत्र

54

ग॰ सू॰
भा॰ ह॰
२४

पिसमान एव। यतः प्राप्तेऽभिगमने निषेधः प्रवर्तते। गर्भिण्यभिगमने निषेधस्तु काममाविजनितोः संभवामेति वचनाद्बु
ध्यते ऋतावनभिगमने दोषमाह। ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति॥ घोरायां ब्रह्महत्यायां युज्यते नात्र संश
यः॥ तथा ऋतुस्नातां तु यो भार्यां शक्तः सन्नोपगच्छति। घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः। तथा। लोकानंत्यं दि
वः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः। यस्मात्तस्मात् स्त्रियः सेव्याः कर्तव्याश्च सुरक्षिताः। इत्यादिभिः स्मृतिभिः स्त्रीरक्षाया विहि
तत्वात्। तासां कामातिक्रमणे व्यभिचारशंकासंभवाद्रक्षार्थं यथाकामं। तस्माद्यथाकामं तु न नियमः। यथाकामी वे
ति विकल्पेनाभिधानात्। अनभिगमने प्रत्यवायस्मरणाभावाच्च। अतो लोकानंत्यं स्वः प्राप्तिश्च तथास्य दक्षिणांसं
मधि हृदयमालभते। यत्ते सुसीमे इति॥ सूत्रं॥ अथाभिगमनानंतरं अस्य अस्या भार्याया दक्षिणांसं दक्षिणस्कंधमधिउ
परि दक्षिणहस्तं नीत्वा हृदयमालभते। हृदयं वक्षः आलभते स्पृशति यत्ते सुसीमे इत्यादिना शृणुयाम शरदः शतमित्य
नेन मंत्रेण एवमत ऊर्ध्वमेवमनेनैव प्रकारेण अतोऽनंतरं ऋतावृतौ प्रवेशनं यथाकामं वा इति सूत्रार्थव्याख्या॥ अथ च
तुर्थीप्रयोगः। तत्र विवाहाच्चतुर्थ्याम् अपररात्रे गृहाभ्यंतरतः पंचभूसंस्कारान् कृत्वा विवाहाग्नेः स्थापनं। दक्षिणतः ब्रह्मो
पवेशनं। प्रणीतास्थानादुत्तरतः उदपात्रस्थापनं। प्रणीताप्रणयनादि आज्यभागांतं आवसथ्याधानवत्कुर्यात्। अ

२४

55

अथैनां स्थालीपाकं प्राशयति॥ सूत्रं॥ अथाभिषेकानंतरं एनां वधूं स्थालीपाकं चरुशेषं प्राणैस्ते प्राणान्संद
धामीत्यादिनात्वचात्वचमित्यंतेन मंत्रेण वरः प्राशयति तस्मादेवं विच्छ्रोत्रियस्य दारेणोपहासमिच्छेदुत ह्येवं वित्
परो भवति। सूत्रं॥ यतोनेन चरुशेषप्राशनकर्मणा भर्त्रा सहैकं प्राप्ता दाराः तस्मादेवं वित्पुरुषः श्रोत्रियस्य विदुषः दा
रेण भार्यया सह उपहासं मैथुनं नेच्छेत् न कामयेत् हि यस्मात् एवंविदपि श्रोत्रियः परः शत्रुर्भवति। तामुदुह्य यथर्तु प्रवे
शनं॥ सूत्रं॥ एवं पूर्वोक्तेन प्रकारेण तां वधूं उदुह्य विवाहयित्वा विवाहकर्मणा भार्यात्वं संपाद्य यथर्तु प्रवेशनं ऋतुकाल
ऋतुकाले प्रवेशनं अभिगमनं कुर्यादिति शेषः। यथाकामी वा। सूत्रं॥ स्त्रियाः काममनतिक्रम्य यथाकामं तदस्या
स्तीति यथाकामी वा भवेत्। न ऋतुकालाभिगमननियमः। कुतः कामममाविजनितोः संभवामेति वचनात्। सूत्रे का
मं स्वेच्छया आविजानितोः आप्रसवात् संभवाम भर्त्रा सह संभवामेति स्त्रीणां इंद्राद्वरप्रार्थनावचनात् प्रजापतेरिति के
चित्। अत्र यद्यपि यथर्तुप्रवेशनमिति सामान्येनोक्तं। तथापि स्मृत्यंतरोक्तपर्वादिनिषेधपालनं कुर्यात्। यथाह म
नुः। अमावास्याष्टमी चैव पौर्णमासी चतुर्दशी। ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः। याज्ञवल्क्योपि। षोडश
र्तुनिशास्त्रीणां तस्मिन् युग्मासु संविशेत्। ब्रह्मचार्येव पर्वण्याद्याश्चतस्रश्च वर्जयेत्। इत्यादिनिषेधो यथाकाम्यपक्षे

साजीर्यत्वंमयासहासावित्रिइत्यनेनमंत्रेण। अथवरः वधूंस्थालीपाकंहुतशेषंसक्त्वाशयति। प्राणैस्तेप्राणान्संदधा
म्यस्थिभिरस्थीनिमांसैर्मांसानित्वचात्वचमिति अनेनमंत्रेण। साचभर्त्रामंत्रेपठितेप्राश्नाति अथऋतुकालेरजोद
र्शनेसंजातेपुत्रायाहेतोर्गर्भाधाननिमित्तंमातृपूजापूर्वकंस्वयंआभ्युदयिकंकृत्वारात्रावभिगमनंकुर्यात्। अभिगमनानंतरंवध्वादक्षिणस्कंध
स्योपरिदक्षिणहस्तंनीत्वाहृदयंस्पृशति यत्तेसुसीमेहृदयंदिविचंद्रमसिश्रितं॥ वेदाहंतन्मांतद्विद्यात्पश्येमशरदःशत
जीवेमशरदःशतं शृणुयामशरदःशतमित्यनेनमंत्रेण। एवंश्राद्धवर्ज्यमृतुकालमभिगमनंकुर्यात्। यथाकामीवा
भवेत्। ऋतुकालाभिगमनंकुर्वन्ब्रह्मचर्यात्नस्खलति। ब्रह्मचार्येवपर्वण्याद्याश्चतस्रश्चवर्जयेत्। इतियाज्ञव
ल्क्यस्मरणात्। अनभिगमनेतुदोषस्यश्रवणात्। ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छति। घोरायांब्रह्महत्यायांयुज्यतेना
त्रसंशयः। ऋतुस्नातांतुयोभार्यांशक्तःसन्नोपगच्छति। घोरायांभ्रूणहत्यायांयुज्यतेनात्रसंशयः। इत्यादिप्रत्यवायस्मरणाच्च
ऋतुकालाभिगमनेनियमः। यथाकाम्येतुननियमः॥ यथाकामीचेतिविकल्पविधानात्। अनंतालोकानंत्यंदिवःप्राप्तिःपुत्रपौ
त्रप्रपौत्रकैः। यस्मात्तस्मात्स्त्रियःसेव्याःकर्तव्याश्चसुरक्षिताः इत्यादिभिःस्मृतिभिःस्त्रीरक्षणविहितत्वात्। तासांकामातिक्रम
णेव्यभिचारसंकाशंभवात्तद्रक्षार्थंयथाकाम्यमितिचतुर्थीपद्धतिः॥ विष्णुपुराणे। ऋतावभिगमःशस्तःस्वपत्न्यामवनीपतेपु

57

ज्यभागांततः अग्नेप्रायश्चित्तइत्यादिभिः पंचभिर्मंत्रैः पंचाज्याहुतीर्हुत्वातद्यथा अग्नेप्रायश्चित्तेत्वंदेवानांप्रायश्चित्ति
रसिब्राह्मणस्त्वानाथकामउपधावामियास्यैपतिघ्नीतनूस्तामस्यैनाशयस्वाहा। इदमग्नये॥ वायोप्रायश्चित्तेत्वन्देवानां
प्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैप्रजाघ्नीतनूस्तामस्यैनाशयस्वाहा। इदंवायवे। सूर्यप्रायश्चित्ते
त्वन्देवानांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैपशुघ्नीतनूस्तामस्यैनाशयस्वाहा। इदं सूर्याय। चं
द्रप्रायश्चित्तेत्वन्देवानांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैगृहघ्नीतनूस्तामस्यैनाशयस्वाहा। इ
दंचंद्रमसे। गंधर्वप्रायश्चित्तेत्वन्देवानांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैयशोघ्नीतनूस्तामस्यैना
शयस्वाहा। इदंगंधर्वाय। ततः स्थालीपाकेनप्रजापतयेस्वाहा। इदंप्रजापतये॥ इतिप्राजापत्यांतंहुत्वा अग्नेप्रायश्चित्त
इत्यादिप्राजापत्यांतानांषडाहुतीनांसंस्रवमुदपात्रेप्रक्षिपेत्। केषांचिन्मतेस्विष्टकृतोपिसंस्रवंप्रक्षिपेत्। अन्या
सामाहुतीनांपात्रांतरेसंस्रवान्प्रक्षिपेत्। ततोग्नयेस्विष्टकृतेस्वाहा। इदमग्नयेस्विष्टकृते। हुत्वाज्यंमहाव्याहृत्या
दिप्राजापत्यांतानवाहुतीर्वाजुहोति। ततः पात्रांतरस्थानसंस्रवानप्राश्यपूर्णपात्रं वरयोरन्यतरंब्रह्मणेदत्वाउदपा
त्रात्दुदकमादायवधूंमूर्धन्यभिषिंचति। यातेपतिघ्नीप्रजाघ्नीपशुघ्नीगृहघ्नीयशोघ्नीनिंदितातनूर्जारघ्नींततएनांकरोमि

भागांते दर्शे दर्शदेवताभ्यः पौर्णमासे पौर्णमासदेवताभ्यः प्रयोगे वक्ष्यमाणाभ्यश्चरुं हुत्वा ब्रह्म प्रजापति विश्वेदेवा द्यावा
पृथिवीभ्यश्चरुं जुहोति विश्वेभ्यो देवेभ्यो बलिहरणं भूतगृह्येभ्य आकाशाय च। सूत्रं॥ बलिहरणं स्थालीपाकाद्देव विश्वेभ्यो
देवेभ्यो भूतगृह्येभ्यः। आकाशाय च। बलिहरणं। बलिदानं। वैश्वदेवस्याग्नौ जुहोत्यग्नये स्वाहा प्रजापतये स्वाहा विश्वेभ्यो
देवेभ्यः स्वाहाग्नये स्विष्टकृते स्वाहेति। सूत्रं॥ वैश्वदेवस्य विश्वेदेवाः सर्वपितृमनुष्या देवता अस्येति वैश्वदेवः पाकः पंचम
हायज्ञार्थे साधितपाक इत्यर्थः। ननु वैश्वदेवस्याग्नौ जुहोतीति विश्वेदेवसंबद्धस्य चरोरुपात्तो पात्तस्य वा अग्नौ जुहोतीति
कथं नोच्यते। यथा वृषोत्सर्गे पौष्णस्य जुहोतीति पूषसंबद्धः पृथगेव पिष्टमयः पूर्वसिद्ध एव चरुर्गृह्यते किमिति पंचमहा
यज्ञार्थः। उच्यते स्थालीपाकः श्रपयित्वेत्यत्र स्थालीपाकस्यैकवचनांतत्वाद्द्वितीयस्य वैश्वदेवस्य चरोरभावो वगम्यते
पौष्णवत् वैश्वदेवस्यासिद्धोपात्तस्य पृथगुपादानं पंचमहायज्ञार्थं वैश्वदेवपाकस्य सद्भावान्निवर्तते। पंचमहायज्ञार्थस्य
वैश्वदेवत्वं कुत इति चेत् वैश्वदेवात् अन्नात् पर्युक्ष्येति सूत्रात्। अग्नौ जुहोतीति अग्निग्रहणं बलिकर्मतामाभूदिति। अग्नये
स्वाहेत्यादिप्रयोगदर्शनार्थं सर्वव्रतस्यैकदेशस्याहुत्यासादितप्रोक्षितस्य अग्नये प्रजापतये विश्वेभ्यो देवेभ्यो हुत्वा स्थालीपाकाद्वै
श्वदेवाच्च अग्नये स्विष्टकृते जुहोतीति ततः शेषः समाप्तिं विधाय पावात्स्यतः स्त्री बलिः हरति प्रयोगे वक्ष्यमाणैर्नमस्त्रियै इत्यादिभिर्मंत्रैः बात्ये॥

२६

59

न्नामसैःशुभेकालेश्रेष्ठेयुग्मासुरात्रिषु।नास्नातानातांस्त्रियंगच्छेन्नातुरांनरजस्वलां।नाप्रशस्तांनकुपितांनानिष्टांनचगुर्वि
णीं।नादक्षिणांनान्यकामांनाकामांनान्ययोषितं।क्षुत्क्षामामतिभुक्तांवास्वयंचैभिर्गुणैर्युतेः॥स्नातःस्रग्गंधधृक्प्रीतोना
ध्मातःक्षुधितोपिवासकामःसानुरागश्चव्यवायंपुरुषोव्रजेत्।चतुर्दश्यष्टमीचैवअमावास्याथपूर्णिमा।पर्वाण्येतानिराजें
द्ररविसंक्रांतिरेवच।तैलस्त्रीमांससंभोगीपर्वस्वेतेषुवैपुमान्।विण्मूत्रभोजनंनामप्रयातिनरकंमृतः।इतिचतुर्थीकर्मपद्ध
तिः।पक्षादिषुस्थालीपाकंश्रपयित्वादर्शपूर्णमासदेवताभ्योहुत्वाजुहोतिब्रह्मणेप्रजापतयेविश्वेभ्योदेवेभ्योद्यावापृ
थिवीभ्यामिति।सूत्रं।पक्षीणामादयःपक्षादयःतासुपक्षादिषुप्रतिपत्सु।अत्रयद्यपिपक्षादिष्वित्युक्तंतथापिसंधिम
भितोयजेतेतिवचनात्।पर्वणोयश्चतुर्थांशआद्याःप्रतिपदस्त्रयः।यागकालःसविज्ञेयःप्रातर्युक्तोमनीषिभिरितिपर्व
चतुर्थांशोपियागकालत्वेनाभिमतःतिथ्याःपूर्वान्हेवाथमध्यान्हेयदिपर्वःसमाप्यते।तदेवयागकालःस्यात्परतश्चेत्परे
हनि।नचापिसंधिर्यदापरान्हेस्यात्तद्यागःप्रातःपरेहनि।कुर्वाणःप्रतिपद्भागेचतुर्थेपिनदुष्यतीत्यादिभिर्वचनैर्यागकालनि
र्णीय।पर्वदिवसेकृतोपवसथिकाशनःसपत्नीकःशालायांजघनेनाग्निंरात्रौजाग्रन्मिश्रइतिहासमिश्रोवापृथक्श
पित्वाप्रातःकृतस्नानसंध्यावंदनप्रातर्होमःस्वाचान्तोग्नेःपश्चात्प्राङ्मुखउपविश्यपूर्वोक्तविधिनाचरुंश्रपयित्वाज्य

गनसान्निध्यात्त्वक्कारोवरोहसमुच्चयार्थः ततश्चोभयेरात्रौ पूर्ववत्गर्भधारणार्थौक्तवत् पिष्ट्वापूर्ववद्देवश्चासेचनंभर्तुः
दक्षिणनासारंध्रेमंत्रविशेषमाह हिरण्यगर्भोद्भः संभृतइत्येताभ्यांऋग्भ्यां कुशकंटकं सोमांशुंचैके॥सूत्रं॥ एकेआचा
र्याः न्यग्रोधावरोहश्छुंगेषुपिष्यमाणेषु कुशस्यकंटकंमूलं सोमांशुंसोमलताखंडंचप्रक्षिपंति तत्पक्षेद्रव्यचतुष्टयपेष
णं कूर्मपित्तंचोपस्थेकृत्वा॥सूत्रं॥ उत्संगेकृत्वासयदिकामयेत वीर्यवान्स्यादितिविकृत्यैनमभिमंत्रयतेसुपर्णोसीतिप्राग्वि
ष्णुक्रमेभ्यः॥सूत्रं॥ अत्रकाम्यमाह सभर्तायदिकामयेत अयंगर्भः वीर्यवान्शक्तिमान्स्यादितीच्छेत् तदास्यभार्याया
उपस्थेकूर्मपित्तंजलपूर्णशरावंनिधाय विकृत्याविकृतिछंदस्कयासुपर्णोसीत्यनयाऋचास्वः पतेत्यंतयाएनंगर्भमभिमं
त्रयते हस्तेनगर्भाशयंस्पृष्ट्वामंत्रंजपतीत्यर्थः विष्णुक्रमेभ्योविष्णुक्रममंत्रेभ्यः प्राक्पूर्वंयावद्भिकृतेः परिमाणमितिसूत्रा
र्थः॥ अथप्रयोगः। तत्रगर्भाधानप्रभृतिद्वितीयतृतीयेवामासेयस्मिन्दिने पुन्नक्षत्रयुक्तश्चंद्रः तत्रतस्मिन्नहनिगर्भिणीमुप
वासंकारयित्वामातृपूजाभ्युदयिकंविधायततोस्नापयित्वाअहतवाससीपरिधाप्यरात्रौन्यग्रोधावरोहांछुंगांश्च उदकेनपिष्ट्वाप्रसे
कुशकंटकंसोमांशुंवतत्नासिकायादक्षिणपुटेआसिंचतिभर्ताहिरण्यगर्भोद्भः संभृतइतिऋग्भ्यांसयदीच्छेत वीर्यवान्स्यादयंगर्भः
तदातस्याःस्त्रियाःउदशरावंउपस्थेकृत्वासुपर्णोसीत्यनयाविष्णोः क्रमोसीत्येतस्मात्प्राक्पठितयाविकृत्याऋचांतगर्भमभिमंत्रयतेपि

दिगर्भेनदधीत॥ सूत्रं॥॰ साभार्यायदिचेतगर्भंनधारयेत॥ सिं॰ स्या॰ श्वेतपुष्प्याउपोष्यपुष्येणमूलमुत्थाप्यचतुर्थेहनि
स्नातायांनिशायांनिशायामुदपेषंपिष्ट्वादक्षिणस्यांनासिकायामासिंचति॥ सूत्रं॥ गर्भधारणोपायमाह सिं॰ स्या॰ कंटकारि
कायाःकथंभूतायाःश्वेतपुष्प्याःश्वेतानिपुष्पाणियस्याःसाश्वेतपुष्पीतस्याःउपोष्यउपवासंकृत्वापुष्येणचंद्रमसायुक्तेनपुष्य
नक्षत्रेणमूलंशिफांउत्थाप्यउद्धृत्यरजोदर्शनाच्चतुर्थेहनिस्नातायांभार्यायांरात्रौउदपेषंयथाभवतितथापिष्ट्वातन्मूलंउद
केनपिष्ट्वाद्रवीभावमापाद्येत्यर्थः दक्षिणस्यांनासिकायांदक्षिणेनासारंध्रेवसिंचति स्रावयतिभर्ताइयमोषधीत्रायमाणासह
मानासरस्वती अस्याअहंबृहत्याःपुत्रःपितुरिवनामजग्रभमित्यनेनमंत्रेण १३ अथपुंसवनं॥ सूत्रं॥॰ अथअवसरप्राप्तं
पुंसवनाख्यंगर्भसंस्कारकर्मव्याख्यास्यते पुरास्पंदतइतिसूत्रं॥ पुराअग्रेस्पंदतेचलिष्यतियावत्पुरानिपातयोर्लडिति
पुरायोगेभविष्यदर्थेवर्तमानप्रयोगइतिहेतोः। मासेद्वितीयेतृतीयेवायदहः पुंसानक्षत्रेणचंद्रमायुज्यत॥ सूत्रं॥ गर्भधारण
कालात॥ द्वितीयेतृतीयेवामासेयस्मिन्नहनिउपवासाभोजनंकारयित्वाभार्यांआप्लाव्यस्नापयित्वाअहतेनवेसदृशेसदृ
न्मसालिनेवासंसीअंतरीयोत्तरीयेद्वेपरिधाप्यपरिधानंकारयित्वान्यग्रोधावरोहांछुंगांश्चनिशायामुदपेषं पिष्ट्वापूर्ववदासे
चनं सूत्रं॥ न्यग्रोधस्यवटस्यअवरोहान्अवाचीनंअधारोहंतिजायंतेइत्यवरोहास्तान्शुंगानतदग्रपल्लवानमुकुलाका

62

गृ॰ सू॰ भा॰ ह॰ ३९

णीतयात्रेण्याशलल्याशल्यकाख्यपसकंटकेनवीरतरशंकुनाशरेषीकया आश्वत्थेनवाशंकुना पूर्णचात्रेणचसूत्रे
णपूर्णपूर्णचात्रंसूत्रकर्त्तनसाधनंतर्कुरितियावत् तेनलोहकीलकेनच चकारः सर्वसमुच्चयार्थः अतस्त्रोदुंबरयुग्मा
दिभिः सर्वैः पुंजीकृतैः सीमंतंस्त्रियाऊर्ध्वंविनयति पृथक्करोति ललाटांतरमारभ्यकेशानद्विधाकरोति भूर्भुवः स्वर्विनया
मीत्येतावतामंत्रेणसकृदेव पक्षांतरमाह प्रतिमहाव्याहृतिवा अथवाप्रतिमहाव्याहृतिमहाव्याहृतिं महाव्याहृतिंप्रति
विनयति ततश्चभूर्विनयामिभुवर्विनयामिस्वर्विनयामीत्येवंत्रिर्विनयनंभवति अत्रव्याहृतिमंत्रपदानांआख्यातपदंवि
नावाक्यस्यासंपूर्णत्वात् आख्यातपदाध्याहारःकर्त्तव्यः तत्रविधियुक्तस्यमंत्रभावःस्यादितिन्यायात् विनयतीतिविधिपदंविप
रिणम्यविनयामीत्यध्याह्रियते त्रिवृतमाबध्नातिसूत्रं॥ त्रिवृत्तंवेणींप्रतिआबध्नाति पुंजीकृतमौदुंबरादिपंचकंवेण्यां
विनियुनक्तीत्यर्थः अयमूर्जावतोवृक्षऊर्जीवफलिनीभवेतिमंत्रेण अथाहवीणागाथिनौराजानंसंगायेतांयोवाप्यन्योवी
रतरइति॥सूत्रं॥ अथोदुंबरादिपंचकस्यवेणीबंधनानंतरंआहब्रवीतिविं हवीणागाथिनौराजानंभूपतिंसंगायेतां राजवर्णनसं
बद्धंध्रुवादिरूपकंसम्यग्गायेतांयुवां अथवायोन्योपिराजव्यतिरिक्तोवीरतरःप्रकृष्टोवीरः शूरस्तंसंगायेतामित्यनुषंगःइत्याहब्र
वीतिनियुक्तामप्येकेगाथामुपोदाहरंति॥सूत्रं॥ एकेआचार्याःनियुक्तांगानेविहितांगाथांमंत्रमुपोदाहरंतिपठंतिअपिसमुच्चया

३९

63

अथसीमंतोन्नयनंपुंसवनवत्॥ सूत्रं॥ ० अथपुंसवनानंतरंक्रमप्राप्तंसीमंतोन्नयनंगर्भसंस्कारकंकर्मव्याख्यास्यते तच्च
षष्टेष्टमेवामासेपुंसवनवत् पुंनसूत्रेभवति प्रथमगर्भमासेषष्टेष्टमेवा आद्यगर्भगर्भाधानप्रभृतिषष्टेष्टमेवामासे
नियमेनकुर्यात् गर्भांतरेष्वनियमइतिकर्कोपाध्यायः अन्येतुप्रथमगर्भएवेति तथाचाश्वलायनगृह्यपरिशिष्टंप्र
थमेगर्भेसीमंतोन्नयनसंस्कारोगर्भमात्रसंस्कारइति सकृत्संस्कृतसंस्काराःसीमंतेनद्विजस्त्रियः यंयंगर्भप्रसूयंतेस
सर्वःसंस्कृतोभवेत् इतिहारीतोक्तेश्च सकृच्चसंस्कृतानारीसर्वगर्भेषुसंस्कृता उपवासाश्रावनाहतवासोयुगपरिधा
पनानिवर्तिनागृह्येतेतिलमुद्गमिश्रःस्थालीपाकःश्रपयित्वाप्रजापतेर्हुत्वा॥ सूत्रं॥ तत्रविशेषमाह तिलैर्मुद्गैर्मिश्र
स्तिलमुद्गमिश्रस्तंस्थालीपाकंओदनंचरुंश्रपयित्वाआज्यभागांतेप्रजापतेस्वाहेत्येकामाहुतिंहुत्वास्विष्टकृदादिप्रा
शनांतंविदध्यात् पश्चादग्नेर्भद्रपीठउपविष्टायाः॥ सूत्रं॥ अग्नेःपश्चिमतःभर्तुर्दक्षिणतःमृद्वासनेआसीनायागर्भि
ण्याःपत्न्याःयुग्मेनसटालुग्रप्सेनौदुंबरेणत्रिभिश्चदर्भपिंजूलैस्त्र्येण्याशलल्यावीरतरशंकुनापूर्णचात्रेणचसीमंतमूर्द्धंवि
नयतिभूर्भुवःस्वरितिप्रतिमहाव्याहृतिर्वासूत्रं॥ ततोभर्त्ताउदुंबरेणाउदुंबरवृक्षोद्भवेनयुग्मेनद्व्यादियुग्मेनद्व्यादियुग्मफल
वता सटालुग्रप्सेन अपक्वफलएकस्तवकनिबद्धेनत्रिभिश्चदर्भपिंजूलैस्त्रिभिर्दर्भपवित्रैश्च त्र्येण्यात्रिषुस्थानेषुश्वेतान्ये

64

ग॰ सू॰
भा॰ हृ॰
४०

त्वागर्भिण्यां योषितिस्नातायांपरिहितानाहतवाससोयुग्मायांभद्रपीठउपविष्टायांयुग्मेनसटालुग्रप्सेनौदुंबरेणत्रिभिश्च
दर्भपिंजुलैस्त्रेण्याशलल्यावीरतरशंकुनापूर्णचात्रेणचेत्येतैः सर्वैः पुंजीकृतैः स्त्रियाः सीमंतंभूर्भुवः स्वर्विनयामीतिऊ
र्ध्वंविनयतिमंत्रेणसकृत् यद्वाभूर्विनयामि भुवर्विनयामि स्वर्विनयामि इतित्रिर्विनयति ततोविनयनसाधनमौदुंबरादिपं
चकंस्त्रियावेण्यांवध्नाति अयमूर्जावतोवृक्षऊर्जीवफलिनीभवेतिमंत्रेण अथवीणागाथिनौराजानंसंगायेतामितिप्रैष
ददाति अथवा अमुंवीरतरंसंगायेतामितिततस्तौयद्वानायप्रेषितौतंगायतः अथवावीणागाथिनौसोमंराजानंसंगा
येतामितिप्रेषितौसोमएवनोराजेमामानुषीः प्रजाः अविमुक्तचक्रआसीरंस्तीरेतुभ्यंइत्यनेनगाथांवीणागाथिनौगायतः ॥
इतिविकल्पपक्षः समुच्चयपक्षेराजानंअमुंवीरतरंवासोमंराजानंचसंगायेतामिति प्रेषितौउभयंगायतः असौयस्यानेस
मीपावस्थितायाः गंगाप्रमुखायानद्याः संबुद्ध्यंतंगंगेत्यादिनामगृह्णातिगर्भिण्येव ततोब्राह्मणभोजनंददाति अत्रप्र
थमगर्भइतिवचनात् स्त्रीसंस्कारकमत्वाच्च यतः सकृत्संस्कृतसंस्काराः सीमंतेनद्विजस्त्रियः यंयंगर्भंप्रसूयंतेससर्वः
संस्कृतोभवेतन्नप्रतिगर्भंसीमन्तोन्नयनं पुंसवनंतुदृष्टार्थत्वाद्गर्भाष्यकारमतेप्रतिगर्भंभवति १५ सोष्यन्तीमद्भिरभ्युक्षत्येजतु
दशमास्यइतिप्राग्यस्यैतन्नइति॥सूत्रं॥॰ सोष्यंतींप्रसवमूलवतींस्त्रियंभर्ताअद्भिर्जलेनअभ्युक्षतिप्रसिंचति एजतुदशमास्यइत्य

४०

66

क्षेराजवीरतरयोरन्यतरगानंगाथागानंचसमुच्चितंभवति यस्मांतरेराजवीरतरयोरन्यतरगानंगाथागानंवा तांगाथामाह सो
मएवनोराजेत्यादितोरेतुभ्यमित्यंता॥ सूत्रं॥ पद्धतिकारपक्षेराजवीरतरगाथानांएकतमस्यैवगानं तत्पक्षेनियुक्तामपी
त्यपिशब्दोविवक्षितार्थः स्यात् असावितियांनदीमुपावसिताभवति तस्यानामगृह्णाति ततोगर्भिणीयांनदींउपसमीपे
आवसितास्थिताभवतितस्यानद्याअसावितिगंगायमुनाइत्येवंप्रथमांतंनामगृह्णाति ततोब्राह्मणभोजनमित्युक्तार्थमिति
सूत्रव्याख्या॥ अथपद्धतिः॥ तत्रप्रथमेगर्भेषष्ठेष्टमेवामासिपुन्नक्षत्रेमातृपूजांवृद्धिश्राद्धंचकृत्वावहिःशालायांपंच
भूसंस्कारानकृत्वालौकिकाग्निमुपसमाधायब्रह्मोपवेशनाद्याज्यभागांतंविदध्यात् तत्रविशेषः पात्रासादनेआज्यभागा
नंतरंतंडुलतिलमुद्गानांक्रमेणपृथगासादनं उपकल्पनीयानिमृदुपीठंयुग्मान्यौदुंबरफलानिएकस्तवकनिबद्धानि
त्रयोदर्भपिंजुलाः त्र्येणीशललीवीरतरशंकुः शरेषीकाआम्बन्योवाशंकुः पूर्णंचात्रंवीणागाथिनौचेति आज्यमधि
श्रित्यचरुस्थाल्यांमुद्गान्प्रक्षिप्याधिश्रित्यईषच्छृतेषुमुद्गेषुतिलतंडुलप्रक्षेपंकृत्वापर्यग्निकरणंकुर्यात् ततआज्यभा
गांतेस्थालीपाकेनप्रजापतयेस्वाहेतिहुत्वाइदंप्रजापतयइतित्यागंविधायस्थालीपाकेनोत्तरार्द्धात्स्विष्टकृदाहुतिंम
हाव्याहृत्यादिप्राजापत्यान्तानवाहुतीर्हुत्वासंस्रवंप्राश्यपूर्णपात्रंवरयोरन्यतरंब्रह्मणेदत्वापश्चादग्नेर्भद्रपीठंस्थापयि

तेननायंदोषः यथा सर्वैर्भूर्भुवइत्येतावतैव गार्हपत्यमादधाति तैः सर्वैः पंचभिराहवनीयमादधाति भूर्भुवः स्वरिति च श्रुतौ वा
क्यसमुदायस्येतिकारेण मन्त्रावसानं ज्ञायते कातीयसूत्रेपि दारुभिर्ज्वलन्तमादधाति भूर्भुव इति आहवनीयमादधाति
भूर्भुवः स्वरिति अत्र यद्यपि एकैकस्या व्याहृतेर्मन्त्रत्वं युक्तं समस्तानां व्याहृतीनां च तथापि इतिकारेण द्वयोरपि व्याहृत्योर्मे
त्रत्वमवस्थाप्यते एवमन्यत्रापि बहूनां मंत्रवाक्यानां इतिकारादि विनियोजकेन मंत्रैकं तत्र तत्रायमेव न्यायोऽनुसर्त्तव्यः
अथास्यायुष्यं करोति नाभ्यां दक्षिणे वा कर्णे जपति सूत्रं ॥ अथ मेधाजननानंतरमस्य कुमारस्यायुष्यं आयुष्ये हितं जीवनव
र्धनं कर्म करोति तद्यथा नाभिदेशे दक्षिणे वा श्रवणे नाभ्यां दक्षिणकर्णे वा इति नियमाधिकरणे सप्तमी गंगायां घोष इतिवत् ते
न नाभिसमीपे दक्षिणकर्णसमीपे वा जपति अग्निरायुष्मानित्यादिकान्मंत्रान् त्रीन् जपति त्रीन्वारान् उपांशु पठति अग्नि
सोमब्रह्मदेवऋषिपितृयज्ञसमुद्र इत्येतान् त्र्यायुषमिति च ॥ सूत्रं ॥ ततः त्र्यायुषं जमदग्नेरित्यादितन्त्रो अस्तु त्र्यायुषमित्यं
तं च मंत्रं तथैव त्रिर्जपति इदं चायुष्यकरणं कालातिक्रमेपि क्रियते मेधाजननं तु मुख्यकालातिक्रमान्निवर्त्तते तस्मात्कुमारं
जातं घृतं वैवास्मै प्रतिलेहयंति स्तनं वानुधापयंतीति जातमात्रस्य कुमारस्य श्रुत्या मेधाजननोपदेशात् स यदि कामयेत सर्वमायु
रियादिति वात्सप्रेणैनमभिमृशेत् सूत्रं ॥ सः पिता यदि इच्छेत् अयं कुमारः सर्वं संपूर्णमायुर्जीवितं इयात् प्राप्नुयात् इत्येवं तदा वात्सप्रेणाव

तयाप्राग्यस्येतद्इतिप्राक्पठितयाऋचाऽवसानयाविराट्जगत्या अथावरावपतनं॥सूत्रं॥ अथाभ्युक्षणानंतरं
अवरावपतनंअवरंउल्वंजरायुवेष्टितंगर्भवेष्टनंअवाचीनमधः पतत्यनेनजप्नेनेत्यवरावपतनोमंत्रः तस्याःसमीपे
उपविश्यमंत्रंजपति यथा अवैतुपृश्निशेवलमित्यादि अवजरायुपद्यतामित्यंतंजातस्यकुमारस्याछिन्नायांनाड्यां॥
मेधाजननायुष्येकरोति॥सूत्रं॥ ततःजातस्यउत्पन्नस्यकुमारस्यअछिन्नायांनाड्यांअखंडितेनालेसतिमेधाजनना
युष्येमेधाजननंचआयुष्यंचमेधाजननायुष्येतेकरोतिपितामेधाजननंतावदाह अनामिकयासुवर्णान्तर्हितयामधु
घृतेप्राशयतिघृतंवाभूस्त्वयिदधामिभुवस्त्वयिदधामिस्वस्त्वयिदधामिभूर्भुवः स्वः सर्वंत्वयिदधामीति॥सूत्रं॥ अनामि
कयांगुल्यासुवर्णेनाछादितयामधुचघृतंचमधुघृतेद्वंद्वसमाससामर्थ्यादेकीकृतेघृतंवाकेवलंकुमारंसकृत्प्राशयति
कुमारस्यजिह्वायांनिर्मार्ष्टिभूस्त्वयीत्यादिसर्वंत्वयिदधामीत्यंतेनमंत्रवाक्यसमुदायेन नत्वर्थैकत्वादेकंवाक्यमिति
जैमिनिसूत्रात् सुप्तिङंतचयोवाक्यंक्रियावाकारकान्विताइत्यमरसिंहोक्तेश्चैकार्थमेकंवाक्यंएकस्यवाक्यस्यच तेषां
वाक्यंनिराकांक्षंमिथः संबद्धमितिकात्यायनवचनेनैकमंत्रत्वमितिप्रतिपादनात् कथंमंत्रवाक्यसमुदायस्यैकमंत्रत्वं अ
त्रोच्यतेसत्यंयद्दिइतिकारादिकंमंत्रावसानज्ञापकंकिंचिन्नस्यात् तदैतच्छंक्यं अत्रपुनरिकारोमंत्रावसानज्ञापकोजागर्ति

68

गृ॰सू॰
भा॰ह॰
४२

शत्यश्मा भवेति अथ जन्मदेशाभिमंत्रणानंतरं एनं कुमारं पिताभिमृशति समंततः सर्वशरीरे स्पृशति अश्मा भवेत्या
दिना सजीव शरदः शतमित्यंतेन मंत्रेण वात्सप्राभिमर्शनादि एतदभिमर्शनांतं कालव्यतिक्रमेपि क्रियते संस्कारकर्मक
त्वात् अथास्य मातरमभिमंत्रयते इडासीति अथ कुमाराभिमर्शनानंतरं अस्य कुमारस्य जननीमभिमंत्रयते अभिम
स्रीत्यत्र इडासीत्यादिना वीरवतो करदित्यंतेन अथास्य दक्षिणं स्तनं प्रक्षाल्य प्रयच्छतीमं स्तनमिति यस्ते स्तन इत्युत्तर
मेताभ्यां अथाभिमंत्रणं कृत्वा अस्यै अस्य मातुर्दक्षिणं स्तनं प्रक्षाल्य धावयित्वा कुमाराय ददाति इमं स्तनमित्येत
यर्चा तत उत्तरं वामं स्तनं प्रक्षाल्य प्रयच्छति यस्ते स्तन इमं स्तनमित्येताभ्यामृग्भ्यां उदपात्रं शिरस्तो निदधात्यापो दे
वेषु जाग्रथेति उदपात्रं जलपूर्णपात्रं शिरस्तः शिरःप्रदेशे कुमारस्य निदधाति स्थापयति आपो देवेष्वित्यादिना जाग्रथेत्यंतेन
मंत्रेण द्वारदेशे सूतिकाग्निमुपसमाधायोत्थानात् संधिवेलयोः फलीकरणमिश्रान् सर्षपानग्नावावपति शंडामर्का इत्यादि त
तः पंचभूसंस्कारपूर्वकं द्वारदेशे सूतिकागृहस्य सूतिकाग्निं स्थापयित्वा उत्थानात् उत्थानं यावत् संधिवेलयोः सायंप्रातः फ
लीकरणमिश्रान् फलीकरणैस्तंडुलकणैः मिश्रान् युक्तान् सर्षपान् तस्मिन्नग्नौ आवपति जुहोति द्वे आहुती शंडामर्का इति।
आलिखन्ननिमिष इति द्वाभ्यां मंत्राभ्यां आवपनोपदेशात् होमेतिकर्तव्यानिवृत्तिः नैमित्तिकमाह यदि कुमार उपद्रवेज्ज्वा

४२

69

प्रिण

भौलंदनेन दृष्टेनानुवाकेन एनं कुमारं अभि समंततः सर्वं शरीरमालभेत तत्र विशेषमाह दिवस्परीत्येतस्यानुवाकस्यो
त्तमामृचं परिशिनष्टि सूत्रं॥ दिवस्परीत्यादिको द्वादशर्चोऽनुवाको वात्सप्रः एतस्य उत्तमां अन्त्यां द्वादशीं अस्ता व्याग्निरि
त्येतामृचं परिशिनष्टि उद्दस्यति तां परित्यज्य एकादशभिर्ऋग्भिरभिमृशेदित्यर्थः प्रतिदिशं पंच ब्राह्मणानवस्थाप्य ब्रू
यादिममनुप्राणितेति पूर्वो ब्रूयात् प्राणेति व्यानेति दक्षिणः पानेत्यपर उदानेत्युत्तरतः समानेति पंचम उपरिष्टादवेक्षमा
णो ब्रूयात् स्वयं वा कुर्यादनुपरिक्रामम् अविद्यमानेषु इत्यंतं सूत्रं कुमारस्य प्रतिदिशां दिशं दिशं प्रति च तस्रषु दिक्षु प्राच्यादि
षु मध्ये च यथाक्रमं पंच ब्राह्मणान् अवस्थाप्य संनिवेश्य कुमाराभिमुखान् तान् प्रति ब्रूयात्॥ किं इममनुप्राणितेति
इमं कुमारं अनुप्राणित अनुलक्षीकृत्य प्राणेत्यादि ब्रूत इति प्रैषः ततः प्रेषिता ब्राह्मणाः पूर्वादिक्रमेण प्राणेति कु
मारं लक्षीकृत्य पूर्वो ब्रूयात् व्यानेति दक्षिणो ब्राह्मणः अपानेति पश्चिमः उदानेत्युत्तरः समानेति पंचम उपरिष्टाद्दृह्यमवे
क्षमाणः अविद्यमानेषु स्वयं वा स्वयमेव अनुप्राणनं कुर्यात् कथं अनुपरिक्रामं परिक्रम्य परिक्रम्य पूर्वादिकां दिशं प्राणे
त्यादि अनुपरिक्रामेण सुलंत्यं अस्मिन् पक्षे प्रेषाभावः स यस्मिन् देशे जातो भवति तमभिमंत्रयते सः कुमारः यस्मिन् देशे भू
भागे उत्पन्नः पतति तं देशं अभिमंत्रयते हस्तेन स्पृशति वेदते भूमि इत्यादि शरदः शतमित्यंतेन मंत्रेण अथैनमभिमृ

लेन प्रच्छाद्योत्तरीयेण वा पित्रांक आधाय जपति कूर्कुर इत्यादि यदि चेत्कुमारो बालग्रहः तं वालं उपद्रवेत् अभिमृशेत् तदा तं वालं जालेन मत्स्यग्रहणसाधनेन तदलाभे उत्तरीयेण वा वाससा प्रच्छाद्य छादयित्वा अंके उत्संगे निधाय धृत्वा कूर्कुर इत्यादिकं अपह्नुतेऽपनेतं मंत्रं जपति अभिमृशति निनामयति जपान्ते कुमारस्य सर्वांगमभिमृशति निनामयतीत्यादि यत्र चाभिमृशामसीत्यंतेन मंत्रेणेति सूत्रार्थः॥ ॥अथप्रयोगः॥ सोष्यंतीमद्भिर्यएजतु दशमास्य इत्यनया पञ्चम्या अनुच्छन्दसा सह एतया अद्भिरभ्युक्षति पतिः ततः स्त्रीसमीपे अवैतु पृश्निशेवलं शुने जराय्वत्तवे नैव मांसेन पीवरीं न कस्मिंश्चनायतनमवजरायुपद्यतामित्यंतेन अवरायतनं मंत्रं जपति तत्र यदि कुमार उत्पद्यते तेन तदामात् पूजाभ्युदयिके विधाय अछिन्ने नाले मेधाजननायुष्ये करोति तत्र मेधाजननं यथा अनामिकायांगुल्या सुवर्णेनांतर्हितया मधुघृते मेलयित्वा केवलं घृतं कुमारं भूस्त्वयि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधामि भूर्भुवः स्वः सर्वं त्वयि दधामीत्यनेन मंत्रेण सकृत् प्राशयति अथायुष्यं करोति तद्यथा कुमारस्य नाभिसमीपे दक्षिणकर्णसमीपे वा अग्निरायुष्मानित्यादिकान् समुद्र आयुष्मानित्यंतान् अष्टौ मंत्रान् त्रिर्जपति अग्निरायुष्मान्स वनस्पतिभिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि सोम आयुष्मान्स ओषधीभिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेन त्वायुषायुष्मंतं करोमि देवा आयुष्मंतस्तेऽमृतेनायुष्मंतस्तेन त्वायु

गृ·सू· भा·ह ४३

षायुष्मंतं करोमि ऋषय आयुष्मंतस्ते व्रतैरायुष्मंतस्तेन त्वायुषायुष्मंतं करोमि पितर आयुष्मंतस्ते स्वधाभिरायुष्मंतस्तेन त्वायुषायुष्मंतं करोमि यज्ञ आयुष्मान्स दक्षिणाभिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि समुद्र आयुष्मान्स स्रवंतीभिरायुष्मान्स्तेन त्वायुषायुष्मंतं करोमि इति ततस्त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषमिति मंत्रं त्रिर्जपति सपिता यदि कामयेत् अयं कुमारः सर्वमायुरियादिति तदा तं कुमारं दिवस्परीत्यारभ्य उशिजो विवव्रिरित्यंतेन वात्सप्रसंज्ञकेनानुवाकेनाभिमृशेत् अथ कुमारस्य पूर्वादि चतसृषु दिक्षु चतुरो ब्राह्मणान् एकं मध्ये च अवस्थाप्य इमम नुप्राणितेति तान् ब्रूयात् ततः पूर्वदिक्स्थितो ब्राह्मणः कुमारं लक्षीकृत्य प्राण इति दक्षिणो व्यान इति पश्चिम अपान इति उत्तर उदान इति पंचमः समान इति उपरिष्टादवेक्षमाणः ब्रूयात् आविद्यमानेषु तु ब्राह्मणेषु स्वयमेव तस्यां तस्यां दिशि कुमाराभिमुखं स्थित्वा प्राणेत्यादि पूर्वोक्तं ब्रूयात् अस्मिन्नुपक्षेन प्रैषः ततो यस्मिन् देशे कुमारो जातो भवति तं देशं वेद ते भूमिहृदयं दिवि चंद्रमसि श्रितं वेदाहं तन्मां तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं इत्यनेन मंत्रेणाभिमंत्रयते अथैनं कुमारं अश्मा भव परशुर्भव हिरण्यमस्तृतं भव आत्मा वै पुत्रनामासि स जीव शरदः शतमित्यंतेन मंत्रेणाभिमृशति अथास्य कुमारस्य मातरमभिमंत्रयते इडासि मैत्रावरुणी वीरे वीरमजीजनथाः सा त्वं वीरवती

स्म ४३

72

भवयास्मान्वीरवतोकरदित्यनेनमंत्रेण अथअस्यकुमारस्यमातुर्दक्षिणंस्तनंप्रक्षाल्यप्रयच्छतिइमंस्तनमित्यनय
र्चा ततउत्तरंवामंप्रक्षाल्यप्रयच्छति यस्तेस्तनइमंस्तनमित्येताभ्यामृग्भ्यां ततःकुमारस्यशिरःप्रदेशेउदपात्रंजलपूर्णं
पात्रंनिदधातिस्थापयतिआपोदेवेषुजाग्रथ यथादेवेषुजाग्रथ एवमस्यांसूतिकायांसपुत्रिकायांजाग्रथेत्यनेनत
दुदपात्रंप्रागुत्थानात्स्थापितमेवतिष्ठति ततःसूतिकागृहस्यद्वारदेशेपंचभूसंस्कारान्कृत्वासूतकाग्निंस्थापयित्वासायंप्रा
तःसंध्याद्वयेफलीकरणमिश्रान्तंदुलकणयुतान्सर्षपान्तस्मिन्नग्नौहस्तेनजुहोति यावत्सूतिकोत्थानं कथं शण्डा
मर्काउपवीरःशौण्डिकेयउलूखलः मलिम्लुचोद्रोणासश्च्यवनोनश्यतादितःस्वाहा इत्यनेनमंत्रेणैकामाहुतिं आलिख
न्ननिमिषःकिंवदंतउपश्रुतिःहर्यक्षःकुंभीशत्रुःपात्रपाणिर्नृमणिर्हन्त्रीमुखःसर्षपारुणश्च्यवनोनश्यतादितःस्वाहाइत्य
नेनद्वितीयांइदमग्नयइत्युभयत्रत्यागः यदिकुमारग्रहोबालमुपद्रवेत्तदातंबालंजालेनउत्तरीयेणवावस्त्रेणप्रच्छाद्यअंके
गृहीत्वापिताजपति कूर्कुरःसुकूर्कुरःकूर्कुरोबालबंधनः चेच्चेच्छुनकसृजनमस्तेअस्तुसीसरोलपेतापह्वरतत्स
त्यं यत्तेदेवावरमददुःसत्वंकुमारमेववावृणीथाः चेच्चेच्छुनकसृजनमस्तेअस्तुसीसरोलपेतापह्वरतत्सत्यंयत्तेस
रमामातासीसरःपिताश्यामशबलौभ्रातरौ चेच्चेच्छुनकसृजनमस्तेअस्तुसीसरोलपेतापह्वरेत्यंतमंत्रेणनामयति

गृ॰ सू॰ नरुदति न हृष्यति न स्नायति यत्र वयं वदामो यत्र चाभिमृशामसीत्यनेन मंत्रेण पिता कुमारमभिमृशति ॥ १६ ॥ दशम्यामुत्था

भा॰ ह॰ प्य ब्राह्मणान् भोजयित्वा पिता नाम करोति प्रसवदिनमारभ्य दशम्यां तिथौ सूतिका सूतिकागृहादुत्थाप्य नामकरणं गतपात्र ब्रा

४५ ह्मणान् त्रीन् भोजयित्वा भोजनं कारयित्वा पिता अपत्यस्य नामधेयं करोति अत्र दशम्यामिति निःसूतकान्तोपलक्षणं तेन क्षत्रिय

स्य यावंति दिनानि सूतकं तदंते दिने सूतकोत्थापनमित्यर्थः अपरदिने च नामकरणं तथा च गोभिलसूत्रे दशरात्रे व्युष्टे ना

मकरणमिति याज्ञवल्क्यवचनं अहन्येकादशे नामेति नामकरणीत्युक्तं तत्कीदृशमित्यपेक्षायामाह द्व्यक्षरं चतुरक्षरं वा

घोषवदाद्यंतरंतस्थं दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धितमयुजाक्षरमाकारांतं स्त्रियै तद्धितं द्वे अक्षरे यस्य तत् द्व्यक्षरं चत्वारि

अक्षराणि यस्य तच्चतुरक्षरं अनयोर्विकल्पः किंच घोषवदादि घोषवदक्षरं आदौ यस्य नाम्नः तत् घोषवदादि घोषवंति चा

क्षराणि गघङ जझञ डढण दधन बभम ह इत्येतानि अंतरंतस्थं अंतर्मध्ये अंतस्था यस्य तदंतरंतस्थं अंतस्था यरल

वाः दीर्घाभिनिष्ठानं दीर्घमहूस्वं अभिनिष्ठानमवसानं यस्य तत् दीर्घाभिनिष्ठानं कृतं कृत्प्रत्ययांतं कुमारस्य नामधेयं

कुर्यात् पक्षांतरे कृतं पितामहादिनाम तत् कुर्यात् न तद्धितं तद्धितप्रत्ययांतं न कुर्यात् स्त्रियानाम्नि विशेषमाह अयु रामः

जाक्षरं अयुजानि विषमाणि त्र्यादीन्यक्षराणि यस्मिन्नाम्नि तदयुजाक्षरं आकारांतं आकारो अंते यस्य तदाकारांतं ४४

74

थं पूर्ववत् आहिताग्निप्रवासप्रकरणोक्तवत् तद्यथा गृहामाबिभीतेत्यारभ्य उपहूतो गृहेषु न इत्येतैस्त्रिभिर्मंत्रैः गृहानुपस्थाय क्षेमाय व इत्यादिना शंयोरित्यंतेन मंत्रेण गृहं प्रविशेत् केचित्तु सूत्रकारेण गृहोपस्थानमात्रविधानात् मंत्रवत्प्रवेशं नेच्छंति पुत्रं दृष्ट्वा जपत्यंगादंगात्संभवसि हृदयादधिजायसे आत्मा वै पुत्रनामासि स जीव शरदः शतमिति पुत्रं आत्मजं दृष्ट्वा विलोक्य अंगादंगादित्यादिकं मंत्रं जपति अथास्य मूर्द्धानमवजिघ्रति प्रजापतेष्ट्वेति अथ जपानंतरं अस्य पुत्रस्य मूर्द्धानं शिरः अवजिघ्रति अवाचीनं जिघ्रति केन मंत्रेण प्रजापतेष्ट्वा हिंकारेणावजिघ्रामि सहस्रायुषाऽसुकशर्मन्जीव शरदः शतमित्यंतेन मंत्रेण सकृत् मूर्धानमवघ्राय द्विस्तूष्णीमवजिघ्रति पुनः गवां त्वा हिंकारेणेति च त्रिः पुनर्गवां त्वा हिंकारेणावजिघ्रामि सहस्रायुषाऽसुकशर्मन्जीव शरदः शतमिति मंत्रेण सकृत मूर्द्धानमवजिघ्राय द्विस्तूष्णीमवजिघ्रति दक्षिणेस्य कर्णे जपति अस्मे प्रयंधीति अस्य पुत्रस्य दक्षिणे कर्णे श्रवणे अस्मे प्रयन्धि मघवन्नृजीषिन्निंद्र रायो विश्ववारस्य भूरेः अस्मे शतं शरदो जीवसे धा अस्मे वीरांछश्वत इंद्र शिप्रिन्निति मंत्रं जपति ॥ ॥ अथ सव्ये वामकर्णे इंद्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नामित्यंतं मंत्रं जपति स्त्रियै तु मूर्धानमेवावजिघ्रति तूष्णीं स्त्रियाः पुत्रिकायाः मूर्धानमेव अवजिघ्रति तूष्णीं वि

तद्धितंतद्धितप्रत्ययांतं स्त्रियेस्त्रियानामकुर्यादित्यनुषंगः अपिचशर्मब्राह्मणस्य वर्मक्षत्रियस्य गुप्तेतिवैश्यस्य ब्राह्म
णस्यविप्रस्यपूर्वोक्तलक्षणनामांतेशर्मेति क्षत्रियस्यपूर्वोक्तलक्षणनामांतेवर्मेतिवैश्यस्यपूर्वोक्तनामांतेगुप्तेतिपदंकुर्या
त् अथवाब्राह्मणस्यनामशर्ममंगलप्रतिपादकंकुर्यात् क्षत्रियस्यवर्मशौर्यरक्षावाप्रतिपादकं वैश्यस्यगुप्तेतिधनव
त्ताप्रतिपादकं शूद्रस्यप्रेष्यत्वप्रतिपादकं इतिवोद्धव्यं इतिसूत्रार्थः अथप्रयोगः सूतकांतद्वितीयदिनेनामकरणनिमि
त्तकंमातृपूजापूर्वकंआभ्युदयिकश्राद्धंविधायअन्यब्राह्मणत्रयंभोजयित्वापिताकुमारस्यद्यक्षरमित्यादिनोक्तलक्ष
णनामकरोतियथाशिष्टाचारं देवराजशर्माइत्यादि चतुर्थेमासिनिष्क्रमणिकाकुमारस्यजन्मतश्चतुर्थेमासिनिष्क्रम
णिका गृहाद्बहिर्निष्क्रमणंकरोतिपितासूर्यमुदीक्षयतितच्चक्षुरिति अथतच्चक्षुर्देवहितमित्यादिनाभूयश्चशरदःशत
दित्यंतेनमंत्रेणश्रीसूर्यंभगवंतंरश्मिमालिनंउदीक्षयति कुमारंप्रदर्शयतिपिताइतिसूत्रार्थः ॥ अथप्रयोगः जन्मदि
नेजन्मनक्षत्रेवाप्राणानायम्यदेशकालौस्मृत्वाअस्यकुमारस्यगृहान्निष्क्रमणंकरिष्येइतिसंकल्प्यतदंगत्वेनचतुर्थमासिक्ष
मेदिनेमातृपूजाभ्युदयिकेविधायमात्राअंकेधृतंकुमारंगृहाद्बहिरानीयतच्चक्षुर्देवहितंमंत्रेणशिशोःसूर्यस्यउदीक्षणंपि
ताकारयति प्रोष्येत्यगृहानुपतिष्ठतेपूर्ववत् प्रोष्यप्रवासादेत्यगृहान्गृहस्थितान्भार्यापुत्रादीन्उपतिष्ठतेप्रार्थयते कु

नामंत्रेण एवकारेणादर्शनजपकर्णजपयोर्निवृत्तिः १८ षष्ठेमासेन्नप्राशनं ॥ जन्मतःषष्ठेमासेकुमारस्यअन्नप्राशनंकर्म
कुर्यात् स्थालीपाकंश्रपयित्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोति अन्नप्राशनसेतिकर्त्तव्यताविशेषमाह स्थालीपाकंचरुंय
थाविधिश्रपयित्वाआघारावाज्यभागौहुत्वाद्वेआहुतीर्जुहोति देवींवाचमित्यादिवाजोनोअद्येतिचद्वितीयामित्यंतं सूत्रेआ
ज्येनदेवींवाचमित्यादिकयाऋचाएकामाहुतिंजुहुयात् इदंवाचेइतित्यागंविधाय चकारात्पुनर्देवींवाचमित्येतस्यांतेवाजो
नः यथादेवींवाचमितिवाजोनोअद्येतिचद्वाभ्यामृग्भ्यांद्वितीयामाज्याहुतिंहुत्वाइदंवाचे वाजायचेतित्यागंकुर्यात् स्थाली
पाकस्यजुहोति स्थालीपाकस्यचरोः प्राणेनान्नमशीयेत्यादिभिश्चतुर्भिर्मंत्रैश्चतस्रश्चाहुतीर्जुहोति ततः स्विष्टकृदादिप्रा
शनांतंविधाय सर्वान्रसान्सर्वमन्नमेकतोद्धृत्याथैनंप्राशयेत्तूष्णींहंतेतिवाहंतकारंमनुष्याइतिश्रुतेः सर्वान्मधुरादीन्
रसान्सर्वमन्नंभक्ष्यभोज्यलेह्यपेयचोष्यादिएकतोद्धृत्य एकतोद्धृत्येत्यत्रविसर्जनीयलोपेपिपुनःसंधिरार्षः एकतःएक
स्मिन्पात्रेउद्धृत्यकृत्वाअथानंतरंएनंकुमारंप्राशयेत् तूष्णींमंत्ररहितंहंतेतिवामंत्रेण मंत्रकृतःहंतकारंमनुष्याइति
श्रुतेः हंतकारंमनुष्याउपजीवंतिइतिश्रवणात् भारद्वाज्यामांसेनवाक्प्रसारकामस्यकपिंजलमांसेनान्नाद्यकाम
स्यमत्स्यैर्जवनकामस्यकृकषायाआयुष्कामस्यआड्याब्रह्मवर्चसकामस्यसर्वैःसर्वकामस्यान्नपर्यायवा अत्रगुणफल

माह भारद्वाज्याः पक्षिण्याः मांसेनकुमारस्यप्राशनंकारयितव्यंभवति कस्यपितुःकथंभूतस्यवाक्प्रसारकामस्यवाचः
प्रसारोवहुलत्वंततत्कुमारस्यकामयते इतिवाक्प्रसारकामः तस्यकर्त्तरिषष्ठीकृत्यप्रत्ययान्तत्वात् एवमन्नाद्यकामस्यक
पिंजलमांसेनएवमुत्तरत्रापिअयमर्थः यदिकुमारअयंवाग्मीस्यादितिकामयेत् तदाभारद्वाज्यामांसंप्राशयेत्यदिकु
मारोऽन्नादःस्यादितिकामयेत्तदाकपिंजलमांसंप्राशयेत् कपिंजलः करंडवाभैरिवामपूरोवाकेचित्तित्तिरएवेति यदिकु
मारोयंजवनःशीघ्रगामीस्यात्तदायथासंभवंमत्स्यान्प्राशयेत् सयदिकुमारःदीर्घायुःस्यादितिकामयेत् तदाकृकषायामां
संप्राशयेत् यदिकुमारोब्रह्मवर्चसीस्यादितिकामयेततदाआद्यामांसंप्राशयेत् यदिवाक्प्रसारादीनिब्रह्मवर्चसांतानिस
र्वाणिकुमारस्यभवंत्वितिकामयेत्तदाभारद्वाज्यादीनामाद्यंतानांसर्वाणिमांसानिक्रमेणप्राशयेत् अन्नपर्यायवा अ
न्नपरिपाद्यावाअन्नवदेकीकृत्यप्राशयेदित्यर्थः अन्नपर्यायेतिअविभक्तिकमार्षपदं ततोब्राह्मणभोजनं ततः
कर्मसमाप्तोएकस्यब्राह्मणस्यभोजनंकारयितव्यं अत्रकांडपरिसमाप्तौद्विरुक्तिः यथाकात्यायनसूत्रेअध्याय
परिसमाप्तोउपस्पृशेदपउपस्पृशेदप इतिसूत्रार्थः ॥अथप्रयोगः॥कुमारस्यषष्ठेमासेचंद्रताराएनुकूलेशुभेदिनेमा
तृपूजापूर्वकंनांदीमुखश्राद्धंविधायपंचभूसंस्कारान्कृत्वालौकिकाग्निंस्थापयित्वाब्रह्मोपवेशनाद्याज्यभागांतंविद

78

ध्यात् तत्र आज्येन देवीं वाचमजनयंत देवास्तां विश्वरूपाः पशवो वदंति सा नो मंद्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहेति प्रथमा इदं वाचे इति त्यागं विधाय पुनर्देवीं वाचमित्येतस्यांते वाजो नो अद्य प्रसुवाति दानं वाजो देवा २ ऋतुभिः कल्पयाति वाजो हि मा सर्ववीरं जजान विश्वा आशा वाजपतिर्जयेयं स्वाहेति द्वितीयं इदं वाचे वाजाय चेति त्यागं कुर्यात् अथ स्थालीपाकेन चतस्र आहुतीर्जुहोति तद्यथा प्राणेनान्नमशीय स्वाहा इदं प्राणाय अपानेन गंधानशीय स्वाहा इदमपानाय चक्षुषा रूपाण्यशीय स्वाहा इदं चक्षुषे श्रोत्रेण यशोऽशीय स्वाहा इदं श्रोत्राय ततः स्थालीपाकेन स्विष्टकृतं हुत्वा महाव्याहृत्यादि प्राजापत्यांता नवाहुतीराज्येन हुत्वा संस्रवप्राशनं दक्षिणादानांतं कृत्वा सर्वान्नरसान् सर्वं चान्नं एकस्मिन् पात्रे समुद्धृत्य सकृदेव कुमारं तूष्णीं प्राशयेत् हंतेति वा मंत्रेण स यदि कुमारस्य वाङ्मित्वमिच्छेत्तदा भारद्वाज्या मांसं प्राशयेत् यद्यन्नाद्यत्वं कामयेत तदा कपिंजलमांसं यदि जवनत्वं तदा मत्स्यमांसं यदि दीर्घायुत्वं तदा कृकषायाः मांसं यदि ब्रह्मवर्चसं तदा आढ्यामांसं यदि सर्वकामस्तदा सर्वमांसानि क्रमेण प्राशयेत् एकीकृत्य वा अस्य कर्मणः समृद्ध्यर्थं ब्राह्मणमेकं भोजयिष्ये इति संकल्प्य ब्राह्मणं भोजयेत् ॥ ॥इत्यन्नप्राशनं॥ ॥इत्यग्निहोत्रिहरिहरविरचितायां पारस्करगृह्यसूत्रव्याख्यानपूर्विकायां प्रयोगपद्धतौ प्रथमकांडः समाप्तः॥ ॥अथ चूडाकरणं॥

गृ॰सू॰ शांतौनंत्रेणासूत्रयति सांवत्सरिकस्यचूडाकरणंतृतीयेवाऽप्रतिहते संवत्सरमव्दंअतिक्रांतःसांवत्सरिकः तस्यकुमार

भा॰टी॰ स्यचूडाकरणंचूडाकर्मकुर्यात् तृतीयेवासंवत्सरेअप्रतिहतेअत्मावशिष्टे यथामंगलंवासर्वेषां यद्वायथामंगलंयथा

४७ कुलाचारं एतदुक्तंभवति यस्यकुलेसांवत्सरिकस्यचूडाकर्मक्रियते तस्यसांवत्सरिकस्ययस्यतृतीयेव्दे तस्यतदाइति

व्यवस्थायस्यकुलेनास्तिनियमः तस्ययदृच्छयाविकल्पः अन्येतुयथामंगलशब्देनधर्मशास्त्रांतरेविहितकालांतरो

पलक्षणमाहुः अतश्चसर्वेषांतुल्यविकल्पः षोडशवर्षस्यकेशांतःषोडशवर्षाण्यतीतानियस्यअसौषोडशवर्षः तस्य

सप्तदशेवर्षेकेशांतःकेशांताख्यःसंस्कारोभवति अत्रयद्यपिसूत्रक्रमोन्यथातथापिकेशांतस्यकालविकल्पाभावात्

चूडाकरणएवकालविकल्पइतिहेतोः यथामंगलंवासर्वेषामितिसूत्रंपूर्वंव्याख्यातं पाठक्रमादर्थक्रमोवलीयानि

तिन्यायात् ब्राह्मणान्भोजयित्वामाताकुमारमादायाप्लाव्याहतेवाससीपरिधाप्यांकआधायपश्चादग्नेरुपविशति

एवंकालमभिधायकर्माभिधत्ते चूडाकरणागतयात्रीन्ब्राह्मणान्भोजयित्वा माताजननीकुमारंपुत्रंचूडाकरणा

र्हंआदायगृहीत्वाआप्लाव्यस्नापयित्वाअहतेनवेसकृद्धौतेवाससीद्वेवस्त्रेपरिधाप्यपरिहितेकारयित्वाअंतरीयोत्तरीये

नअंकेउत्संगेआधायस्थापयित्वापश्चादग्नेःअग्नेःपश्चिमतउपविशतिआस्ते अन्वारब्धआज्याहुतीर्हुत्वाप्राशनांते

रम:
४७

त्वर्थो बलादन्यत्र नीयते इति न्यायात् धातूनामनेकार्थत्वाच्चेत्यत्र प्रपूर्व्वो वपतिरभिनिधानार्थः छेदनार्थत्वे तु उत्तरसूत्रविहि
तप्रच्छेदनानर्थक्यं प्रसज्येत येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् तेन ब्रह्माणो वपतेदमस्यायुष्य
जरदष्टिर्यथासदिति सकेशानि प्रच्छिद्यानडुहे गोमयपिण्डे प्रास्यत्युत्तरतो ध्रियमाणे येनावपदिति मन्त्रेण केशसहिता
नि कुशतरुणानि प्रच्छिद्य खंडयित्वाग्नेरुत्तरतो भूभागे ध्रियमाणे स्थाप्यमाने आनडुहे आर्षभे गोमयपिण्डे गोशकृति पिं
डे प्रास्यति प्रक्षिपति एवं द्विरपरं तूष्णीं एवमुक्तेन प्रकारेण द्विः द्विवारं उंदनादि गोमयपिण्डनिधानांतं तूष्णीं मन्त्र
रहितं कुर्य्यात् इतरयोश्चोंदनादि इतरयोः पश्चिमोत्तरयोः गोदानयोः उंदनादि छेदनप्रभृति कर्म्म चकारात्सकृ
न्मन्त्रकं द्विरमन्त्रकं भवति अथ पश्चात् त्र्यायुषमिति अथ दक्षिणगोदानस्य त्रिरुंदनादिप्रच्छेदनानंतरं पश्चाद्गो
दाने विशेषमाह त्र्यायुषमिति त्र्यायुषं जमदग्नेरित्यादिना मन्त्रेण सकेशानि कुशतरुणानि सकृत्प्रच्छिद्य तूष्णीं द्विः
प्रच्छिद्य गोमयपिण्डे प्रास्यति अथोत्तरतः अथानंतरं उत्तरगोदाने उंदनादि गोमयपिण्डनिधानान्ते विशेषमा
ह येन भूरिश्चेति स्वस्तय इत्यनेन मन्त्रेण सकृत् सकेशानां कुशतरुणानां प्रच्छेदनं त्रिः क्षुरेण शिरः प्रदक्षिणं परि
हरति समुखं केशान्ते त्रिः त्रीन्वारान् क्षुरेण शिरः मूर्द्धानं प्रदक्षिणं यथा भवति तथा परिहरति शिरसः समंतात्प्रद

शीतास्वप्सूष्णा आसिंचति ततअन्वारब्धः ब्रह्मणाउपस्पृष्टः आज्याहुतीः आघारादिस्विष्टकृदंताश्चतुर्दशहुत्वासंस्र
वप्राशनांते शीतासु अप्सु उष्णा अपआसिंचति प्रक्षिपति वक्ष्यमाणमंत्रेण अन्वारब्धग्रहणेन नित्याज्याहुतिहोमो
नियम्यते उष्णेन वायउदकेनेह्युदिति केशान्वयेति केशश्मश्रूनि च केशांते केशांते पुनः उष्णेन वायउदकेनेह्युदिति केश
श्मश्रुवपतीति विशेषः अथात्र नवनीतपिंडं घृतपिंडं दध्नोवा प्रास्यति अथ उष्णोदकसेकानंतरं अत्र आस्वप्सु नवनीतपिं
डं घृतपिंडं दध्नोवापिंडं प्रास्यति अप्सु क्षेपणे प्रक्षिपति ततआदाय दक्षिणं गोदानमुंदति सवित्राप्रसूताइति ततस्ता
भ्योअद्भ्यः उलुकेनैकदेशमादाय दक्षिणं गोदानं शिरसो दक्षिणप्रदेशस्थं गोदानकेशसमूहं उंदति क्लेदयति आ
र्द्रीकरोतीत्यर्थः केनमंत्रेण सवित्राप्रसूतेत्यादिना दीर्घायुत्वाय वर्चसइत्यंतेन त्रेण्या शलल्या विनीय त्रीणिकुशतरु
णान्यंतर्दधात्योषधइति त्रिण्या त्रिश्वेतया शलल्या शल्यकपक्षकंटकेन विनीय पृथक् पृथक् कृत्वा पूर्वेदिनाधिवासि
ता केशलतिका तस्या अंतर्मध्ये अंतरा त्रीणि त्रिसंख्याकानि कुशतरुणानि दर्भपत्राणि दधाति धारयति ओषधे त्राय
स्वेति मंत्रेण शिवो नामेति लोहक्षुरमादाय निवर्तयामीति प्रवपति ततः शिवो नामेत्यनेन मंत्रेण लोहक्षुरं ताम्रपरिस्कृत
मायसं क्षुरं आदाय गृहीत्वा दक्षिणकरेण निवर्तयामीत्यनेन मंत्रेण प्रवपति तत्क्षुरं कुशतरुणान्यभिनिदधाति उपसर्गेण धा

क्षिणांक्षुरंस्नामयतीत्यर्थः तत्रमंत्रमाह यत्क्षुरेणेत्यादिमास्यायुः प्रमोषीरित्यंतं केशांतेचसुखमितिपदंप्रक्षिपेत्मंत्रे
आवपेत् ताभिरद्भिः शिरःसमुद्य नापिताय क्षुरंप्रयच्छन् क्षुण्वंपरिवपेति ताभिः शीतोष्णाभिरद्भिः कुमारस्यशिरःसमुद्यआ
र्द्रं विधाय नापिताय क्षौरकर्त्रे जातिविशेषाय क्षुरं अक्षुण्वंपरिवपेत्यनेनमंत्रेणप्रयच्छति यथामंगलंकेशशेषकरणंकेशा
नांशेषकरणंशिखास्थापनंकेशशेषकरणं यथामंगलंमंगलंकुलाचारव्यवस्थामनतिक्रम्यभवति कुलाचारश्च
बहुधा तद्यथा लौगाक्षिः तृतीयस्यवत्सरस्यभूयिष्ठेगतेचूडांकारयेत् दक्षिणतः कवुजावसिष्ठानांउभयतोऽत्रिकश्य
पानां मुंडाभृगवः पंचचूडाआंगिरसः वाजिमेके मंगलार्थंशिखिनोन्यइति अनुगुप्तमेतंसकेशंगोमयपिंडंनिधा
यगोष्ठेपल्वलउदकांतेवा अनुगुप्तमाहृतएनंगोमयपिंडंसकेशंकेशैः सहितंनिधायस्थापयित्वागोष्ठेगवांव्रजे
पल्वलेअल्पोदकेसरसिउदकान्तेवा आचार्यायवरंददाति स्वकीयायआचार्यायगांददाति संवत्सरंब्रह्मचर्यं के
शांतकर्मानंतरंसंवत्सरंयावत् ब्रह्मचर्यंभवेत् द्वादशरात्रंषड्रात्रंत्रिरात्रंमंततः केशान्तानंतरंयावज्जीवमवप
नंचविहितवपनव्यतिरेकेणाविहितवपनंच गंगायांभास्करक्षेत्रेमातापित्रोर्गुरौमृते आधानेसोमपानेचवपनंसप्त
सुस्मृतं तथावपनंचानुभाविनांप्रेतकनीयसांवपनं तथामुंडनंचोपवासश्चसर्वतीर्थेष्वयंविधिः वर्जयित्वाकुरुक्षेत्रं

शावंदुःखमनुभवंतीत्यनुभाविनः सपिंडाः अनुपश्चाद्भवंतीत्यनुभाविनः १८

84

र.सु. भा.टी. ५९

विशालं तु विरजं गयां नैमिषं पुष्करं गयामिति पाठान्तरं प्रयागे वपनं कुर्यात् गयायां पिण्डपातनं दानं दद्यात् कुरुक्षेत्रे वाराण
स्यां तनुं त्यजेदित्यादिवचनाभिश्चयत्प्रतिपादितनिमित्तेषु अत्र गर्भाधानादिषु विवाहपर्यंतेषु संस्कारकर्मसु मुख्य
स्त्वं न पिता एव कर्त्ता तदभावे सन्निहितोन्यः तथा च स्मरणं स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्मसु पिण्डानोद्वाहना
त्तेषां तस्याभावे पितृक्रमात् एतान्युक्तानि नामकरणादीनि चूडाकरणांतानि मंत्ररहितानि दुहितॄणामपि कुर्यात् य
था ह याज्ञवल्क्यः तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समंत्रकः इति तथा शूद्रस्य यथाह यमः शूद्रोप्येवंविधः कार्यो वि
ना मंत्रेण संस्कृतः न केनचित्समसृजच्छंदसा तं प्रजापतिः एवं विधः गर्भाधानादिचूडाकरणान्तैः संस्कारैर्वैजिकगा
र्भिकपापशून्यः विना मंत्रेण तूष्णीं यतस्तं शूद्रमेकतमेनापि छंदसा वेदेन समसृजेत् समयोजयत् तथा ब्रह्मपुरा
णे विवाहमात्रं संस्कारं शूद्रोपि लभतां सदा मात्रशब्देन विहितेतरसंस्कारनिवृत्तिश्च यमब्रह्मपुराणवचनाभ्यां शू
द्रस्य गर्भाधानपुंसवनसीमंतजातकर्मनामधेयनिष्क्रमणान्नप्राशनचूडाकरणविवाहाः नव संस्कारा विहितास्ते च
तूष्णीमितरेषां निवृत्तिः प्रसंगादनुपनीतधर्मा लिख्यन्ते मनुः नास्मिन्युज्यते कर्म किंचिदामौंजिबंधनात् नाभि
व्याहारयेद्ब्रह्म स्वधानिनयनादृते शूद्रेण हि समस्तावद्यावद्वेदे न जायते वृद्धशातातपः प्राक् चूडाकरणाद्बालः प्राग्

र.सु. ५९

शनाच्छिस्युः कुमारस्तु सविज्ञेयो यावन्मौंजीनिबंधनं शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतं रजस्वलादिसंस्पर्शे स्ना

नमेवं तु कुमारकैः गौतमः प्रागुपनयनात्कामचारभक्षः नित्यमद्यं ब्राह्मणोनुपनीतोपि बर्जयेत् उच्छिष्टादावप्रयतान
स्युः महापातकवर्जं ब्राह्मण्यमानापित्रोरथोच्छिष्टं बालो भुंजन्नभवेत्सुखी संस्कारयोजनं चस्मृत्यंतरोक्तं यथाह याज्ञ
वल्क्यः एवमेनः शमं याति बीजगर्भसमुद्भवं अंगिराः चित्रकर्म्म यथानेकैरंगैरुन्मील्यते शनैः ब्राह्मण्यमपि तद्व
त्स्यात्संस्कारैर्विधिपूर्वकैः मनुः गार्भैर्होमैर्जातकर्म्मचौडमौंजीनिबंधनैः वैजिकं गार्भिकं चैनो द्विजानामपमृज्यते
हारीतः गर्भाधानवदुपेतो ब्रह्मगर्भं संदधाति पुंसवनात्पुंसीकरोति फलस्नपनात्पितृजं पाप्मानमपोहति जातक
र्म्मणा प्रथममपोहति नामकरणेन द्वितीयं प्राशनेन तृतीयं चूडाकरणेन चतुर्थं स्नानेन पंचमं एतैरष्टभिर्गार्भसंस्का
रैर्गर्भोपघातात्पूतो भवति उपनयनाद्यैस्त्रिव्रतैश्चाष्टभिः स्वच्छंदसम्मितो ब्राह्मणः परपात्रं देवपितॄणां भवति छं
दसायनं सुमंतुः तत्र ब्राह्मणक्षत्रियवैश्यानां वृत्तिर्गर्भाधानपुंसवनसीमंतोन्नयनजातकर्म्मनामकरणनिष्क्रमणा
न्नप्राशनचूडोपनयनचत्वारिवेदव्रतानि स्नानं सहधर्म्मचारिणीसंयोगः पंचानां यज्ञानामनुष्ठानं देवपितृमनुष्य
भूतब्रह्मयज्ञानामेतेषां चाष्टकाः पार्व्वणश्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति पाकयज्ञसंस्थाः अग्न्याधेयमग्निहो

त्रं दर्शपौर्णमासौ चातुर्मास्याग्रयणेष्टिर्निरूढपशुबंधः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः अग्निष्टोमोत्यग्निष्टोम उक्थ्य
षोडशी वाजपेयोतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्था एते चत्वारिंशत्संस्काराः हारीतः द्विविध एव संस्कारो भवति
ब्राह्मो दैवश्च गर्भाधानादिस्नानान्तो ब्राह्मः पाकयज्ञहविर्यज्ञसौम्याश्चेति दैवः ब्राह्मसंस्कारसंस्कृत ऋषीणां समा
नतां सालोक्यतां सायुज्यतां गच्छतीत्यल मति प्रसंगेन इति सूत्रार्थः॥ ॥अथ प्रयोगः॥ तत्र सांवत्सरिकस्य तृती
ये वा वर्षे भूयिष्ठे गते कुमारस्य चूडाकरणाख्यं कर्म कुर्यात् कुलधर्म्मव्यवस्थया यावा देवयोगाद्गृह्योक्तकालालाभे स्मृ
त्युक्तेष्वन्यतमकाले मातृपूजामाभ्युदयिकं च कृत्वा ब्राह्मणत्रयं भोजयित्वा बहिः शालायां परिसमूहनादिभिः
पंचभिः संस्कारैः संस्कृते लौकिकाग्निं स्थापयेत् अथ माता कुमारमादाय स्नापयित्वा वासोयुगं परिधाप्य उत्संगे निधाय अग्नेः प
श्चिमतः उपविशति ततोन्वारंभोपवेशनाद्याज्यभागांते विशेषः तंडुलवर्जं माषादनं उपकल्पनीयानि च शीतोदक
स्योदकं नवनीत घृत दधि पिंडानामेकतमं त्रयेणीशललीत्रीणि त्रीणि कुशतरुणानि पृथक् कृत्वा आनि नव ताम्र
परिस्कृत आयसः क्षुरः गोमयपिंडनापितश्चेति ततः पवित्रकरणादि पर्युक्षणांते आघारादि स्विष्टकृदंतं चतु
र्दशाहुतिहोमं विधाय संस्रवप्राशनं पूर्णपात्रवरयोरन्यतरं ब्रह्मणे दद्यात् ततः शीतास्वप्सु उष्णा अप आसिंच्य

स्य केषांचिद्धि शिरोमास्यायुः प्रमोषीरिति तेन मंत्रेण शिरसः समंतात्प्रदक्षिणं क्षुरं भ्रामयति सकृन्मंत्रेण द्विस्तूष्णीं ततस्ते
नैवोदकेन समस्तशिर आर्द्रमापाद्य अक्षरावपरिवपेत्यनेन मंत्रेण नापिताय क्षुरं समर्पयति सच नापितः सकेशवपनं कु
र्वन्यथोक्तं केशशेषकरणं करोति ततः सकेशं गोमयपिंडं अनुगुप्ते पल्वले गोष्ठे वा उदकांते वा निधाय चूडाकरणक
र्ता स्वाचार्याय वरं ददाति केशांतेपि षोडशवर्षे सप्तदशे वर्षे इयमेव चूडाकरणोक्ता इतिकर्तव्यता एतावांस्तु विशेषः
उष्णोदकसेकमंत्र उष्णेन वायउदकेनेह्यदितेकेशाश्मश्रुवप तथा क्षुरपरिहरणे मुखसहितं शिरः परिहरति तत्र परिह
रणमंत्रे च यत्क्षुरेण मज्जतेत्यादिमास्यायुः प्रमोषीर्मुखम् तथा यस्य यस्य केशांतः स स्वाचार्याय गां ददाति संवत्सरं
वा द्वादशरात्रं षड्रात्रं त्रिरात्रं वा ब्रह्मचर्यं करोति शक्त्यपेक्षया विकल्पः तथा केशांताटूर्ध्वं शास्त्रीयवपनव्यतिरेकेण
यावज्जीवमवपनं शास्त्रीयवपनं च॥ ॥अष्टवर्षं ब्राह्मणमुपनयेद्गर्भाष्टमेषु वा अष्टौ वर्षाणि अतीतानि यस्य असौ अ
ष्टवर्षस्तं ब्राह्मणं द्विजातिमुपनयेत् उपनयनाख्येन संस्कारेण संस्कुर्यात् गर्भाष्टमेषु वा गर्भः अष्टमो येषां तानि ग
र्भाष्टमानि तेषु वा उपनयेत् ततश्च जन्मतो नवमेऽष्टमे वा उपनयेदित्यर्थः एकादशवर्षं राजन्यं एकादशवर्षाण्य
तीतानि यस्य असौ एकादशवर्षस्तं जन्मतो द्वादशे इत्यर्थः राजन्यं क्षत्रियं उपनयेदित्यनुषज्यते द्वादशवर्षं वैश्यं द्वा

87

उष्णेन वाय उदकेनेह्यदिते केशान्वपेत्यनेन मंत्रेण अत्र उष्णोदकमिश्रितशीतोदके उपकल्पितं नवनीताद्यन्यतमं
पिण्डं प्रक्षिपति तदुदकमादाय सवित्रा प्रसूता दैव्या आप उंदंतु ते तनूं दीर्घायुत्वाय वर्चसे इत्यनेन मंत्रेण दक्षिणं गो
दानमुंदति ततस्त्र्येण्या शलल्या केशान्विनीय ओषधे त्रायस्वेति मंत्रेण कुशतरुणान्तर्द्धाय शिवो नामासि स्वधितिस्ते
पिता नमस्ते अस्तु मा मा हिंसीरित्युपकल्पितं क्षुरमादाय कुशतरुणान्तर्हितेषु केशेषु निवर्त्तयाम्यायुषेन्नाद्याय प्रजन
नाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्यायेत्यनेन मंत्रेण क्षुरमभिनिदधाति येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुण
स्य विद्वान् तेन ब्रह्माणो वपतेदमस्यायुष्यं जरदष्टिर्यथासदित्यनेन मंत्रेण सकेशान् तरुणानि प्रच्छिद्य आनडुहे गोमयपि
ण्ड उत्तरतो ध्रियमाणे प्रक्षिपति एवमेवापरं वारद्वयं उंदन केशविनयन कुशतरुणान्तर्द्धान क्षुराभिनिधानं सकेश कुशत
रुणप्रच्छेदन गोमयपिण्डप्रासनानि तूष्णीं कुर्यात् तथा पश्चिमोत्तरयोर्गोदानयोः एवमेव सकृत्स मंत्रकं द्विस्तूष्णीं
करोत्येतावान्विशेषः पश्चिमगोदाने त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषमिति छेद
नम् उत्तरतो गोदाने येन भूरिश्चरा दिवं ज्योक्च पश्चाद्धि सूर्यं तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्त्यै
इत्यनेन मंत्रेण छेदनं अन्यत्सर्वं मुंदनादि गोमयपिण्डप्रासनांतं समानं ततो यत्क्षुरेण मज्जयिता सुपेशसा वप्ता वा वपति

दशवर्षाण्यतिक्रान्तानि यस्य स तथा तं जन्मतस्त्रयोदशे वैश्यमुपनयेत् यथा मंगलं वा सर्वेषाम् पक्षांतरमाह अथवा स
र्वेषां ब्राह्मणक्षत्रियविशां यथा मंगलं यथा मंगल धर्म्मं यद्वा यथा मंगलशब्देन स्मृत्यंतरोक्तः पंचवर्षादि कालसंग्रहः यथाह म
नुः ब्रह्मवर्चसकामस्य कार्यो विप्रस्य पंचमे राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे आपस्तंबोपि अथ काम्यानि सप्तमे ब्र
ह्मवर्चसकामं अष्टमे आयुःकामं नवमे तेजस्कामं दशमे अन्नाद्यकामं एकादशे इंद्रियकामं द्वादशे पशुकाममुपनयेत् त
था वसंते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यं गर्भाष्टमेषु वर्षेषु वसंते ब्राह्मण आत्मानमुपनाययेत् एकादशे क्षत्रियो
ग्रीष्मे द्वादशे वैश्यो वर्षासु वर्षाशब्देन शरदेवाभिधीयते ऋतुः संवत्सरो ग्रीष्मो वर्षा हेमंत इति यास्कवचनात् वर्षास्वंतर्भ
वति शरत् एवमुपनयनकालमभिधायेदानीं कर्म्माह ब्राह्मणान् भोजयेत् च त्रीन् ब्राह्मणान् भोजयेत् आशयेत् तं
च कुमारं वपनानंतरं आशयेदिति चकारेणानुषज्यते पर्युप्तशिरसमलंकृतमानयंतिपरसंवृतः उप्तमुंडितशिरो यस्य सपर
र्युप्तशिरास्तं अलंकृतं यथा संभवं रत्नसुवर्णनिर्म्मितैः कुंडलाद्यलंकारैः आनयंति आचार्यपुरुषाः आचार्यसमीपं आ
चार्यलक्षणं यमेनोक्तं सत्यवाक् धृतिमान्दक्षः सर्वभूतदयापरः आस्तिको वेदनिरतः शुचिराचार्य उच्यते वेदाध्य
यनसंपन्नो वृत्तिमान्विजितेंद्रियः न याजयेद्वृत्तिहीनं वृणुयान्न तं गुरुं पश्चादग्नेरवस्थाप्य ब्रह्मचर्य्यमागामिति वाचयति

गृ.सू.
भा.द्व.
५२

ततआचार्यंमाणवकंअग्नेःपश्चिमतआत्मनोदक्षिणतअवस्थाप्यअवस्थितंकृत्वा ब्रह्मचर्यमागामितिब्रूहीतिप्रेषमुक्त्वा।
माणवकंब्रह्मचर्यमागामितिवाचयति ब्रह्मचार्यसानीतिच ब्रह्मचार्यसानीत्याचार्योमाणवकंप्रेषयतिप्रेषितश्चमाणव
कः ब्रह्मचार्यसानीतिवदेत् अथैनंवासःपरिधापयतियेनेंद्रायबृहस्पतीत्यादिवस्त्रेसेतत् अथवाचनानंतरंएनंकुमा
रंआचार्यःवक्ष्यमाणलक्षणंशाणादिवासःपरिधापयतिपरिहितंकारयतियेनेंद्रायेत्यादिमंत्रंपठित्वा मेखलांबध्नीते
ततःमेखलांमौंज्यादिकांवक्ष्यमाणलक्षणांवध्नीते कटिप्रदेशेत्रिवृतं प्रवरसंख्यग्रंथियुतं प्रादक्षिण्येनपरिवेष्टयति
इयंदुरुक्तमित्यादिनामेखलेयमित्यनेनमंत्रेणमाणवकपठितेन युवासुवासाइत्यादिदेवयन्तइत्यनेनवामंत्रेण तू-
ष्णींवा तूष्णींवामेखलांबध्नीते अत्रयद्यपिसूत्रकारेणयज्ञोपवीतधारणंनसूत्रितंतथाप्येकेवस्त्राःप्राचीनावीतिन
इतिप्रेतोदकदानेप्राचीनावीतित्वविधानात् दंडाजिनोपवीतानिमेखलांचैवधारयेदितियाज्ञवल्क्येनब्रह्मचारिणःउप
वीतधारणस्मरणात् तथासदोपवीतिनाभाव्यंसदाबद्धशिखेनच विशिखोव्युपवीतश्चयत्करोतिनतत्कृतमितिछंदो
गपरिशिष्टकात्यायनेनसामान्यतःसर्वाश्रमिणांसदायज्ञोपवीतधारणस्मरणात् यज्ञोपवीतधारणंतावदुपनयनप्रभृति
प्राप्तंतच्चक्वत्रकर्त्तव्यमित्यवसरापेक्षायांऔचित्यान्मेखलाबंधनानंतरंयुज्यते एतदेवकर्कोपाध्यायवासुदेवदीक्षितौ।

90

रामः
५२

अथ सूर्यदर्शनानंतरं आचार्यो स्य माणवकस्य दक्षिणंांसमधि दक्षिणास्कंधस्योपरि स्वं दक्षिणहस्तं नीत्वा हृदयं ते व्रते दधामि इत्यादिना बृहस्पतिष्ट्वा नियुनक्तु मह्यमित्यंतेन मंत्रेण आलभेत स्पृशति अथास्य दक्षिणं हस्तं गृहीत्वाह को नामासीति अथ हृदयालंभनानंतरं आचार्यः अस्य माणवकस्य स्वकीयेन दक्षिणहस्तेन दक्षिणं हस्तं गृहीत्वा धृत्वा को नामासि इति आह ब्रवीति असावहं भो इति प्रत्याह एवं पृष्टो माणवकः असौ अमुकशर्म्मा अहं भो ३ इति प्रत्याह प्रतिवचनं दद्यात् अथैनमाह कस्य ब्रह्मचार्यसीति भवत इत्युच्यमान इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवासाविति अथ प्रतिवचनानंतरं आचार्य एनं माणवकं कस्य ब्रह्मचार्यसीत्याह पृच्छति भवत इति माणवकेनोच्यमाने इंद्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तव असुकशर्म्मन्निति पठति अथैनं भूतेभ्यः परिददाति अथानंतरं एनं कुमारं आचार्यः भूतेभ्यः प्रजापतिप्रभृतिभ्यः परिरक्षितुं ददाति प्रयच्छति तत्र मंत्रः प्रजापतये त्वेत्यादि अरिष्ट्या इत्यन्तः ॥ ॥ प्रदक्षिणमग्निं परीत्योपविशति एवं वस्त्रदानादिभिराचार्येण संस्कृतो माणवक अग्निं प्रदक्षिणं यथा भवति तथा परीत्य परिक्रम्य पश्चादग्नेराचार्यस्योत्तरतः उपविशति आस्ते अन्वारब्ध आज्याहुतीर्हुत्वा प्राशनांते ततः ब्रह्मणान्वारब्धः आचार्य आघारादि स्विष्टकृदंताश्चतुर्दशाहुतीर्हुत्वा संस्रवप्राशनांते अत्र पुनरन्वारंभानुवादः चतुर्दशाहुतिहोमव्यतिरिक्तहोमप्रतिषेधार्थः अथैनं संशास्ति ब्रह्मचार्य

91

रेणुदीक्षितंभृतयः स्वस्वग्रंथेयज्ञोपवीतधारणमंत्रावसरेलिखितवंतः तच्चसर्वकर्मांगत्वान्मंत्रबहुत्वमतइतिमंत्रम
पिशाखांतरीयंमंत्रमपिलिखितवंतः ततोत्रयज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात् आयुष्यमग्र्यंप्रतिमुंच
शुभ्रंयज्ञोपवीतंबलमस्तुतेजइतिमाणवकपठितेनमंत्रेणउपवीतंपरिधापयति आचामयतिच अथतूष्णींमेखलापमजि
नसूत्रंसोयंकरोतिदंडंप्रयच्छतितंप्रतिगृह्णातियोमेदंडइति आचार्योमाणवकायवक्ष्यमाणलक्षणंदंडंप्रयच्छतितंचमा
णवकःस्वतंदंडयोमेदंडइत्यादिनाब्रह्मवर्चसइत्यंतेनमंत्रेणप्रतिगृह्णाति दीक्षावदेकेदीर्घसत्रमुपैतीतिवचनात् एके
आचार्यादीक्षावत्दीक्षायांयथादंडप्रदानंसोमेतथेच्छंतितत्रउच्छ्रयस्ववनस्पतइत्यादिनायज्ञसोहंचइत्यंतेनमंत्रेणयज
मानोदंडंउच्छ्रयति तद्वदत्रब्रह्मचारीकेनहेतुना दीर्घसत्रंवाएषउपैतियोब्रह्मचर्यमुपैतीत्यारभ्यब्रह्मचर्यस्यदीर्घसत्र
संपत्प्रतिपादनात् अथास्यांजलिंजलिनांजलिंपूरयत्यापोहिष्ठेतितिसृभिः अथदंडप्रदानानंतरंआचार्यःअस्यमाणव
कस्यअंजलिंस्वकीयांजलिस्थाभिरद्भिःआपोहिष्ठेत्यादिकाभिस्तिसृभिर्ऋग्भिःपूरयति अथैनंसूर्यमुदीक्षयतितत
च्चक्षुरिति अथानंतरंएनंमाणवकंसूर्यमुदीक्षस्वेतिप्रेष्यसूर्यमादित्यंउदीक्षयतिअवलोकनंकारयतिसच्चप्रेषितःतच्च
क्षुरित्यादिनाभूयश्चशरदःशतादित्यंतेनमंत्रेणसूर्यमुदीक्षते अथास्यदक्षिणांसमधिहृदयमालभतेममव्रतेतइति

गृ॰ सू॰ भा॰ ह॰ ५४

स्त्वेवगायत्रीब्राह्मणायानुब्रूयादाग्नेयोवैब्राह्मणइतिश्रुतेस्त्रिष्टुभꣳराजन्यस्यजगतींवैश्यस्यसर्वेषांवागायत्रीम्सावित्री
प्रदानस्यकालविकल्पानाह संवत्सरेउपनयनमारभ्यपूर्णेवर्षे षण्मासेषडेवमासाःषण्मासस्संख्यार्थेतद्धितश्छांदसोवृद्धिलो
पःछंदोवत्सूत्राणिभवंतीतिवचनात् तस्मिन्षण्मासेचतुर्विꣳशत्यहेचतुर्विꣳशत्याअहोभिरुपलक्षितःकालःचतुर्विꣳश
त्यहःतस्मिन् द्वादशाहेद्वादशभिरहोभिरुपलक्षितःकालोद्वादशाहस्तस्मिन् षडहेषड्भिरहोभिरुपलक्षितःकालःषडहःतस्मि
न् त्र्यहेत्रिभिरहोभिरुपलक्षितःकालस्त्र्यहस्तस्मिन् वाशब्दःसर्वेषुसंवत्सरादिषुसंबध्यते एतेकालविकल्पाःआचार्यस्यशु
श्रूषादिशिष्यगुणतारतम्यापेक्षाः एवंसामान्येनसावित्रीप्रदानस्यकालविकल्पानभिधायाधुनाब्राह्मणस्यविशेषमाह
तुशब्दःपक्षव्यावृत्तौ ब्राह्मणस्यनैतेकालविकल्पाःकिंतुक्षत्रियवैश्ययोः ब्राह्मणायसद्यएवगायत्रीमनुब्रूयात् कुतः
आग्नेयोवैब्राह्मणइतिश्रुतेः आग्नेयोअग्निदेवत्यःब्राह्मणइतिवेदवचनात् त्रिष्टुभꣳराजन्यस्यजगतींवैश्यस्यसर्वेषां
वागायत्रीं राजन्यस्यक्षत्रियस्यत्रिष्टुभं त्रिष्टुप्छंदोयस्याःसात्रिष्टुप्तांसावित्रींत्रिष्टुभं जगतीछंदोयस्याःऋचःसाज
गतीतांजगतींसावित्रींवैश्यस्य सावित्रीमनुब्रूयादित्यनुषज्यते सर्वेषांवागायत्रीम् सर्वेषांब्राह्मणक्षत्रियविशांगायत्री
मेवगायत्रछंदस्कामेवसावित्रींसवितृदेवताकांतत्सवितुरितिसकलवेदशाखाम्नातांऋचमनुब्रूयात्॥ ॥अत्रसमिदाधा

स्यपोशानकर्म्मकुरु मादिवासुषुप्थावाचंयच्छसमिधमाधेह्यपोशानेति अथानंतरमाचार्यःएनंमाणवकंसंशास्तिशिक्ष॥
यतिकथंब्रह्मचारीअसिअसानीतिमाणवकेनप्रत्युक्तःअपःअशानपिबइतिअशानीतिप्रत्युक्तःकर्म्मस्नानादिकंस्ववर्णा
श्रमविहितंकुरुविधेहिकरवाणीतिप्रत्युक्तःमादिवासुषुप्थाःस्वाप्सीरितिनस्वपामीतिप्रत्युक्तःवाचंगिरंयच्छनियमय
यच्छानीतिप्रत्युक्तःसमिधंवक्ष्यमाणप्रकारेणआधेहिअग्नौप्रक्षिपेतिअपोशानेतिपूर्ववत् अथास्मैसावित्रीमन्वाहो
त्तरतोग्नेः प्रत्यङ्मुखायोपविष्टायोपसन्नायसमीक्षमाणायसमीक्षितायदक्षिणतस्तिष्ठतआसीनायवैकेपच्छोऽर्द्धर्चशः
सर्वांचतृतीयेनसहानुवर्त्तयन् अथशासनानंतरंअस्मैब्रह्मचारिणेसावित्रींसवितृदेवत्यांगायत्रीछन्दस्कांविश्वामित्रदृ
ष्टांऋचंअन्वाहउपदिशति कथंभूतायप्रत्यङ्मुखायपश्चिमाभिमुखायपुनःकथंभूतायउपविष्टाय कअग्नेरुत्तरस्यांदि
शितथाउपसन्नायपादोपसंग्रहणादिनाभजमानायतथासमीक्षमाणायसम्यक्आचार्यमवलोकयतेतथाआ
चार्येणसम्यगवलोकिताय पक्षान्तरमाह दक्षिणतःअग्नेर्दक्षिणस्यांदिशिनिष्ठतेऊर्द्धायऊर्द्धीभूतायवाआसीनाय
उपविष्टायइत्येकेआचार्याः सावित्रीप्रदानमन्यंतेकथमन्वाह पच्छः पादंपादं अर्द्धर्चशः तदनु अर्द्धर्चमर्द्धर्चंमनन्त
दनुचसर्वांतृतीयेनवारेणसहमिलित्वाआवर्त्तयन् पठन् संवत्सरेषण्मासेचतुर्विंशत्यहेद्वादशाहेषडहेत्र्यहेवासद्य

94

नमः॥ ॥अत्रसावित्रीप्रदानोत्तरकालेसमिधांआधानंप्रक्षेपः ब्रह्मचारिणोभवति अत्राग्नाविति भाष्यकारः अत्रावप
वस्यपाठादेवसिद्धेः अत्रपाणिनाग्निंपरिसमूहति पाणिनादक्षिणहस्तेनअग्निंप्रकृतहोमाधिकरणंपरिसमूहतिसंधु
क्षयति इंधनप्रक्षेपेणवक्ष्यमाणैः पंचभिर्मंत्रैः यथा अग्नेसुश्रवः सुश्रवसंमाकुरु यथात्वमग्नेसुश्रवः सुश्रवाअसि एवं
मां सुश्रवः सौश्रवसंकुरु यथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसि एवमहंमनुष्याणांवेदस्यनिधिपोभूयासम् केचित्प
रिसमूहनेत्रीन्मंत्रान्मन्यंते तद्यथा अग्नेसुश्रवइत्यारभ्यसुश्रवसंमाकुरुइत्येकं यथात्वमग्नइत्यारभ्यसौश्रवसंकुरुइति
द्वितीयं यथात्वमग्नेदेवानांइत्यादिभूयासमित्यंतंतृतीयमिति प्रदक्षिणमग्निंपर्युक्ष्योत्थायसमिधमादधात्यग्नयेसमि
धमिति ततः प्रदक्षिणंयथाभवतितथापर्युक्ष्यदक्षिणहस्तगृहीतेनोदकेनपरिषिच्य उत्थायऊर्ध्वीभूयप्राङ्मुखस्तिष्ठन्
समिधंसमिध्यतेदीप्यतेऽग्निरनयेतिसमित् तांसमिधंआदधातिप्रक्षिपति समिल्लक्षणंछंदोगपरिशिष्टे नांगुष्ठादधि
काकार्यासमित्स्थूलतयाक्वचित् नवियुक्तात्वचाचैवनसकीटानपाटिता प्रादेशान्नाधिकान्यूनानतथास्याद्विशाखि
का नसपर्णाननिर्वीर्याहोमेषुचविजानता ब्रह्मपुराणे पालाशाश्वत्थन्यग्रोधप्लक्षवैकंकतोद्भवाः अश्वत्थोदुंबरौबिल्व
श्चंदनःसरलस्तथा शालश्चदेवदारुश्चखदिरश्चेतियाज्ञिकाः मरीचिः विशीर्णाविदलाह्रस्वावक्रासुसुषिराःकृशाःदीर्घा

गृ॰ सू॰
भा॰ ह॰
५५

स्थूलाघुणोजुष्टाः कर्मसिद्धिविनाशिकाः अस्य पूर्वश्लोकः प्रागग्राः समिधो देयास्ताश्च काम्येष्वपाटिताः काम्येषु च सशा-
ल्काद्रा विपरीता जिघांसत इति केन मंत्रेण अग्नये समिधमाहार्षं बृहते जातवेदसे यथा त्वमग्ने समिधा समिध्यस एवम
हमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिंधे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी ते
जस्वी ब्रह्मवर्चस्यन्नादो भूयासं स्वाहेत्यनेन मंत्रेण एवं द्वितीयां तथा तृतीयामेषा त इति वा समुच्चयो वा एवमनेनैव मं
त्रेण द्वितीयां समिधमादधाति तथानेनैव मंत्रेण तृतीयां मंत्रविकल्पमाह एषा ते अग्ने समिदित्यादि आ च प्यासिषीम
हीत्यनेन वा मंत्रेण अथवा अग्नये समिधमित्येषा त इति द्वयोर्मंत्रयोः समिदाधाने समुच्चयः एकान्ततश्च मंत्रद्वयांते समि
त्प्रक्षेपः इति त्रयो मंत्रविकल्पाः पूर्ववत्परिसमूहनपर्युक्षणे पूर्ववत् अग्ने सुश्रव इत्यादिभिः पंचभिर्मंत्रैः परिसमूहनप
र्युक्षणमपि पूर्ववत्कुर्यात् पाणी प्रतप्य मुखं विमृष्टे तनूपा अग्नेसि तन्वं मे पाह्यायुर्दा अग्ने स्यायुर्मे देहि वर्चोदा अग्नेसि व
र्चो मे देहि अग्ने यन्मे तन्वा ऊनं तन्म आपृणेति मेधां मे देवः सविता मेधां देवी सरस्वती मेधामश्विनौ देवावाधत्तां पुष्करस्र
जाविति पाणी हस्तौ प्रतप्य अग्नौ तापयित्वा तनूपा अग्नेसीत्यादिभिः सप्तभिर्मंत्रैः प्रतिमंत्रं पाणिभ्यां मुखं विमृष्टे ललाटा
दि चिबुकांतं प्रोंछति तत्र मेधां मे देवः सवि मेधां देवी सरस्वती अनयोराददधात्वित्यध्याहारः अत्र शिष्टाचारप्राप्ताः केचित्पदा

राम
५५

ता

थौह्निरव्यंते तत्र अंगानि च म आप्यायंतां वाक्प्राणश्चक्षुः श्रोत्रं यशो बलमिति अङ्गानि च म इत्यनेन मंत्रेण शिरःप्रभृती
नि पादांतानि अंगान्यालभेत् एवं वाक् इत्यनेन मुखे प्राण इत्यनेन नासिके चक्षुरित्यनेन चक्षुषी श्रोत्रमित्यनेन श्रवणौ
यशो बलमित्यस्य पाठमात्रं त्र्यायुषाणि कुरुते भस्मना ललाटे ग्रीवायां दक्षिणांसे हृदि च त्र्यायुषमिति प्रति मंत्रमू त्र्या
युषमित्येतैश्चतुर्भिर्मंत्रपादैः अनामिकागृहीतेन भस्मना ललाटग्रीवादक्षिणांसहृदयेषु प्रतिपादं त्र्यायुषाणि कुरुते
अत्र त्र्यायुषकरणं सूत्रकारानुक्तमपि प्रसिद्धत्वात् शिष्टपरंपराचरितत्वात् क्रियते ततो ब्रह्मचारी संध्यामुपास्याग्नि
कार्यं कृत्वा गुरुषूपसंग्रहणं वृद्धतरेष्वभिवादनं वृद्धेषु नमस्कारं कुर्यादित्यर्थः अत्र स्मृत्यंतरोक्तमभिवादनं लिख्यते
ततोऽभिवादयेद्वृद्धानसावहमिति ब्रुवन् इति याज्ञवल्क्यादिस्मृतिप्रणीतस्याभिवादनप्रयोगो यथा उपसंग्रहणं नाम अ
मुकगोत्रोऽमुकेत्येतावत्प्रवरः अमुकशर्म्माहं भो ३ श्रीहरिहरशर्म्मन् त्वामभिवादये इत्युक्त्वा कर्णौ स्पृष्ट्वा दक्षिणोत्त
रपाणिभ्यां दक्षिणपाणिना गुरोर्दक्षिणं पादं सव्येन सव्यं गृहीत्वा शिरोवनमनं अभिवादने पादग्रहणं नास्ति पादस्पर्
शनं कार्यं न वा आयुष्मान् भव सौम्यामुक इति प्लुतान्तमुक्त्वा अमुकशर्म्मन् इति प्रत्यभिवादः कार्यः आयुष्मन् भव सौ
म्येति वा प्रत्यभिवादः अत्र गुरवो मातास्तन्यदात्री च पितापितामहयोः मातामहश्चान्नदाता भयत्राताचार्यश्चोपनेता

97

गृ॰सू॰
भा॰ह॰
५६

चमंत्रविद्योपदेष्टा तेषां पत्न्यश्चोपसंग्राह्याः समावृत्तेन वाले सम वयस्के वाऽध्यापके गुरुवच्चरेत् मातुलाश्च पितृव्या
श्च श्वशुराश्च यवीयसोऽपि मत्तुल्याया अभिवाद्याः उपाध्याया ऋत्विजो ज्येष्ठभ्रातरश्च सर्वेषां पत्न्यश्चैवं मातृष्वसा पितृष्व
सा च सवर्णा भ्रातृभार्या च नित्यमभिवाद्याः विप्रोष्य तूपसंग्राह्या ज्ञातिसंबंधियोषितः विप्रोष्य विप्रं कुशलं पृच्छेत् नृपमना
मयं वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च नवाच्यो दीक्षितो नाम्ना यवीयानपि सर्वथा पूर्वेस्तमभिभाषेत भोभवत्पूक
र्मनामभिः परपत्नीमसंबंधां भगिनी चेति भाषयेत् त्रिवर्षपूर्वः श्रोत्रियोऽभिवाद्याः अत्रिवर्षाः संबंधिनश्च स्वस्रेनापि
स्वयोनिजः अन्ये च स्नानवृद्धा सदाचाराश्चाभिवाद्याः उदक्यां सूतिकां नारीं भर्तृघ्नीं गर्भपातिनीं पाषंडं पतितं व्रात्यं म
हापातकिनं शठं नास्तिकं कितवं स्तेनं कृतघ्नं नाभिवादयेत् मत्तं प्रमत्तमुन्मत्तं धावंतमशुचिं नरं वमंतं जृंभमाणं च कु
र्वन्तं दंतधावनं अभ्यक्तं शिरसि स्नानं कुर्वन्तं नाभिवादयेत् इति शातातपः बृहस्पतिस्तु जपयज्ञजलस्थं च समित्पुष्पकु
शान्तिलान् उदपात्रार्घ्यभैक्षान्नं वहंतं नाभिवादयेत् अभिवाद्य द्विजश्चैतानहोरात्रेण शुध्यति क्षत्रवैश्याभिवादने वि
प्रस्यैवं शूद्राभिवादने त्रिरात्रं कार्यं तु रजकादिषु चांडालादिषु चांद्रं स्यादिति संग्रहकारस्मृतं यमदग्निः देवताप्रतिमां दृ
ष्ट्वा पतिं चैव त्रिदंडिनं नमस्कारं न कुर्याच्चेदुपवासेन शुद्ध्यति सर्वे वापि नमस्कार्याः सर्वावस्थाश्च सर्वदा अभिवादो नमस्कारस्तु

९८

एमः
५६

यांप्रत्यभिवादनं आशीर्वचनानमस्कारैर्वैयस्यस्तुपुनर्नमेत् स्त्रियोनमस्यावृद्धश्च वयसापत्युरेवताः॥ ॥अत्रभिक्षा
चर्यंचरणं॥ ॥अत्रावसरेभिक्षाचर्यानुष्ठानं तद्यथा भवत्पूर्वांब्राह्मणोभिक्षेतभवन्मध्यांराजन्योभवदंत्यांवैश्यः भवत्पूर्वां
भवच्छब्दः पूर्वोयस्याः साभवत्पूर्वा तांभिक्षांब्राह्मणः द्विजोत्तमः भिक्षेतयाचेत तथैवभवच्छब्दोमध्येयस्याः साभवन्मध्यांतां
राजन्यः क्षत्रियोभिक्षेतेत्यनुषंगः भवच्छब्दोअंत्येयस्याः साभवदंत्यातांवैश्यः तृतीयोवर्णः भिक्षांभिक्षेतेत्यनुवर्तते तिस्रोः

प्रत्याख्यायिन्यः षड्द्वादशापरिमितावामातरंप्रथमामेके भिक्षेद्दातोर्द्विकर्मकत्वात् द्वितीयंकर्माह तिस्रस्त्रियोभिक्षांभि
क्षेत कथंभूताः अप्रत्याख्यायिन्यः प्रत्याख्यातुंनिराकर्तुंशीलंयासांताः प्रत्याख्यायिन्यः नप्रत्याख्यायिन्यः अप्रत्याख्या
यिन्यः अत्रद्वितीयार्थेप्रथमाभिक्षेतेतिकर्तृप्रत्ययांतस्याख्यातस्यकर्मकारकापेक्षितत्वात् षड्वास्त्रियःद्वादशवा
अपरिमितावा असंख्यातावाभिक्षेतेतिसर्वत्रानुषंगः एतेभिक्षाविकल्पाः आहारपर्याप्त्यपेक्षया एकेआचार्याः मा
तरंजननींप्रथमांभिक्षांभिक्षेतेत्याहुः अयंचप्रथमोधर्मइतिभाष्यकारः आचार्यायभक्ष्यंनिवेदयित्वावाग्यतोहः शेषं
तिष्ठेदित्येके आचार्यायगुरवेभैक्षंलब्धांभिक्षांनिवेदयित्वा इयंभिक्षामयालब्धेति वाग्यतोमौनीअहः शेषंभिक्षानि
वेदनोत्तरतोयावदस्तमयंतिष्ठेन्नोपविशेन्नचशयीतरागतइत्येकेसूत्रकाराः वर्णयंति वयंतुअनियमंमन्यामहेत

गृ॰सू॰ भा॰ ५७

तश्चविकल्पः अहिंसन्नरण्यात्समिध आहृत्य तस्मिन्नग्नौ पूर्ववदाधाय वाचं विसृजते अहिंसन् अच्छिंदन् स्वयंभग्ना
इत्यर्थः अरण्यान्नग्रामात् समिधः पूर्वोक्तलक्षणआहृत्य आनीय तस्मिन्नग्नौ यत्र उपनयनांगहोमः कृतस्तस्मिन् पूर्ववत्प
रिसमूहनादित्र्यायुषकरणांतं यावत् आधाय हुत्वा वाचं विसृजते मौनं त्यजति वाग्यमपक्षे अधःशाय्यक्षारालवणाशी
स्याद्दंडधारणमग्निपरिचरणगुरुशुश्रूषाभिक्षाचर्यामधुमांसमज्जनोपर्यासनस्त्रीगमनानृतादत्तादानानि वर्जयेत्
अत ऊर्ध्वं ब्रह्मचारिणो यमनियमानाह अधःशयितुं शीलमस्य असावधःशायी स्यात् तथा अक्षारं अलवणं चाश्नाति
त्येवं शीलो अक्षारलवणाशी भवेत् दंडधारणं दंडस्य स्ववर्णविहितस्य धारणं कुर्यात् दंडाजिनोपवीतानि मेखलां चैव
धारयेदित्येतदुपलक्षणत्वात्सदा चिन्हरूपं कुर्यात् अग्नेः परिचरणं सायं प्रातः परिसमूहनपूर्वं त्र्यायुषकरणांतं
समिदाधानं गुरुशुश्रूषा गुरोः शुश्रूषा परिचर्या तां कुर्यात् भिक्षार्थं चर्या भिक्षाचर्या भैक्षचरणमिति यावत् मधु क्षौ
द्रं मांसं पललं मज्जनं नद्यादावाप्लवनं स्नानं उद्धृतोदकेन उपरि खट्वादौ आसनं उपवेशनं आसनस्योपरि मसूरि।
काद्यासनं वा स्त्रीगमनं स्त्रीणां मध्ये अवस्थानं अभिगमनस्योपरि वक्ष्यमाणत्वात् अनृतं असत्यवदनं अद
त्तानां परद्रव्याणां आदानं ग्रहणं स्तेयमित्यर्थः एतानि मध्वादीनि वर्जयेत् अष्टाचत्वारिंशतं वर्षाणि वेदब्रह्म

चर्यंचरेत् अष्टाभिरधिकानिचत्वारिंशतंअष्टाचत्वारिंशत् तानिअष्टाचत्वारिंशतंवर्षाणिअब्दानिवेदब्रह्मचर्यंवेदग्र
हणार्थंब्रह्मचर्यंउक्तलक्षणंचरेत् अनुतिष्ठेत् अस्मिन्पक्षेचतुर्णामपिवेदानांएकएवव्रतादेशःसर्ववेदाहुतिहोमश्च द्वादश
वाप्रतिवेदंयावद्ग्रहणंवाअनुकल्पमाह वानदशक्तो द्वादशद्वादशवर्षाणिप्रतिवेदंवेदेवेदेब्रह्मचर्यंचरेदित्यनुवर्तते तत्राप्यशक्तो
यावद्ग्रहणंयावद्वेदस्यवेदयोःवेदानांवाग्रहणंआचार्यात्पाठतोऽर्थतश्चस्वीकरणंतावद्वाब्रह्मचर्यंचरेत् वर्णअवस्थयावा
सःप्रभृतिव्यवस्थितान्याह वासांसिशाणक्षौमाविकानि ब्राह्मणक्षत्रियविशांब्रह्मचारिणांयथासंख्यंशाणक्षौमाविकानिव
स्त्राणिपरिधेयानिभवंति तत्रशणमयंशाणंक्षौमंसुमाअतसीतद्विकारमयंक्षौमं आविकंअवेर्मेषस्यविकारंआविकंऊर्णा
मयमित्यर्थः ऐणेयमजिनमुत्तरीयंब्राह्मणस्य एणोहरिणीतस्याइदंऐणेयंअजिनंकृत्तिःउत्तरीयंभवति ब्राह्मणस्यब्रह्म
चारिणःरौरवंराजन्यस्य रुरुमृगविशेषःचित्रमृगप्रसिद्धःतस्येदमजिनंरौरवंराजन्यस्यक्षत्रियस्योत्तरीयंभवति आजंगव्यं
वावैश्यस्य अजस्यवस्तस्यइदंअजिनंकृत्तिःवैश्यस्यउत्तरीयंभवति अथवागव्यंगोःइदंगव्यंअजिनंवावैश्यस्यउत्तरीयंभव
तिसर्वेषांगव्यमसतिप्रधानत्वात् पक्षांतरमाह सर्वेषांब्राह्मणक्षत्रियविशांगव्यमजिनंवाउत्तरीयंभवति कदाअसतिमुख्ये
अविद्यमानेकुतःअप्रधानत्वात् गव्यंहिअजिनानांऐणेयाद्यजिनप्रभृतीनांअप्रधानं एणेयादीनांगोःप्राधान्यमपत् यद्वागव्यस्य

स्वमेणः पुरुषसंबंधित्वेनप्रधानत्वात् तथाचश्रुतिः तेवच्छायपुरुषंगच्छेतांत्वचमृदध्रुरिति मौंजीरशनाब्राह्मणस्यधनुर्ज्या
राजन्यस्यमौर्वीवैश्यस्यमुंजाभावेकुशाश्मंतकवल्वजानां मौंजीमुंजतृणनिर्मितामयी मौंजीरशनामेखलाब्राह्मणस्यब्रह्मचारिणो
भवतिधनुर्ज्याचापस्यज्यागुणरशनाराजन्यस्यब्रह्मचारिणः मौर्वीतितृणविशेषस्तन्मयीरशनावैश्यस्यभवति मुंजस्याभावेअ
लाभेब्राह्मणस्यकुशानांकुशमयीरशनाभवति धनुर्ज्यायाअभावेक्षत्रियस्यअश्मंतकमयी मौर्व्यभावेवाल्वजीवैश्यस्य मुंजा
भावशब्दोत्रधनुर्ज्यामौर्व्यभावोपलक्षणार्थः पालाशोब्राह्मणस्यदंडोबैल्वोराजन्यस्यौदुंबरोवैश्यस्य पालाशः पालाशवृक्षो
द्भवः ब्राह्मणस्यब्रह्मचारिणोदंडोभवति सचकेशसंमितः पादादिकेशमूलावधिप्रमाणकः वैल्ववृक्षोद्भवः क्षत्रियस्यललाट
संमितः ललाटावधिपरिमाणः भ्रूमध्यावधिरित्यर्थः औदुंबरउदुंबरवृक्षोद्भवः वैश्यस्यब्रह्मचारिणोमुखसंमितः उष्ठपर्यंताव
धिर्दंडः सर्वेवासर्वेषां यद्वासर्वेषांब्राह्मणक्षत्रियविशांब्रह्मचारिणांसर्वेपालाशवैल्वौदुंबराअनियमेनदंडाभवंति नियमो
वानास्ति मुख्याभावेयथालाभमुपादेयं आचार्येणाहूतउत्थायप्रतिशृणुयात् आचार्येणगुरुणाहूतआकारितः ऊर्ध्वो
भूत्वाप्रतिशृणुयात् प्रतिवचनंदद्यात् ब्रह्मचारी शयानंचेदासीनः चेद्यदिशयानस्वपंतंब्रह्मचारिणंगुरुराहूयतितदा आ
सीनः उपविष्टःसन्प्रतिवचनंदद्यात् आसीनंचेतिष्ठन् आसीनंउपविष्टंचेदाहूयतितदातिष्ठन्नुत्थितः तिष्ठंतंचेदभि

क्रामन् यदितिष्ठंतमुत्थितमाह्वयति तदा अभिक्रामन् गुरुमभिमुखं गच्छन् प्रतिशृणुयात् अभिक्रामंतं चेदभिधावन् अ
भिमुखंधावन् सन् प्रतिशृणुयात् सएवंवर्तमानोमुत्राद्यवसत्यमुत्राद्यवसति सब्रह्मचारी एवमुक्तेन मार्गेण ब्रह्मचर्येवर्तमा
नस्तिष्ठन् अमुत्र स्वर्गे अद्य इहैवस्थितः सन् वसतिनिश्चति हि रुक्तिः स्तुत्यर्था तस्यस्नातस्यकीर्तिर्भवति तस्यब्रह्मचारिणः स्ना
तस्यसमावृत्तस्यकीर्तिर्यशोभवति इतियथोक्तधर्मानुष्ठातुर्ब्रह्मचारिणः फलकथनं त्रयः स्नातकाभवंतिविद्यास्नातकोव्रत
स्नातकोविद्याव्रतस्नातक इतित्रयः त्रिः प्रकाराः स्नातकाभवंतिकथं एकोविद्यास्नातकः अपरोव्रतस्नातकः अन्योविद्या
व्रतस्नातकः एतेषांलक्षणमाह समाप्यवेदमसमाप्यव्रतंयः समावर्ततेसविद्यास्नातकः समाप्यव्रतमसमाप्यवेदंयः समा
वर्ततेसव्रतस्नातकः उभयं समाप्ययः समावर्ततेसविद्याव्रतस्नातक इतिसमाप्यसमाप्तिं पाठतोर्थतश्च अवसानंनीत्वा
वेदंवेदस्यमंत्रब्राह्मणात्मिकां एकांशाखांव्रतंचब्रह्मचर्यंसमाप्ययः समावर्ततेस्नातिसब्रह्मचारीविद्यास्नातकोभवतिए
वंसमाप्यव्रतंद्वादशवार्षिकादिकंब्रह्मचर्यंअसमाप्य असंपूर्णमधीत्यवेदं एकांशाखांयोब्रह्मचारीसमावर्ततेस्नानंकरोति
सव्रतस्नातकोभवति उभयंवेदंब्रह्मचर्यंचसमाप्य अंतंनीत्वायः स्नातिसविद्याव्रतस्नातकोभवति आषोडशाद्वर्षाद्ब्राह्म
णस्यानतीतः कालोभवत्याद्वाविंशाद्राजन्यस्याचतुर्विंशाद्वैश्यस्यउपनयनकालस्यपरमावधिमाह आषोडशात्षोड

103

शाद्वर्षात्प्राक्ब्राह्मणस्यविप्रस्यअनतीतःउपनयनस्यकालःसमयोभवतिआद्वाविंशात्द्वाविंशाद्वर्षात्पूर्वंक्षत्रियस्यआआ
चतुर्विंशाद्वर्षादर्वाक्वैश्यस्यउपनयनस्यकालःअनतीतोभवतिभवतीतिसर्वत्रसंबध्यते अतऊर्ध्वंपतितसावित्रीकाभ
वंति अतःपंचदशात् एकविंशात्त्रयोविंशाद्वर्षादूर्ध्वंअनुपनीताब्राह्मणक्षत्रियवैश्याःयथासंख्यंपतितसावित्रीकाःप
तितास्खलिताअधिकाराभावान्निवृत्तासावित्रीगायत्रीयेभ्यःतेपतितसावित्रीकाभवंति संपद्यंते नैनानुपनयेयुर्नाध्यापयेयु
र्नयाजयेयुर्नैभिर्व्यवहरेयुः एतान्पतितसावित्रीकान्नउपनयेयुःउपनयनसंस्कारेणनसंस्कुर्युःशिष्टाःकेचिदतिक्रांत
निषेधैरुपनीतानपिनअध्यापयेयुःनवेदंपाठयेयुःतथानयाजयेयुःकेचनअतिक्रांतनिषेधैर्वेदमध्यापितानपिनयाज
युःनयज्ञंकारयेयुःएभिःपतितसावित्रीकैरनुपनीतैर्वासहनव्यवहरेयुःनव्यवहरेत् स्नानासनशयनभोजनविवाहादि
भिःकर्मभिर्नव्यवहारंकुर्युःकालातिक्रमेनियतवत् गर्भाधानादीनिउपनयनांतानिकर्माणिनियतकालान्यभिहितानि।
यदिदैववशात्पुरुषापराधाद्वादोषाद्वातेषांनियतस्यकालस्यअतिक्रमोभवतितदाकिंकर्तव्यमितिसंदेहेनिर्णयमाह॥
कालातिक्रमेयस्यसंस्कारकर्मणःशास्त्रेनियमितोयःकालःतस्यअतिक्रमेलंघनेनियतवत्नित्यवत्नित्येश्रौतेकर्मणि
त्येषुयद्विहितंतद्वत्अनादिष्टंप्रायश्चित्तंभवति ततःकृत्वाप्रायश्चित्तस्यअतिक्रांतकालेसंस्कारकर्मण्यधिकारःसंपद्यतेअ

नादिष्टप्रायश्चित्तेनितिकर्तव्यताचप्रयोगेवक्ष्यते अत्रकालातिक्रमइत्युपलक्षणं अतः अन्येषामपिकर्मणांनाशेइद
मनादिष्टमेवसर्वप्रायश्चित्तंगृह्यकारेणप्रायश्चित्तांतरस्यअनुपदिष्टत्वात् किंतु श्रौतानामतिदेशे प्राप्ते अविज्ञाते प्रतिमहा
व्याहृतिभिः सर्वाभिश्चतुर्थं सर्वप्रायश्चित्तंयत्स्यैवकालातिक्रमेनियतत्वादित्यनेनातिदेशः कृतोनतूपदेशोकृतोगृह्य
कारेणातत्रविज्ञातमप्रत्यक्षश्रुतिमूलंकिमिदमार्ग्वैदिकंयाजुर्वैदिकंसामवैदिकंवेत्यनिश्चितंस्मार्तेकर्मतस्मिन्श्रेषश्रौतक
ल्पेआहृतिचतुष्टयंपंचवारुणहोमप्रायश्चित्तंउद्दिष्टमत्रगृह्यसूत्रेगृह्योक्तकर्मणामपिस्मार्तत्वातन्त्रैषतस्मिन्नातिदेशो
युक्तः नपुनः प्रत्यक्षवेदमूलकर्मस्वेषापदिष्टानां इदानीपतितसावित्रीकविषयेसंस्कारप्रतिप्रसवमाह त्रिपुरुषंपतित
सावित्रीकाणामपत्येसंस्कारोनाध्यापनंचतेषां त्रिपुरुषंत्रीन्पुरुषान्यावत्ययेपतितसावित्रीकाः पितृपुत्रपौत्राः तेषामप
पत्यपुत्रेसंस्कारः उपनयनंभवतिनपुनश्चतुर्थादीनांतेषांचउपनीतानामपिअध्यापनंनभवतिनिषिद्धस्यपुनरनुज्ञा
पनेप्रतिप्रसवइति तेषांसंस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वाकाममधीयीरन्व्यवहार्याभवंतीतिवचनात् तेषांपतितसावित्री
काणांमध्येयः संस्कारेप्सुः आत्मानंसंस्कारयितुकामः सव्रात्यस्तोमेनयज्ञविशेषेणइष्ट्वाव्रात्यस्तोमयज्ञंकृत्वाव्यवहार्यो
भवतिउपनयनादिसंस्कारयोग्योभवति तस्मात्काममिच्छयाव्रात्यस्तोमेनेष्ट्वाअधीयीरन्वेदंपठेयुः व्यवहार्याः लोकेशिष्टानां

गृ॰ सं॰ भा॰ टी॰

अध्यापनादिषु कर्मसु योग्या भवन्तीति वचनात् श्रुतेः असंस्कार्यप्रसंगात् स्मृत्यन्तरोक्ता अपि असंस्कार्या लिख्यन्ते
षंढांधबधिरस्तब्धजडगद्गदपंगुषु कुब्जवामनरोगार्तशुष्कांगिविकलांगिषु मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिन्द्रिये ध्व
स्तपुंस्त्वेपि चैतेषु संस्काराः स्युर्यथोचिताः मूकोन्मत्तौ न संस्कार्याविति केचित् कर्मस्वनधिकारात् पातित्यं नास्ति तदपत्यं संस्का
र्यं ब्राह्मण्यां ब्राह्मणेनोत्पन्नो ब्राह्मण एवेति स्मृतेः अन्ये तु तावपि संस्कार्यावित्याहुः होमानाचार्यः करोति उपनयनं च
विधिना आचार्यसमीपनयनं वा अग्निसमीपनयनं वा सावित्रीवाचनं वा अन्यदंगं यथाशक्ति कार्यं विवाहश्च कन्यास्वी
कारोऽन्यदंगमिति औरसक्षेत्रजाश्चैव संस्कार्या भागहारिणः औरसः पुत्रिकापुत्रः क्षेत्रजो गूढजस्तथा कानीनश्च पुनर्भू
जो दत्तः क्रीतश्च कृत्रिमः दत्तात्मा च सहोढश्चापविद्धः सुतस्ततः पिंडदोंशहरश्चैषां पूर्वाभावे परः परः एते द्वादश पुत्रा
श्च संस्कार्याः सुहृज्जातयः केचिदाहुर्द्विजैर्जातौ नासंस्कार्यौ कुंडगोलकौ अमृते च मृते पत्यौ जारजौ कुंडगोलकौ शंखलि
खितौ नोन्मत्तमूकान् संस्कुर्यात् विष्णुनापरिक्षितयाजयेत् नाध्यापयेन्नोपनयेत् आपस्तंबः शूद्राणामदुष्टकर्मणा
मुपनयनं एतच्च रथकारविषयं तस्यत्र मातामहीद्वारकं शूद्रत्वं अदुष्टकर्मणां मद्यपानरहितानामिति कल्पतरुका
रः इति सूत्रार्थः अथ प्रयोगः तत्र ब्राह्मणस्याष्टवार्षिकस्य गर्भाष्टवार्षिकस्य वा क्षत्रियस्यैकादशवार्षिकस्य वैश्यस्य द्वाद

एमः
६०

शवार्षिकस्य उपनयनं कुर्यात् यथामंगलं सर्वेषामुपनयनं अथोदगयने शुक्लपक्षे पुण्येऽहनि प्रातः पूजापूर्वकं आभ्युदयि-
कं श्राद्धं कुर्यात् कुमारस्य वपनं कारयित्वा ब्राह्मणत्रयस्य भोजनं दत्त्वा कुमारं च भोजयित्वा बहिः शालायां पंच भूसंस्कारान्
विधाय लौकिकाग्निं स्थापयित्वा पर्युप्तशिरसमलंकृतं कुमारं आचार्यपुरुषा आचार्यसमीपं आनयंति तत आचार्य आ-
नीतं कुमारं पश्चादग्नेः स्वस्य दक्षिणतोऽवस्थाप्य ब्रह्मचर्यमागामिति ब्रूहीति कुमारं प्रति वदति ब्रह्मचर्यमागामिति कुमारः प्रति
ब्रूयात् ब्रह्मचार्यसानीति ब्रूहीत्याचार्येणोक्ते ब्रह्मचार्यसानीति माणवको ब्रूयात् अथाचार्यो माणवकं येनेंद्राय बृहस्पतिर्वासः
पर्यदधादमृतं तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे इत्यनेन मंत्रेण यथोक्तं वासः परिधापयति तत आचार्यो
माणवकस्य कटिप्रदेशे मेखलां बध्नाति इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म आगात् प्राणापानाभ्यां बलमादधाना
स्वसा देवी सुभगा मेखलेयमिति मंत्रं पठित्वा ततः युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः तं धीरासः कवय उ-
न्नयंति स्वाध्यो मनसा देवयंत इति वा मंत्रः तूष्णीं मंत्रवर्जं वा ततः यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् आयु-
ष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेज इति मंत्रं पठित्वा ततो माणवकस्य दक्षिणबाहुमुद्धृत्य वामस्कंधे यज्ञोपवीतं निवेश-
यति यज्ञोपवीतलक्षणं तु छंदोगपरिशिष्टे त्रिवृदूर्ध्ववृतं कार्यं तंतुत्रयमधोवृतं त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते वामावर्तं

गृ॰ सू॰ भा॰ ह॰ ६१

सू॰ त्रिगुणं कृत्वा प्रदक्षिणावर्तं नवगुणं विधाय तद्देवत्रिसरं कृत्वा ग्रंथिमेकं विदध्यात् तथा पृष्ठवंशे च नाभ्यां च धृतं यद्विंदते क
टिं तद्धार्यमुपवीतं स्यान्नातिलंबं न चोच्छ्रितं वामस्कंधे कृतं नाभि पृष्ठवंशयोर्धृतं यथा कटिपर्यंतं प्राप्नोति नातवत्परिमाणं
कर्तव्यमित्यर्थः कार्पासक्षौमगोवालशणवल्कलतृणादिकं सदासंभवतो धार्यमुपवीतं द्विजातिभिः शुचौ देशे शुचिः सूत्रं सं
हतांगुलिमूलके आवेष्ट्य षण्णवत्यां तत् त्रिगुणीकृत्य यत्नतः २ अब्लिंगकैस्त्रिभिः सम्यक् प्रक्षाल्योर्ध्ववृतं च तत् अप्रद
क्षिणमावृत्तं सावित्र्या त्रिगुणीकृतं ३ अधः प्रदक्षिणावृत्तं समं स्यान्नवसूत्रकं त्रिरावेष्ट्य दृढं बध्वा हरिब्रह्मेश्वरान्नमेत्
४ यज्ञोपवीतं परममिति मंत्रेण धारयेत् सूत्रं सलोमकं चेत्स्यात्ततः कृत्वा विलोमकं ५ सावित्र्या दशकृत्वाद्भिर्मंत्रिताभि
लडुक्षयेत् विच्छिन्नं वाथाधो यातं भुक्त्वा निर्मितमुत्सृजेत् ६ स्तनादूर्ध्वमधो नाभेर्न धार्यं तत्कथंचन ब्रह्मचारिण एकं
स्यात्स्नातस्य द्वे बहूनि वा तृतीयमुत्तरीयं वा वस्त्राभावे तदिष्यते ब्रह्मसूत्रेऽपसव्ये सस्थिते यज्ञोपवीतिता ८ प्राचीनावीतिता
सव्ये कंठस्थे तु निवीतिता वस्त्रं यज्ञोपवीतार्थे त्रिवृत्सूत्रं च कर्मसु कुशमुंजवल्वजैस्तन्तु रज्ज्वा वा सर्वजातिषु ९ ततस्तथैव तूष्णीं
माणवकस्य यथोक्तमजिनमुत्तरीयं कारयति तथाचार्यो माणवकाय दंडं ददाति माणवकश्च यो मे दंडः परापतद्वैहाय
सोऽधि भूम्यां तमहं पुनराददआयुषे ब्रह्मणे ब्रह्मवर्चसायेत्यनेन मंत्रेण तं प्रतिगृह्णाति दीक्षावद्वा दंडं ददाति प्रतिगृह्णाति तु कूप

एम: ६१

108

नि च अथाचार्यः स्वकीयमंजलिं जलेन पूरयित्वा तेन जलेनांजलिस्थेन माणवकस्यांजलिं पूरयति आपो हि ष्ठेति त्र्यृचेन ततो
गुरुर्माणवकं प्रेषयति सूर्यमुदीक्षस्वेति माणवकश्च प्रेषितस्तच्चक्षुरिति मंत्रेण सूर्यमुदीक्षते अथाचार्यो माणवकस्य द
क्षिणांसस्योपरि स्वं दक्षिणं हस्तं नीत्वा हृदयमालभते मम व्रते ते हृदयं दधामि मम चित्तमनु चित्तं ते अस्तु मम वाचमेकमना
जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमिति मंत्रेण अथाचार्योऽस्य माणवकस्य दक्षिणं हस्तं सांगुष्ठं गृहीत्वा को नामासीत्याह एवं पृ
ष्टः कुमारः अमुकशर्माहं भो ३ प्रतिब्रूयात् पुनराचार्यो माणवकं पृच्छति कस्य ब्रह्मचार्यसीति भवत इति माणवकेनोच्यमाने
इंद्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवामुकशर्मन्नित्याचार्यः पठेत् अथैनं कुमारं भूतेभ्यः परिददात्याचार्यः
प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददामि अद्भ्यस्त्वौषधीभ्यः परिददामि द्यावापृथिवीभ्यां त्वा परिददामि विश्वे
भ्यस्त्वा देवेभ्यः सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्या इत्यनेन मंत्रेण अथ कुमारः अग्निं प्रदक्षिणीकृत्य आचार्यस्योत्तरत उप
विशति आचार्यश्च ब्रह्मोपवेशनादि पर्युक्षणांतं कृत्वा आघारावाज्यभागौ स्विष्टकृदंतांश्चतुर्दशाज्याहुतीर्हुत्वा हुतशेषं प्राशय पूर्ण
पात्रं वरं वा ब्रह्मणे दद्यात् अथानंतरं एनं ब्रह्मचारिणं संशास्ति कथं ब्रह्मचार्यसीत्याचार्यो वदति असानीति ब्रह्मचारी अपोऽशाने
त्याचार्यः अश्नानीति ब्रह्मचारी कर्म कुर्वित्याचार्यः करवाणीति ब्रह्मचारी मा दिवा सुषुप्था इत्याचार्यः न स्वपामीति ब्रह्मचा

ग॰ सू॰
भा॰ टी॰
६२

रीवाचंयच्छेत्याचार्यः यच्छानीतिब्रह्मचारी समिधमाधेहीत्याचार्यः आदधानीतिब्रह्मचारी अपोशानेत्याचार्यः अश्नानीतिब्र
ह्मचारी अथास्मै एवंशासिताय ब्रह्मचारिणे आचार्यः सावित्रीमन्वाह कीदृशाय उत्तरतोऽग्नेः प्रत्यङ्मुखाय उपविष्टाय पादोप
संग्रहपूर्वकमुपसन्नाय आचार्य समीक्षमाणाय स्वयमप्याचार्येण समीक्षिताय कथमन्वाह ॐकारव्याहृतिपूर्वकं प्रथमं प
च्छः एकैकपादं तथा द्वितीयमर्द्धर्चशः तथैव तृतीयं सर्वां स्वयं च ब्रह्मचारिणा सह पठन् केषांचित्पक्षे दक्षिणतोऽग्नेस्तिष्ठते आ
सीनाय वा आचार्य उक्तप्रकारेण सावित्रीमन्वाह संवत्सरे वा षण्मासे वा चतुर्विंशत्यहे वा द्वादशाहे वा षडहे वा त्र्यहे वा काले
क्षत्रियवैश्ययोर्ब्रह्मचारिणोः आचार्यः सावित्रीं ब्रूयात् ब्राह्मणाय तु सद्य एव गायत्री गायत्रीछंदस्कां सावित्रीं सवितृदेवत्यां ऋचं
विश्वामित्रदृष्टां सायमग्निहोत्रहोमानंतरमाहवनीयाग्न्युपस्थापने विनियुक्तां तत्सवितुरिति सर्ववेदशाखाम्नातां ब्रह्मदृष्टां गाय
त्रीछंदस्कां परमात्मदैवतं वेदारंभादिविनियुक्तां प्रणवां प्रजापतिदृष्टाग्निवायुसूर्यदैवत गायत्र्युष्णिगनुष्टुप्छंदस्का अग्न्याधान
विनियुक्ता भूर्भुवःस्वरिति महाव्याहृतिपूर्वकं ब्राह्मणाय ब्रह्मचारिणे आचार्योऽनुब्रूयात् क्षत्रियाय त्रिष्टुप्छंदस्कां बृहस्पतिदृ
ष्टां सवितृदेवत्यां देवसवितरित्यादिकां वाजपेय आज्यहोमविनियुक्ताः तथा वैश्याय प्रजापतिदृष्टां जगतीछंदस्कां सवितृदेवत्यां रुक्म
पाशप्रतिमोचने उखासंभरणविनियुक्तां विश्वा रूपाणि प्रतिमुंचत इत्येतामृचं ब्रूयात् सर्वेषां ब्राह्मणक्षत्रियविशां गायत्रीमेव वा गायत्रछंदस्

110

एम
६२

स्कां सावित्रीं उक्तलक्षणां ब्रूयात् अत्रावसरे ब्रह्मचारी समिदाधानं करोति तत्र पूर्वं दक्षिणहस्तेन सुश्रवः सुश्रवसं माकरु पथा ॥
त्वमग्ने सुश्रवः सुश्रवा असि एवं मां सुश्रवः सुश्रवसं कुरु यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि एवमहं मनुष्याणां वेद
स्य निधिपो भूयासमित्येतैः पंचभिर्मंत्रैः प्रतिमंत्रं इंधनप्रक्षेपेणाग्निं संधुक्षयति हस्ताभ्यां संधुक्षणप्रसिद्धिरस्ति ततोऽग्निप्रदक्षि
णहस्तेन अद्भिः पर्युक्ष्य उत्थाय तिष्ठन् अग्नये समिधमाहार्षं बृहते जातवेदसे यथा त्वमग्ने समिध्यस एवमहमायुषा मेधया वर्च
सा प्रजया पशुभिर्ब्रह्मवर्चसेन समिंधे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयास
ं स्वाहेत्यनेन मंत्रेण उक्तलक्षणामेकां समिधमग्नावाधाय अनेनैव द्वितीयां तृतीयां वा धत्ते एषा ते अग्ने समिदित्यादिना वा मंत्रेण अ
ग्नये समिधमाहार्षमिति एषा ते अग्ने समिदित्येताभ्यां समुच्चिताभ्यां मंत्राभ्यां वा एकैकशस्तिस्रः समिध आदधाति ततोपविश्य
पूर्ववदग्ने चेत्सुश्रव इत्यादिभिरग्निं संधुक्ष्य पर्युक्ष्य तूष्णीं पाणी प्रतप्य तनूपा अग्नेसि तन्वं मे पाहि आयुर्दा अग्नेस्यायुर्मे देहि व
र्चोदा अग्नेसि वर्चो मे देहि अग्ने यन्मे तन्वा ऊनं तन्म आपृण मेधां मे देवः सविता आदधातु मेधां मे देवी सरस्वती आदधातु मे
धां मे अश्विनौ देवावाधत्तां पुष्करस्रजाविति सप्तभिर्मंत्रैः प्रतिमंत्रं मुखं विमार्ष्टि अत्र शिष्टाचारपरिप्राप्ताः केचन पदार्थाः
लिख्यंते ततः अंगानि च म आप्यायंतामित्यनेन शिरःप्रभृतिपादांतं सर्वांगाण्यालभते वाक् म आप्यायतामिति मुखं प्राणश्च म आप्यायतामि

ग॰स्॰ तिनासारंध्रे युगपत् चक्षुषी मे आप्यायतामिति चक्षुषी युगपत् श्रोत्रं च मे आप्यायतामिति दक्षिणं श्रोत्रं ततोऽनेनैव मंत्रेण वामं
भा॰ह यशोबलं च मे आप्यायतामिति मंत्रं पठेत् ततोऽनामिकया अग्नेर्भस्म गृहीत्वा ललाटे ग्रीवायां दक्षिणांसे हृदि चतुर्षु स्थानेषु त्र्या
६३ युषं जमदग्नेः कश्यपस्य त्र्यायुषं यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषमिति चतुर्भिर्मंत्रैस्त्र्यायुषाणि कुरुते अत्र स्मृत्यंतरोक्तमभि
वादनं लिख्यते ततोऽभिवादयेद्वृद्धानसावहमिति ब्रुवन् इति याज्ञवल्क्यादिस्मृतिप्रणीतं तस्याभिवादनस्य प्रयोगो यथा व
त्सः गोत्रो भार्गवच्यवनाप्नवानौर्वजामदग्न्येति पंचप्रवरः श्रीधरशर्माऽहं भो ३ श्रीहरिहरशर्मन् त्वामभिवादये इत्युक्त्वाभिवा
द्य गुर्वादिकं ब्रह्मचारी अभिवादयेत् अभिवाद्यश्च गुर्वादिः आयुष्मान् भव श्रीधरशर्मन् भो ३ इति प्रत्यभिवदेत् अयमभि
वादनप्रयोगो गृहस्थस्यापि अत्र वृद्धानिति वचनात् कनिष्ठाभिवादनेनाधिकारः वृद्धाश्च त्रिविधाः विद्यातपोवयोभिः अ
त्र समये ब्रह्मचारी भैक्षं चरति तद्यथा भवति भिक्षां देहीति ब्राह्मणः भिक्षां भवति देहीति राजन्यः भिक्षां देहि भवतीति वैश्य
श्च भिक्षां भिक्षेत् अत्र भिक्षायाचनवाक्ये भवतीति स्त्रीसंबोधनपदात् स्त्रियो भिक्षेतेति प्राप्तं ताश्च कीदृश्यः कति च इत्य
पेक्षायामुच्यते याः प्रत्याख्यानं न कुर्वंति ताः भिक्षेत कतीति चेत् षड् द्वादश वा द्वादशभ्योऽधिका वा मातरं वा प्रथमां भिक्षेतेत स राम
न्वयः एवं भिक्षां भिक्षित्वा ब्रह्मचारी भैक्ष्यं गुरवे निवेद्य अहः शेषं वाग्यतस्तिष्ठेत वा आसीतेवत नियमः ततः उप अस्तमयं संध्यावंदन ६

1K

ब्राह्मणात्मकस्य वेदस्य कश्चिद्विधिर्नामो विधायकः कश्चिन्मंत्रात्मको विधेयः कश्चित्स एष नेति नेति त्रैपंचकाः पुरोडाशाइ
त्यादवत्रैविध्यमनयैवोच्यत इति नास्तिकोर्थः अत एव षडंगो वेदस्मृतिरपि परमतोयन्मासात्पूर्वपक्षस्मृतिरेवेत्यलं मंत्रः इषे
त्वादिः तर्कोऽर्थवाद इति कर्कोपाध्यायः यथा अक्ताः शर्करा उपदधाति इति विधिः श्रूयते तत्रांजनसाधनं घृतं तैलं वसा च
नत्मध्ये केनाक्ता इति संशये तेजो वै घृतमिति अर्थवादान् घृतेनाक्ता इति निर्णीयते अतस्तर्कोर्थवादः तर्को मीमांसेति कस्
तस्कारः चकारान्नामधेयभागसंग्रहः यतो वेदोपि अर्थवादमंत्रनामधेयैश्चतुर्धा मीमांसके विचार्यते यथा अग्निहोत्रं आधा
रो याग भेदो उद्भिद् हलभिदिति नामधेयानि षडंगमित्येके एके सूत्रकाराः षडंगं वेदं समाप्य स्नायादित्याहुः षट् शिक्षाकल्पव्या
करणनिरुक्तज्योतिषछंदांसि अंगानि यस्य वेदस्य स षडंगः तेषडंग नकल्पमात्रे कल्पमात्रे ग्रंथमात्रे मंत्रे वा ब्राह्मणे वा अ
धीतेन स्नानमिच्छंति कल्पमात्राध्ययनस्य अनुष्ठानयोग्यत्वात् यतः अथातोधिकारः अथातो धर्मजिज्ञासा अथातो ब्र
ह्मजिज्ञासेत्यादिभिरधिकारसूत्रैः अधीतसकलवेदस्याग्निहोत्रादिकर्मस्वधिकार इत्याचार्यैर्वर्ण्यते कामं तु याज्ञिकस्य तु श
दः पक्षमावर्तौ कामं इच्छया याज्ञिकस्य आध्वर्यवादियज्ञविद्याकर्मकुशलस्य स्नानमिच्छंति अयमर्थः मंत्रब्राह्मणात्मकं वेद
मधीत्य अवबुध्य च स्नायादित्येकः पक्षः सांगं वेदमधीत्यावबुध्य च स्नायादित्यपरः ग्रंथमात्रमप्यधीत्य यज्ञविद्यां वाभ्यस्य स्नाया

गृ॰सू॰
भा॰ह॰
६६

दिनितृतीयः यज्ञविद्याविरहेण ग्रंथमात्रेऽप्यधीते न स्नायादिति निषेधः यतो वेदाध्यापनं वेदविहिताग्निहोत्रादिकर्माद्यनुष्ठानप्र
योजनं उपसंगृह्य गुरुं समिधोभ्याधाय परिश्रितस्योत्तरतः कुशेषु प्रागग्रेषु पुरस्तात्स्थित्वाष्टानामुदभानां ये अप्स्वन्तरग्नयः प्रतिष्ठा गो
उपगोह्यो मयूखो मनोहा स्खलितविरुजस्तनूदूषिरिंद्रियहा तान्विजहामि यो रोचनस्तमिह गृह्णामीत्येकस्मादपो गृहीत्वा तेनाभिषिंच
ते स्नापयादित्युक्तं तत्र कथं स्नायादित्यपेक्षिते आह उपसंगृह्य उपसंगृहणविधिना प्रणम्य कं गुरुं आचार्यं समिधः पूर्वोक्तलक्ष
णास्तिस्रः परिसमूहनादिभ्याधुक्षकरणांतेन विधिना आचार्यो त्रिवर्तितसमावर्त्तनांगहोमेग्नौ आधाय प्रक्षिप्य अत्र समिधो
भ्याधायेत्युक्तं तत्समिदाधानं किं वेदाहुत्यादि समावर्तनहोमात्पूर्वं उत पश्चात् वेदाहुतिहोमः कृतम्प्रात इति चेत् एतदेव व्रता
देशनविसर्गेष्वित्यतिदेशात् तर्हि पूर्वं भवतु उपसंगृह्य गुरुं समिधोभ्याधायेति पाठात् समिदाधानानंतरं वेदाहुतीनामवसर
इति गम्यते मैनदेवं यस्मात् हि वेदाहुतीनां अवसरः समिदाधानात्पूर्वं समिदाधानं च स्नानात्पूर्वमिति क्रमस्य ज्ञापितत्वात् कथं
सयामुपयन्समिधमादधाति सायं प्रातर्याया यः स्नास्यन्त्सीदयनीयेति श्रुतेः तस्मात्समावर्तनहोमापत्तेः उपसंग्रहणादि
परिश्रितस्य परिवेष्टितस्य सर्वतः प्रच्छादितस्य समावर्तनांगहोमसाधनाग्निस्थापनप्रदेशस्य उत्तरतः उत्तरस्मिन्भागे कुशेषु प्रा
कूलेषु प्रागग्रेषु आस्तीर्णेषु पुरस्तात्प्राच्यां दिशि केषां अष्टानामुदकुंभानां दक्षिणोत्तरायतानां अष्टसंख्याकानां अमलजपूर्णानां आम्र

राम
६६

दिशुभपल्लवमुखानांस्थित्वा स्थितिंकृत्वा उदङ्मुखीभूयेत्यर्थः येअप्स्वंतरग्नयइत्यादिनामंत्रेणइहगृह्णामीत्यनेनएकस्मात्प्रथमाति
क्रमेकारणाभावादितिन्यायेनप्रथमात्प्राचुदंविवाकर्मणीत्यनेनन्यायेनदक्षिणस्यप्रथमेतस्थ अपःजलंदक्षिणहस्तेनगृही
त्वातेनजलेनअभिषिंचते अभ्युक्षति आत्मानंशिरस्तः स्नानकर्तात्मानं तत्रमंत्रः तेनमामभिषिंचामिइत्यादिब्रह्मवर्चसायेत्यतः
येनश्रियमकृएवंतायेनावमृशतांसुरां येनाक्षावभ्यषिंचतांयद्वातदश्विनायशइत्यापोहिष्ठेतिचप्रत्यृचंत्रिभिस्तूष्णीमितरैः एवंए
कोदकुंभजलसाध्यंस्नानमभिधायइतरसप्तकुंभजलयेप्स्वंतरग्नइत्ययमेवसर्वोदकुंभजलग्रहणेसाधारणोमंत्रइतिप्रतीयतेतता
सर्वेभ्योद्वितीयादिकुंभेभ्यः प्रत्येकंयेअप्स्वंतरितिमंत्रेणजलमादायवक्ष्यमाणैर्मंत्रैर्यथाक्रममभिषिंचते तद्यथा येनश्रिय
मितिद्वितीयं आपोहिष्ठेतितृतीयं योवःशिवइतिचतुर्थं तस्माअरमितिपंचमं तूष्णीमितराणित्रीणिस्नानानि उदुत्तममिति
मेखलामुन्मुच्यनिधायवासोन्यत्परिधायादित्यमुपतिष्ठते उद्यन्भ्राजभृष्णुरित्यादि उदुत्तममितिमंत्रेणमेखलांरशनामुन्मुच्य
उच्छ्वलत्सामर्थ्यात् शिरोमार्गेणनिःसार्यनिधायतांचभूमौनिक्षिप्यअन्यद्वस्त्रंपरिधायआदित्यंसूर्यंउद्यन्भ्राजभृष्णुरित्यादिभि
र्मंत्रैःउपतिष्ठतेतिस्तोति दधितिलान्वाप्राश्यजटालोमनखानिसंहृत्यौडुंबरेणदंतान्धावयेत् अन्नाद्यायव्यूहध्वमिति ततोदधि
तिलानामन्यतरंप्राश्यआशित्वाजटाश्चलोमानिचनखानिचजटालोमनखानितानिसंहृत्यसंहार्यवापयित्वेत्यर्थःअत्रसं

हत्येतिणिचो लोपश्छांदसः स्वयंसंहर्तुमशक्यत्वात् उदुंबरेणाद्वादशांगुलसंमितेन कनिष्ठिकाग्रवत्स्थूलेनउदुंबरकाष्ठेन॥ अन्नाद्याय व्यूहध्वमितिमंत्रेणदंतान् धावयेत् प्रक्षालयेद्ब्राह्मणः द्वादशांगुलेन दशांगुलेनराजन्यः अष्टांगुलेनवैश्यइति विशेषः अत्रजयलोमनखवपनोनिमित्तादुत्तरत्रपुनः स्नात्वेतिपुनः शब्दसामर्थ्याच्चस्नानमाप्यतेअतोवपनानंतरंस्नानाचमनेविधायदंतान्प्रक्षालयेदितिसिद्धं उत्साद्यपुनःस्नात्वानुलेपनंनासिकयोर्मुखस्यचोपगृह्णीते प्राणापानौमइतिउत्साद्यसुगंधिद्रव्येणशरीरमुद्वर्त्यपुनःभूयःस्नात्वाशिरःप्रभृतीन्यंगानिप्रक्षाल्यअनुलेपनचंदनादिमुखनासिकयोःउपगृह्णीतेमुखंचनासिकेचअनुलिंपतिप्राणापानौमेतर्पयेत्यादिनाश्रोत्रंमेतर्पयेत्यंतेनमंत्रेणपितरःशुंधध्वमितिपाणीपादावनेजनंदक्षिणानिषिच्यानुलिप्यजपेत्सुचक्षाअहमिति ततःपाणिपादावनेजनेहस्तयोःप्रक्षालनमुदकंपितरःशुंधध्वमित्यनेनमंत्रेणप्राचीनावीतीदक्षिणामुखोभूत्वादक्षिणस्यांदिशिनिषिच्यप्रक्षिप्ययज्ञोपवीतीभूत्वापितृकर्मकरणनिमित्तकंउदकस्पर्शंविधायचंदनादिनासुगंधद्रव्येणगात्राण्यनुलिप्यसुचक्षाअहमित्यादिभूयासमित्यंतंमंत्रंजपेत् अहतेनवाससाधौतेनवामंत्रेणाच्छादयीतपरिधास्याइति ततःअहतेननवेनसदशंपवित्रंवासःवसनंआच्छादयीतपरिदध्यात् तदलाभेअमंत्रेणअरजकेनधौतंप्रक्षालितंपरिधास्या इत्यादिनाअभिसंव्ययिष्यइत्यंतेनमंत्रेण अथोत्तरीयंयशसामेति अथोत्तरीयपरिधानानंतरंनाहृशेम

वोत्तरीयं वासो यशसा मेत्यादिना यशोमा प्रतिपद्यतामित्यंतेन मंत्रेण आच्छादयीतेति गतेनाख्यानेन संबंधः एकं चेत्पूर्वस्योत्तर
वर्गेण प्रच्छादयीत वेद्यादि एक एव चा सो भवति तदा पूर्वस्यैव परिधानीयस्य वासस उत्तरवर्गेण उत्तरभागेन प्रच्छादयीत यश
सा मेति मंत्रेणोत्तरीयं कुर्यादित्यर्थः सुमनसा प्रतिगृह्णाति या आहरदिति सुमनसा पुष्पाणि प्रतिगृह्णाति अन्येन दत्ता आ
दत्तेया आहरदित्यादिना यशसा च भगेन चेत्यंतेन मंत्रेण अथाबबध्नीते यद्यशसीइति अथ ताः प्रतिगृह्य अबध्नीते शिरसि व
ध्नाति यद्यशोप्सरसा इत्यादिना यशो मयीत्यंतेन मंत्रेण उ ष्णीषेण शिरोवेष्टयते युवासुवासा इति उष्णीषेण पूर्वोक्तलक्षणेन
तृतीयेन वाससा शिरो मूर्धानं वेष्टयते युवासुवासा इत्यादिका या देवयंत इत्येतया ऋचा अलंकरणमसि भूयोलंकरणं भूयादि
ति कर्णवेष्टकौ अलंकरणमसीति मंत्रेण दक्षिणोत्तरयोः कर्णयोर्वेष्टकौ भूषणे प्रतिमंत्रं प्रतिमुंचते परिधत्ते वृत्रस्येत्य
ङ्क्षिणी वृत्रस्येत्यादिना चक्षुर्मे देहीत्यंतेन यथाक्रमं दक्षिणवामे मंत्रावृत्त्या अङ्क्ते सौवीराद्यं अंजनेन संस्करोति रोचिष्णुरि
त्यात्मानमादर्शे प्रेक्षेत रोचिष्णुरसीत्यनेन मंत्रेण आत्मानं सुखप्रभृति शरीरं आदर्शे दर्पणे प्रेक्षते पश्यति छत्रं प्रतिगृह्णा
ति बृहस्पतेश्छदिरसि पाप्मनो मामंतर्धेहि तेजसो यशसो मांतर्द्धेहीति छत्रं आतपत्रं बृहस्पतेश्छदिरसीत्यादिना यशसो मां
तर्द्धेहीत्यंतेन मंत्रेण प्रतिगृह्णीति प्रतिग्रहणसामर्थ्यात् अन्यत आरते प्रतिष्ठेस्थो विश्वतो मा यातमित्युपानहौ प्रतिमुंचते

उपानहौपादत्त्राणे प्रतिमुंचते परिधत्ते प्रतिष्ठेस्थोविश्वतोमायातमित्यनेनमंत्रेणमंत्रस्यद्विवचनांतत्वात्परिधातुंशक्यत्वा
च्च प्रतिष्ठेइतिद्विवचनेस्थइत्तिचयुगपत्पादयोः परिधत्ते विश्वाभ्यो मानाष्ट्राभ्यस्परिपाहिसर्वतइतिवैणवंदंडमादत्ते वि
श्वाभ्योमेत्यादिनामंत्रेण वैणवंवंशमयंदंडंयष्टिंआदत्ते गृह्णाति तत्रोक्तन्यायेनपूर्वदंडत्यक्त्वैव इदमभिषेकप्रभृतिदंडग्रहणं
तंकर्मजातंस्नानकर्त्ताकरोतिनाचार्यः दंतप्रक्षालनादीनिनित्यमपि वासश्छत्रोपानहश्चापूर्वाणिचेन्मंत्रः दंतप्रक्षालनमा
दौयेषांपुष्पादीनांतानिदंतप्रक्षालनादीनिनित्यमपिसर्वदामंत्रवंतिस्नातकस्यभवंति वाससीचछत्रंचउपानहौचछत्रोपान
हंचकारादंडोपिएतानिचेद्यदिअपूर्वाणिनूतनानिस्त्रियंतेतदामंत्रोभवतितद्ग्रहणे स्नानस्ययमान्वक्ष्यामः स्नानस्यब्रह्म
चर्यान्समावृत्तस्यद्विजातेःयमान्व्रतानिवक्ष्यामः कथयिष्यामहे कामादितरःकामात् इच्छयाइतरःद्विजातेरन्यः शूद्रा
इतियावत् यमेषुअस्नातकोपिअधिक्रियते नृत्यगीतवादित्राणिनकुर्यात्नचगच्छेत् नृत्यंलास्यादिभेदभिन्नंगीतंष
ड्जादिस्वरैः ध्रुवादिरूपकविशेषैर्निबद्धं वादित्रंतंत्र्यादिभेदेनचतुर्विधं नृत्यंचगीतंचवादित्रंचनृत्यगीतवादित्राणितत्ता
निस्वयंनकुर्यात् नचगच्छेत् नृत्यादिअन्यैरपिक्रियमाणानिनगच्छेत् इत्यर्थोनुचकारः करोतिर्गच्छतिक्रियासमुच्चयार्थः
कामंतुगीतंगायतिचैवगीतेवारमतइतिश्रुतेर्हि अत्रगीतेप्रतिप्रसवमाहतुपनःकामंइच्छयागीतंगानंस्वयंकुर्यात्

118

परैः क्रियमाणं च गच्छेत् छोतुं क्वतः हि यस्मात् गायति स्वयं गानं करोति गीतेन वा अन्यैः क्रियमाणेन गानेन रमते रतिं प्राप्नोति इति
श्रुते वेदवचनं क्तयः सर्वं कृत्स्नो मन्यते आत्मानं सुखिनं संपूर्णं मन्यते स्वयं गायन्ति गीतं च शृण्वन्ति अपरं सूत्रं अपरस्मापिगा
येन गीतं च शृणुयात् इत्येतदर्थज्ञापकं वेदे लिंगमस्ति यथाश्वमेधे श्रूयते दिवा ब्राह्मणो गायति नक्तं राजन्य इति अनेन ब्रा
ह्मणराजन्ययोः स्वयं गानेऽधिकारोस्तीति ज्ञायते तौ च अश्वमेधयाजिनं यजमानं राजन्यं श्रावयितुं गायतः तेन गायन श्रवणेष्व
धिकारो गम्यते क्षेमे नक्तं ग्रामान्तरं न गच्छेत् क्षेमे सति आपदभावे सति नक्तं रात्रौ ग्रामान्तरं अन्यग्रामं न गच्छेत् अक्षेमे तु गच्छेत्
न च धावेत् क्षेमे सतीत्यनुषज्यते न च धावेत् शीघ्रं न गच्छेत् उदपानावेक्षणवृक्षारोहणफलप्रपतनसंधिसर्पणविवृतस्नान
विषमलंघनसूक्तवदनसंध्यादित्यप्रेक्षणभिक्षणानि न कुर्यात् उदपानस्य कूपस्यावेक्षणं उपरि स्थित्वा अधोमुखीभूयावलो
कनं वृक्षे आरोहणं उपरिगमनं फलानां आम्रादीनां प्रपतने त्रोटनं संधौ संध्यासमये सर्पणं अध्वगमनं संधिना अप
मार्गेण वा सर्पणं विवृतेन नग्नेन स्नानं विषमस्य पर्वतगर्त्तादेः लंघनमतिक्रमणं शुक्तस्य अश्लीलस्य वदनं भाषणं अश्ली
लं तु त्रिविधं लज्जाकरं दुःकरं अमंगलसूचकं च संध्यासु आदित्यस्य सूर्यमंडलस्य रागतः प्रेक्षणं दर्शनं उपरक्तस्य वा रिप्रति
विंवितस्य च नोपरक्तं न वारिस्थमिति मनुस्मृतेः भिक्षणं भैक्षचर्या एतानि उदपानावेक्षणादीनि भिक्षणान्तानि वर्जयेत् न ह वै

गृ॰सू॰ स्नात्वाभिक्षेतापहवै स्नात्वाभिक्षांनयतोतिश्रुते: भिक्षणनिषेधेश्रुतिंप्रमाणत्वेनावतारयति स्नात्वासमावर्त्यनभिक्षेत ऽपत:।
भा॰ह॰ स्नात्वाभिक्षाअपनयति अपाकरोतिहवैइतिनिपातसमुदाय: निश्चयार्थइतिवेदवचनात् वर्षत्यप्रावृतोव्रजेदयमेववायापा
६९ नमपहनदिति देवेवर्षतिप्रावृत: अनाच्छादित: व्रजेत् गच्छेत अयंमेवज्रइत्यनेनमंत्रेण अप्स्वात्मानंनावेक्षेत अप्सुजले
आत्मानंस्वमुखंनावेक्षेत नपश्येत् अजातलोम्नींविपुंश्चींषंडंचनोपहसेत् समयेनजातानिलोमानियस्यासा अजातलो
म्नीतां अजातलोम्नींनोपहसेत् नचगच्छेत् विपुंश्ची चपुरुषाकारां स्त्रियंकूर्चादिविकारेण नोपहसेदित्यनुवर्तते षंढं
नपुंसकं नोपहसेदित्यनुवर्तते गर्भिणींविजन्येतिब्रूयात् गर्भिणीं अंतर्वत्नीं विजन्याइतिनामब्रूयात् वदेत् सकुलमि
तिनकुलंभगालमितिकपालंमणिधनुरितींद्रधनुर्गांधयंतींपरस्मैनाचक्षीत सकुलमितिनकुलंब्रूयात् कपालंकपरं
भगालंइतिब्रूयात् इंद्रधनु: मणिधनुरितिब्रूयात् परस्यगां सुरभींधयंतींवत्संपाययंतींपरस्मैअन्यस्मैस्वामिनेनाच
क्षीतनकथयेत् उर्वरायामनंतर्हितायांभूमावुत्सर्गंतिष्ठन्नमूत्रपुरीषेकुर्यात् उर्वरायांसस्यवत्यांभूमौपृथिव्यां केवला
यांतृणैरनंतर्हितायां मूत्रपुरीषेमूत्रस्यपुरीषस्यवाउत्सर्गंकुर्यात् किंचितिष्ठन् ऊर्ध्व: नकुर्यात् तथाउत्सर्गंनुस्रुवमान:सन् रामः
नकुर्यात् स्वयंप्रशीर्णेनकाष्ठेनप्रमृजीत स्वयंआत्मन:प्रयत्नंविनाप्रशीर्णेनस्वयंपतितेनकाष्ठेनदारुशकल ॥ ६९

120

पर्जन्यायनमः इदंपर्जन्याय अद्भ्योनमः इदमद्भ्यः पृथिव्यैनमः इदंपृथिव्यै इतिदद्यात् ततोद्वारशाखयोर्दक्षिणोत्त
योर्यथाक्रमं धात्रेनमः इदंधात्रे विधात्रेनमः इदंविधात्रे इतिद्वौबलीदत्वाप्रतिदिशंवायवेनमः इत्यनेनैवचनसृ
दिक्षुचतुरोबलीन्दद्यात् इदंवायवेनममइतित्यागः ४ दिशांच प्राच्यैदिशेनमः दक्षिणायैदिशेनमः प्रतीच्यैदिशेनमः
उदीच्यैदिशेनमः इदंप्राच्यैदिशे इदंदक्षिणायैदिशे इदंप्रतीच्यैदिशे इदमुदीच्यैदिशे इत्यादिदिग्भ्यश्चबलीन्दद्यात् दत्ता
नांबलीनामंतरालेब्रह्मणेनमः इदंब्रह्मणे अंतरिक्षायनमः इदमंतरिक्षाय सूर्यायनमः इदंसूर्यायेतिप्राक्संस्थंबलित्र
यंदद्यात् ततोब्रह्मादीनांबलित्रयाणामुत्तरप्रदेशेविश्वेभ्योदेवेभ्योनमः इदंविश्वेभ्योदेवेभ्यः विश्वेभ्योभूतेभ्योनमः इदं
विश्वेभ्योभूतेभ्यः इतिद्वौबलीदद्यात् तयोरुत्तरः उषसेनमः इदमुषसे भूतानांचपतयेनमः इदंभूतानांचपतयेइतिद्वौब
लीदद्यात् इतिभूतयज्ञः ततः ब्रह्मादीनांबलीनांदक्षिणप्रदेशेप्राचीनावीतीदक्षिणामुखः पितृभ्यः स्वधानम

इतिमंत्रेणैकंबलिंपात्रेअवशिष्टान्नेनदद्यात् इतिपितृयज्ञः तत्पात्रंप्रक्षाल्यनिर्णेजनजलंब्रह्मादिबलीनांवाय
व्येनिनयेतयक्ष्मैतत्तेनिर्णेजनंइत्यनेनमंत्रेण इदंयक्ष्मणे ततः काकादिबलीन्बहिर्दद्यात् तद्यथा ऐंद्रवारुणवायव्याः

गृ·स्
भा·ह
७५

सौम्या वैनैर्ऋतास्तथा वायसाः प्रतिगृह्णंतु भूमौ पिंडं मयार्पितं इदं वायसेभ्यः श्वानौ द्वौ श्यामशवलौ वैवस्वतकुलोद्भवौ ताभ्यां पिंडं प्रदास्या
मि स्यातामेतावहिंसकौ इदं श्वभ्यां देवा मनुष्याः पशवो वयांसि सिद्धाः सयक्षोरगदैत्यसंघाः प्रेताः पिशाचास्तरवः समस्ता ये चान्न
मिच्छंति मया प्रदत्तं इदं देवादिभ्यः पिपीलिकाः कीटपतंगाद्याः बुभुक्षिताः कर्मनिबंधबद्धाः तेषामर्थमन्नं हि मया प्रदत्तं तेषामिदं तेमु
दिता भवंतु इदं पिपीलिकादिभ्यः पादौ प्रक्षाल्याचम्य अतिथिप्राप्तौ पादप्रक्षालनपूर्वकं गंधमाल्यादिभिरभ्यर्च्य अन्नं परिवेष्य हंत
तेन्नमिदं मनुष्यायेति संकल्प्य तमाशयेत् तदभावे षोडशग्रासपरिमितं चतुर्ग्रासपरिमितं वा अन्नं पात्रे कृत्वा निवीती भूत्वोद
ङ्मुखउपविष्टो हंत तेन्नमिदं मनुष्यायेति संकल्प्य कस्मैचिद्ब्राह्मणाय दद्यात् मनुष्ययज्ञसिद्धये ततो नित्यश्राद्धं कुर्यात् तद्यथा
स्वागतवचनेन षट् ब्राह्मणान्द्वौ वा एकं वाभ्यर्च्य पादौ प्रक्षाल्य आचम्य गृहं प्रवेश्य कुशांतर्हितेष्वासनेषूदङ्मुखानुपवेशयेत् ततः
स्वयमाचम्य प्राङ्मुख उपविश्य पुंडरीकाक्षं श्रीवासुदेवं च संस्मृत्य सावित्रीं पठित्वा अद्येहेत्यादि देशकालौ स्मृत्वा प्राचीनावीती द
क्षिणामुखः सव्यं न्वाच्य अमुकसगोत्राणां अस्मत्पितृपितामहप्रपितामहानां अमुकामुकशर्मणां तथा अमुकगोत्राणां अस्म
न्मातामहप्रमातामहवृद्धप्रमातामहानां अमुकामुकशर्मणां नित्यश्राद्धमहं करिष्ये इति प्रतिज्ञाय नित्यश्राद्धं कुर्यात् ततो यथार्हं भि
क्षुकादिभ्यो न्नं संविभज्य बालज्येष्ठाश्च गृह्याय यथायोग्यमश्नीयुः ततो जायापती अश्नीतः पूर्वो वा गृहपतिः पत्नी तौ तिथ्यादीनाशयित्वाश्नीया

१२२
राम:
७५

जा

दिति अथातोध्यायोपाकर्म अथपंचमहायज्ञकथनानंतरं अध्यायस्य अध्ययनस्यउपाकर्मउपाकरणं आरम्भास्यतेइ
विशेषः तच्चाग्निमतोऽध्यायनप्रवृत्तस्यैवभवति छंदांस्युपाकृत्याधीयीतेतिबचनात् उपाकरणस्यचावसथ्याग्निसाध्यत्वा
व निरग्नेर्नाधिकारः तथाचछंदोगपरिशिष्टे कात्यायनः नस्वेग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिं स्वगर्भसंस्कृतावाथीअया
वन्नासौप्रजायतेइति स्वेन आत्मना आहितः आधानसंस्कृतोग्निः स्वः तस्मिन्स्वेऽग्नौ अन्यस्यसंबंधीसंस्कारकोहोमः अन्यहो
मः सनस्यात् नभवेत् किं पर्युदस्य एकां समिदाहुतिं समिधआहुतिः समिदाहुतिः तामुक्त्वावर्जयित्वा साचसमिदाहुतिः उ
पाकर्मणि आचार्यस्याग्नौ शिष्यकर्तृका भवति तेनावसथ्याग्नावुपाकर्म भवतीतिगम्यते अतः अध्यापयतोपिनिरग्नेः साग्ने
रपि अनध्यापयतोनाधिकारः यत्तु लोके ब्रह्मचारिणां पुरस्कृत्यउपाकर्मप्रवर्तते लौकिकाग्नौनस्याचारं विहाय मूलं नदृ
श्यते ओषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्यां ओषधीनाम पामार्गादीनां प्रादुर्भावे उत्पत्तौ सति श्रवणेनयुक्तायां
श्रावण्यां पौर्णमास्यां श्रावणमासस्य शुक्लपंचदश्यां अत्र ओषधिप्रादुर्भावः श्रवणश्च पौर्णमास्याएकविशेषणं तत्रतयोः
प्रायशः संभवात् एवं च सति पौर्णमास्याएव प्राधान्यं तस्माद्विशेषणाभावेपि पौर्णमास्यां भवति श्रावणस्य पंचमीं हस्तेन वा
ओषधिप्रादुर्भाववस्तु सर्वत्रापेक्षितः श्रावणमासस्य पंचमी हस्तेनयुक्तां वा प्राप्य भवति तत्रापि प्रायेण हस्तो भवति अतः श्रा

गृ॰सू॰ भा॰ह॰ ७६

वणीपूर्णिमाश्रावणपंचमीवाविशिष्टाअविशिष्टावाउपाकर्मणः कालः अन्येतुकालचतुष्टयमाहुः अथश्रवणेनवाश्रावण्यां
पौर्णमास्यांवाश्रावणस्यपंचमींवाहस्तेनवेतिऔषधिप्रादुर्भावस्तुसर्वत्रापेक्षितः औषधिप्रादुर्भावेसतिश्रवणेनइत्यादिआज्यभा
गाविष्ट्वाज्याहुतीर्जुहोतिपृथिव्याअग्नयइत्यृग्वेदेंतरिक्षायवायवइतियजुर्वेदेदिवेसूर्यायेतिसामवेदेदिग्भ्यश्चंद्रमसइत्यथर्ववे
देब्रह्मणेछंदोभ्यश्चेतिसर्वत्रप्रजापतयेदेवेभ्यऋषिभ्यःश्रद्धायैमेधायैसदसस्पतयेऽनुमतयइतिच आज्यभागाविष्ट्वाआज्यभाग
होमानंतरंआज्याहुतीर्जुहोति तत्रऋग्वेदेअधीयमानेपृथिव्यैअग्नयइतिद्वेआहुतीर्जुहोति यजुर्वेदअधीयमानेअंतरिक्षायवा
यवायवइतिद्वे सामवेदेअधीयमानेदिवेसूर्यायेतिद्वे अथर्ववेदेअधीयमानेदिग्भ्यश्चंद्रमसइतिद्वे ब्रह्मणेछंदोभ्यश्चेतिद्वेआहुती
सर्वत्रप्रतिवेदमावर्त्तयेत् सर्वेषुवेदेषुअधीयमानेषुएकतंत्रमेवातथाप्रजापतयइत्यादिकाश्चसप्तचशब्दात् सर्वत्रएवमेकैक
शोवेदाध्यापनोपाकरणपक्षे यदापुनश्चतुर्णामपिवेदानांतंत्रेणोपाकरणकर्मतदाब्रह्मणेछंदोभ्यश्चेतिप्रतिवेदाहुतिद्वय
मावर्ततेप्रजापतयेदेवेभ्यइत्याद्यास्तंत्रेणैव योगविभागसामर्थ्यात् एतदेवव्रतादेशनविसर्गेषु एतत्उपाकर्मणिविहितंपृथि
व्याइत्यादिअनुमतयइत्यंतंहोमकर्मव्रतादेशनेवेदारंभः विसर्गःसमावर्त्तनं व्रतादेशनानिचविसर्गाश्चव्रतादेशनविस
र्गास्तेषुभवति सदसस्पतिमित्यक्षतधानास्त्रिःसर्वेऽनुपठेयुर्हुत्वाहुत्वोदुंबर्यास्तिस्रस्तिस्रःसमिधआदध्युराद्रीःसपला

एमः ७६

शाघृताक्ताः सावित्र्यासदसस्पतिमित्यनेनमंत्रेण अक्षताश्चधानाश्चताः अक्षतधानाः ताः आचार्योजुहोति त्रिस्त्रिवा
रंसर्वेचशिष्याः एतंमंत्रअनुसहपठेयुः तथाहुत्वाएकैकामाहुतिंहुत्वाऔदुंबर्यः उदुंबरवृक्षोद्भवास्तिस्रस्तिस्रः आ
र्द्राः सरसाः सपलाशाः पत्रसहिताः घृताक्ताः आज्यलिप्ताः समिधः सर्वेआचार्यप्रमुखाशिष्याः आदध्युः अग्नौसावि
त्र्याप्रसिद्धयाप्रक्षिपेयुः भेदेन नतुयुगपत् ब्रह्मचारिणाश्चपूर्वकल्पेन तत्रयेब्रह्मचारिणः शिष्याः तेपूर्वकल्पेनसमि
दाधानोक्तमंत्रेणआदध्युः अत्रातिस्रस्तिस्रइतिवीप्सानसमिद्विषया किंतुआधानप्रकृष्टविषयातेनप्रत्याहुतिंएकै
कामादध्युः शन्नोभवंत्वित्यक्षतधानाअखादंतः प्राश्नीयुः शन्नोभवंतुवाजिनइत्यनयर्चाअक्षतधानाअखादंतः
दंतैरनवखंडयन्तः प्राश्नीयुः दधिक्राण्णइतिदधिभक्षेयुः दधिक्राण्णोअकारिषमित्यृचादधिभक्षयेयुः सयावंतंगणमि
च्छेत्तावतस्तिलानाकर्षफलकेनजुहुयात्सावित्र्याशुक्रज्योतिरित्यनुवाकेनवासआचार्योयावंतंयावत्संख्याकंशिष्या
णांगणंसमूहमिच्छेत् तावत्संख्याकान्तिलान्आकर्षफलकेनऔदुंबर्येणवाहुमात्रेणसप्र्याकृतिनासावित्र्यासवितुर्देव
तयागायत्रच्छंदस्कयाप्रसिद्धयाजुहुयात् यद्वाशुक्रज्योतिरित्यनुवाकेनजुहुयात् गणफलमेतत् अतोधानाभ्यः स्विष्टकृ
तिहुत्वामहाव्याहृत्यादिनवाहुतीर्हुत्वा प्राशनांतेप्रत्यङ्मुखेभ्यउपविष्टेभ्यउँकारमुक्त्वात्रिश्चसावित्रीमध्यापयादीनब्रूया

वा= वा=

चसावित्रीमुक्त्वाइषेत्वाकृष्णोसीत्येवंमंत्रस्यअध्यायनामादीन्प्रतीकान्ब्रूयात् तथाचव्रतमुपेयुषःसर्वेकपालान्यिवान्यत
रउपदधातीत्येवंचब्राह्मणस्य ऋग्वेदानांमंडलादीन् छंदोगानांपर्वादीन् आथर्वणानांसूक्तादीन् ततः सर्वेआचार्याः
शिष्याश्चजपंति सहनोस्तु सहनोवतु सहनइदंवीर्यंवदस्तुब्रह्म इंद्रस्तद्वेदयेनयथानविद्विषामहोइति अमुंमंत्रंतद
नंतरंत्रिरात्रमनध्यायंकुर्युः यतः अनध्यायेष्वध्ययनेप्रज्ञामायुः प्रजांश्रियं ब्रह्मवीर्यंबलंतेजोनिकृंततियमः स्वयंमंत्र
वीर्यंक्षयमयादिंद्रोवज्रेणहंतिच ब्रह्मराक्षसतांचेतिनरकंचभवेत् ध्रुवं लोमनखानांनिकृंतनं नकर्त्तयेयुः त्रिरात्रमेव
प्रागुत्सर्गाद्वालोमनखानांचनिकृंतनंवर्जयेयुः अतः मंत्रब्राह्मणयोः शुक्लकृष्णपक्षेउत्सर्जनंयावत् निरंतरंमंत्रब्रा
ह्मणंचअधीयीरन् आचार्येणाध्याप्यमानाःशिष्याः इत्युपाकर्मइदानींत्रिरात्रेणाधीयीरन्नित्यनध्यायप्रसंगात् अ
नध्यायानाह वातेमावास्यायां सर्वानध्यायः वातेवायौप्रचंडेवातिसतिवातमात्रस्यसर्वदाविद्यमानत्वात् नानध्या
यनिमित्तता अमावास्यायांदर्शेचसर्वानध्यायः सर्वेषुवेदेषुवेदांगेषुअनध्ययनेअध्ययननिवृत्तिः सर्वानध्यायः
मतांतरेयद्गुरुमुखाच्छिष्यतेशिल्पश्रमादितत्राप्यनध्यायः यतः शिल्पिनः स्थपत्यादयः श्रमिणोमल्लादयः अनध्या
यमन्यंतेदृश्यंते अतोयत्किंचिदुपाध्यायतः अधीयनेश्रूयतेवाशिष्यतेवातत्रसर्वत्रानध्यायः सचानध्यायः गुरोः सकाशा

प्रोक्षणकाले प्रोक्षेच्च तथोपकल्पयति उदुंबरीः समिधः दधि आकर्षफलकं तिलान् भक्षार्थं धानाः ततआज्यभागांते वे

दारंभ इत्यादीननुमंत्रितानां वेदारंभवद्धोमं विदध्यात् एकदा सर्ववेदोपकरणे प्रति वेदमाज्याहुति द्वयं द्वयं हुत्वा हुत्वा ब्रह्मणे छं

दोभ्य इत्याहुति द्वयं पुनः पुनर्जुहुयात् प्राजापत्याद्या अनुमंत्रिताः सप्ताहुतीस्तंत्रेण अथ सदसस्पतिमित्यनयर्चा स्रुवेण

आसादिताभिरक्षतधानाभिरेकामाहुतिं आचार्यो जुहोति इदं सदसस्पतये शिष्या अपि मंत्रं गुरुमनु मंत्रं उपांशु पठंति तत

आचार्यः शिष्याश्च सर्वे औदुंबरीमार्द्रां सपलाशां घृताक्तां एकैकां समिधं तत्सवितुरित्यादिकया सावित्र्या अग्नावादध्युः ब्र

ह्मचारिणश्च शिष्याः अग्निकार्यमंत्रेण तथैव समिदं आदध्युः एवं द्विरपरं धानाहोमं विधाय एकैकां समिधमादध्युः तत

आचार्यः शिष्याश्च उपकल्पितधानाभ्यस्त्यक्ताऽक्षतधाना अनवखंडयंतो भक्षयेयुः शन्नो भवंतु वाजिन इत्यनयर्चा तत

आचम्य ततो दधिक्राव्णो अकारिषमित्यनयर्चा दधि भक्षयेयुः ततआचमनानंतरं आचार्यो यावंतं शिष्यगणं कामयेत

तावतस्तिलानाकर्षफलकेनादाय सावित्र्या जुहुयात् इदं सवित्रे शुक्रज्योतिरित्यनेनानुवाकेन वा तिलान् जुहुयात् त

त्रेदं मरुद्भ्य इति त्यागः ततो हुतशेषधानाभ्यः स्विष्टकृतं हुत्वा महाव्याहृत्यादि प्राजापत्यांता नवाहुतीर्हुत्वा संस्रवप्राशनं ब्र

ह्मणे दक्षिणादानं यथोक्तं कुर्यात् ततः प्रत्यङ्मुखोपविष्टेभ्यः शिष्येभ्यः प्राङ्मुख आचार्य उपविष्टः ॐकारमुक्त्वा त्रिवारं

127

हषिमुखानिबह्वृचानांपर्वाणिछंदोगानांसूक्तान्यथर्वणानांसंस्रवप्राशनानंतरंप्रत्यङ्मुखेभ्यः आसीनेभ्यःशिष्येभ्यःसा
मर्थ्यान्स्वयंप्राङ्मुखउपविष्टंॐकारंप्रणवमुक्त्वाउच्चार्यतत्सवितुरित्यादिकांचसावित्रींत्रिरुक्त्वामंत्रब्राह्मणयोःअध्ययना
मादीन्प्रब्रूयादध्यापयेत् इतियजुर्वेदोपाकरणे ऋग्वेदोपाकरणेतुबह्वृचानांशिष्याणांऋषिमुखानिमंडलादीन्ब्रूया
त्छंदोगानांसामगानांशिष्याणांसामोपाकरणेपर्वाणिपर्वेणामादीन्प्रब्रूयात् अथर्वणानांशिष्याणांअथर्ववेदोपाकर
णेसूक्तानिसूक्तादीन्वब्रूयात् सर्वेजपंतिसहनोस्तुसहनावतुसहनइदंवीर्यवदस्तुब्रह्म इंद्रस्तद्वेदयेनपथानविद्विषाम
हतिसर्वेआचार्यशिष्याश्चसहनोस्त्वित्यमुंमंत्रंजपंति त्रिरात्रंनाधीयीरन्लोमनखानामनिकृंतनमेकेप्रागुत्सर्गात्उपाक
र्मानंतरंत्रिरात्रंनाधीयीरन् अध्ययनंनकुर्युःत्रिरात्रमेवलोम्नांनखानांचअकृंतनंअछेदनं एकेआचार्याःलोमनखा
नामनिकृंतनंप्रागुत्सर्गात् उत्सर्गकर्मणःअर्वाक्इच्छंति उत्सर्गश्चअर्द्धषष्ठान्मासानधीत्योत्सृजेयुरित्येवंवक्ष्यमाणमिति
सूत्रार्थः अथपद्धतिःश्रावण्यांपूर्णमास्यांश्रवणयुक्तायांश्रवणरहितायांवाश्रावणस्यशुक्लपंचम्यांहस्तयुक्तायामपक्का
यांवाउपाकर्मअध्यायोपाकर्मभवति तच्चअध्यापनंकुर्वन्एवऔपासनिकस्यनत्वन्यस्य तत्रप्रथमप्रयोगेविहितमातृपू
जापूर्वकंश्राद्धंआचार्यःआवसथ्याग्नौपवेशनाद्याज्यभागांतेविशेषमनुतिष्ठेत् तंदुलस्थानेअक्षतधानाआसादयेत्

१२९

नावंतं करंभिणमित्यृचा धानामेकाहुतिं हुत्वा इदमिंद्रायेतित्यक्त्वा सक्तूनामाहुतित्रितयं जुहुयात् यथाग्नेयपाण्डुपार्थिवा
नांसर्प्पाणामधिपतये स्वाहा इदंशब्दयुक्ताः स्वाहाकाररहितो यमत्र एव त्यागः त्रिष्टुभ्श्वेतवायवान्तरिक्षाणांसर्पाणाम
धिपतये स्वाहा अभिभूः सौर्यदिशानांसर्पाणामधिपतये स्वाहा ततो ध्रुवाय भौमाय स्वाहेति सर्वपुरोडाशं स्रुवेणैकत्वा जुहुयात् इदं
ध्रुवाय भौमायेति त्यक्त्वा चरुधानासक्तुभ्य उत्तरतः किंचित्किंचिदादाय स्विष्टकृतं विधाय महाव्याहृतिहोमसंस्रवप्राशनं ब्रह्मणे द
क्षिणादानांतं कुर्यात् अथ हुतशेषसक्तूनामेकदेशं शूर्पे प्रक्षिप्यादायोदपात्रं दर्वीं कंकतत्रयांजनानुलेपनस्रजश्च शालाया
बहिर्निष्क्रम्य ब्रह्मणा उल्काधारेण सह स्वागणो हस्तमात्रं स्थंडिलं स्वयमुपलिप्य लौकिकाग्न्युल्का यां ध्रियमाणायां मांतरागम
नेति प्रैषमुच्चार्य वाग्यतः स्थंडिले उदपात्रमादायाग्नेयेत्यादिना अधिपतेऽवनेनिक्ष्वेत्यंतेन एकत्रावनेजनार्थं जलं दत्वा श्वेतवाय
वेत्यादिना अधिपतेऽवनेनिक्ष्वेत्यंतेन द्वितीयं अभिभूः सौर्येत्यादिना तथैव तृतीयं सर्पानवनेजयति ततोऽवनेजनस्थानेषु अवनेज
नक्रमेण एतैरेव मंत्रैरेष ते बलिरित्यंतैस्त्रिभिः प्रतिमंत्रं बलिं हरंति ततः पूर्ववदवनेजनपकं कंकतत्रयेण प्रलिखस्वेत्यंतैः एतैरेव मंत्रैः
प्रतिबलिं प्रतिमंत्रं प्रलिखति ततोंजस्वेत्यंतैरुक्तमंत्रैः प्रतिबलि प्रतिमंत्रं अंजनं ददाति तथैवानुलिंपस्वेत्यनुलेपनं एवमेव
स्रजोनह्यस्वेति पुष्पमालां दत्वा सक्तुशेषं स्थंडिले क्षिप्त्वा उदपात्रजलेन प्रक्षाल्य नमोस्तु सर्वेभ्य इत्यादिभिस्तिसृभिर्ऋग्भिः सर्पा

130

गृ·सू· भा·द्वि· ८५

स्त्रिष्टन्नुपतिष्ठते ततः सगृहपतिं एतावंतं देशं सर्पा न प्रविशेयुरिति यावत्कामयेत् तावंतं देशं सं ततोदकधारयास्त्रिः परीषिं
चन्नगृहं परीयात् अपश्वेतपदाजहीति पूर्वोक्तमंत्राभ्यासकृत् द्विस्तूष्णीं ततो दर्वीं शूर्पं च प्रक्षाल्योल्कायां सक्तत्रतप्योल्का
धारायां प्रयच्छति अथ शालाद्वारि आपो हि ष्ठेति ऋचेन ब्रह्मयजमानोल्काधाराः मार्जयंते जलेनात्मानं ततो धानाः प्राश्नंति
ब्रह्मयजमानोल्काधारा अनवखंडयंतः ततो ब्राह्मणभोजनमेतावच्छ्रवणाकर्म· अथ प्रत्यहबलिहरणप्रयोगः सक्तुशेषं
सुगुप्ते भांडे स्थापयित्वा ततो स्तमिते सूर्ये कृतसायंहोमः शूर्पसक्तु दर्वीं कंकतं तन्नयं निधायोदपात्रं गृहीत्वा सोल्कः शालाया
बहिः रूपलेपनादि पीरलेखनांते बलिहरणं अनुदिनं पूर्ववत्कुर्यात् आग्रहायणीं यावत् मांतरागमतेति प्रेषाभावे पि कश्चित्
अंतरा न गच्छेत् दर्वीमुखमेव प्रक्षालयेदिति अहरहर्बलिदानविधिः प्रोष्ठपद्यामिंद्रयज्ञः प्रोष्ठपदी भाद्रपदी प्रकरणात्
पौर्णमासी तस्यां इंद्रयज्ञनामधेयं कर्म भवति औपासनाग्नौ पायसमैंद्रं श्रपयित्वा ऽपूपांश्च पायसं पयसा सिद्धं चरुं ऐंद्रं इं
द्र देवत्यं श्रपयित्वा यथाविधि पक्त्वा अपूपांश्च चतुरः श्रपयित्वा तांश्च चतुरः प्रतिदिशं स्तरणार्थं हि नैऐंद्रमित्यनेन देवता तद्धि
तेन इंद्राय स्वाहेति होमस्य मंत्रांतरस्य चानुक्तत्वात् अत्र पायसश्रवणोपदेशात् पयश्च प्रणीयते अपूपैस्तीर्त्वा आज्यभागाविष्ट्वा आज्या
हुतीर्जुहोति इंद्रायेंद्राण्या अजायैकपदे ऽहिर्बुध्न्याय प्रोष्ठपदाभ्यश्चेति अपूपैः प्रतिदिशमग्निं स्तीर्त्वा परिस्तीर्य आज्यभागौ हु

रम: ८५

त्वाइंद्रायेत्यादिभिः स्वाहांतैः पंचभिर्मंत्रैः प्रतिमंत्रं पंचाहुतीर्जुहोति अत्रानुक्तोपि पायसेन इंद्राय स्वाहेत्येकाहुतिर्होमः
अन्यथा पायसश्रवणमदृष्टार्थं स्यात् प्राशनांते मरुद्भ्यो बलिं हरत्यहुतादो मरुत इति श्रुतेः ततः स्विष्टकृदादि प्राशनांते म
रुद्भ्यः एकोनपंचाशत्संख्येभ्यो देवताभ्यः बलिं ददाति ननु मरुतां देवतात्वे सति कथं होमसंबंधरहितत्वं बलिदानार्हत्वं च
शृणु अहुतादो मरुत इति श्रुतेः अहुतमदंतीत्यहुतादः मरुतो देवाः इति श्रुतेः वेदवचनात् आश्वत्थेषु पलाशेषु मरुतो अश्व
त्थेषु तस्थुरिति वचनात् मरुद्भ्यो बलिं हरतीत्युक्तं तस्याधिकरणमुच्यते अश्वत्थस्य इमानि आश्वत्थानि तेषु पिप्पलीद्र
वेषु पात्रेषु बलिं हरतीति शेषः ननु बलिहरणं भूमौ अन्यत्र दृश्यते इह कस्मादश्वत्थपत्रेष्विति शंकते आह मरुतः शुक्र
ज्योतिप्रभृतयो यस्मात् अश्वत्थे तस्थुः स्थितवंतः इति वचनात् श्रुतेः शुक्रज्योतिरिति प्रतिमंत्रं विष्णुमुखेन च मनसा नाम
न्येषां मतानीति श्रुतेः मंत्रापेक्षायामाह शुक्रज्योतिरित्येवमादिभिर्मंत्रैः नमस्कारांतैः प्रतिमंत्रं विष्णुमुखेन च उग्रश्च भीमश्चेत्येव
मादिना अध्येतृप्रसिद्धेन मनसा मनोव्यापारेण बलिं हरतीति शेषः कृतः एभिर्मंत्रैर्बलिहरणं एषां मरुतां एतानि शुक्रज्यो
तिश्च चित्रज्योतिश्चेत्येवमादीनि विक्षिपद्रूपतानि नामानि इति श्रुतेः वेदवचनात् इंद्रं दैवीरिति जपति बलिहरणांते इंद्रं दैवी
रित्येतामृचं जपति ततो ब्राह्मणभोजनमिति सूत्रार्थः अथ प्रयोगः भाद्रपदपौर्णमास्यां प्रथमप्रयोगे मातृपूजापूर्वकमा

गृ॰सू॰
भा॰ह॰
८६

स्युदयिकंविधायावसथ्याग्नौइंद्रयज्ञारंभकर्मकुर्यात् तत्रब्रह्मोपवेशनादिप्राशनांतेविशेषःसक्षीरंप्रणयनंमूलदे
शेपयःइतरत्रजलंप्रक्षिप्यप्रणयेत् उपकल्पनीयानितंडुलपिष्टंसमाश्वत्थपर्णानि ततआज्यनिर्वापानंतरं प्रणीताभ्यः
क्षीरमुत्सिच्यचरुपात्रेतंडुलान्प्रक्षिप्यप्रणीतोदकेनपिष्टंसंपूयचतुरोपूपान्निर्मायाज्यमधिश्रित्यतदुत्तरःकर्परेचतुरोपू
पान्अधिश्रयति आसादनक्रमेणोद्वासनादिततउपयमनकुशादानान्तपूर्वंअपूपैःअग्नेःपुरस्तात्दक्षिणतःपश्चिमतः
उत्तरतश्चएकैकेनपरिस्तरणंकृत्वाज्यभागांतेपंचाज्याहुतीर्जुहोति इंद्रायस्वाहाइदमिंद्राण्यैस्वाहा इदमिंद्राण्यै अजायै
कपदेस्वाहाइदमजायैकपदे अहिर्बुध्न्यायस्वाहाइदमहिर्बुध्न्याय प्रौष्ठपदाभ्यःस्वाहाइदंप्रोष्ठपदाभ्यःततःपायसेनइं
द्रायस्वाहेत्येकामाहुतिंहुत्वाइदमिंद्रायेतित्यक्त्वापायसेनैवस्विष्टकृद्धोमंविधायमहाव्याहृत्यादिहोमसंस्रवप्राशनद
क्षिणादानानिकुर्यात् अथाग्नेरुत्तरतःप्राक्संस्थानिप्रागग्राणिसप्ताश्वत्थपत्राणिनिधायतेषुमरुद्भ्योबलीन्हरति पा
यसशेषंस्त्रुवेणादायादायशुक्रज्योतिरित्येवमादिभिःषड्भिर्मंत्रैर्नमस्कारांतैरुग्रश्चभीमश्चेत्येतैर्नैवसप्तमेनच मनसाच्चा
रितेनचप्रतिमंत्रंसप्तसुपत्रेषुयथाक्रमंस्पष्टार्थंप्रयोगउच्यते त्यागश्च शुक्रज्योतिश्चेत्यारभ्यऋतपाश्चात्यंहानमः
इदंशुक्रज्योतिषेचित्रज्योतिषसत्यज्योतिष्मतेशुक्रायऋतपसेत्यंहसेच ईदृङ्गान्यादृङ्इत्यादिसभरसेनमः इदमीदृशे

रामः
८६

अन्यादृक्षेसदृक्षे प्रतिसदृक्षे मितायसंमितायसभरसेच ऋतश्चेत्यादिविधारयेनमः इदमृतायसत्यायध्रुवायधरुणायधर्त्रे
विधारयायच ऋतजिदित्यारभ्यगणोनमः इदमृतजितेसत्यजितेसेनजितेसुषेणायअंतिमित्रायदूरेअमित्रायगणायच ईदृक्षास
इत्यारभ्ययज्ञेत्रस्मिन्नमः इदमीदृक्षेभ्यः एतादृक्षेभ्यः प्रतिसदृक्षेभ्योमितेभ्यः संमितेभ्यः सभरोभ्योमरुद्भ्यश्च स्वतवांश्चेत्या
दिउज्जेषीनमः इदंस्वतवसेप्रघासिनेसांतपनायगृहमेधिनेक्रीडिनेशाकिनेउज्जेषिणेच उग्रश्चेत्यारभ्यविक्षिपः स्वाहानमः
मनसाइदमुग्रायभीमायध्वांतायधुनयेसासह्वभियुग्वनेविक्षिपायचेत्यपिमनसानततइंद्रदेवीरित्येतामृचंजपतियजमानः
ततोब्राह्मणभोजनमिति आश्वयुज्यांपृषातकापृषातकइतिसंज्ञकंकर्मभवति पृषातकाआश्वयुज्यांपौर्णमास्यांभवति
पायसमैंद्रंश्रपयित्वादधिमधुघृतमिश्रंजुहोतिसूत्रं तत्रऐंद्रं इंद्रदेवत्यंपायसंचरुंसंसाध्यदधिमधुघृतैर्मिश्रंकृत्वाआव
सथ्याग्नौजुहोति केभ्यइत्याह इंद्रायेंद्राण्याअश्विभ्यामाश्वयुज्यैपौर्णमास्यैशरदेवेति इंद्रायेत्यादिभिः पंचभिर्मंत्रैः स्वाहा
कारांतैः प्रतिमंत्रंपंचाहुतीर्जुहोति यथामंत्रवर्णंत्यागः प्राशनांतेदधिपृषातकमंजलिनाजुहोत्यूनमेपूर्यतांपूर्णंमेमास
गात्स्वाहेतिततः स्विष्टकृत्प्रभृतिप्राशनांतेदध्नापृषातकः पृषदाज्यंदधिपृषातकं पृषदाज्यं दधिपृषातकमंजलिनाऊनम
इत्यादिनामंत्रेणजुहोति पृषदाज्यंघृतेदधिप्रक्षेपाद्भवति दधिमधुघृतमिश्रममत्रापात्रेवेक्षंतआपातिंद्रइत्यनुवाकेनततो

दधिमधुघृतमिश्रं हुतशेषं पायसं अमात्या अमा च गृहं तत्र भवा अमात्या यजमानस्य गृह्याः भ्रातृपुत्रादयः आ पालिंद्रो वस
उपन इत्यारभ्य यूयं पात स्वस्तिभिः सदा न इत्यंतेन अनुवाकेनापेक्षते पश्यति मातृभिर्वत्सान् संसृज्यतां रात्रिं तां अभ्युय
जीसंबंधिनीरात्रिं वत्सान् मातृभिर्जननीभिर्धेनुभिः संसृज्य संसृष्टान्कृत्वा तां रात्रिमिति कालाध्वनोरत्यंतसंयोगे इत्युपप
दविभक्तिः द्वितीया तेन नसंध्याया वत्सान् संसृज्य सकलां रात्रिं न वध्नीयात् आग्रहायणीं च न केवलं तामेव रात्रिं वत्ससंसर्गः
आग्रहायणीं च मार्गशीर्षसंबंधिनीमपि रात्रिं ततो ब्राह्मणभोजनमिति सूत्रार्थः अथ प्रयोगः तत्र आश्वयुज्यां पौर्णमा
स्यां पृषातकाख्यं कर्म भवति तद्यथा प्रथमप्रयोगे मातृपूजाभ्युदयिकपूर्वकं आवसथ्याग्नौ ब्रह्मोपवेशनादि प्राशनांते
विशेषः सक्षीराः प्रणीताः प्रणयेत् दधिमधुनी उपकल्पयेत् प्रणीताक्षीरेण पायसं श्रपयेत् तत उपयमनकुशा
दानादर्वाक् पायसे दधिमधुघृतानि स्रावयेत् आज्यभागानंतरं दधिमधुघृतमिश्रेण पायसेन इंद्राय स्वाहा इद
मिंद्राय अग्निभ्यां स्वाहा इदमग्निभ्यां आश्वयुज्यै पौर्णमास्यै स्वाहा इदमाश्वयुज्यै पौर्णमास्यै शरदे स्वाहा इदं श
रदे एवं पंचाहुतीर्हुत्वा ततः एव पायसात् स्विष्टकृतं हुत्वा महाव्याहृत्यादि दक्षिणादानांते स्थाल्यामाज्यं दधि आसिच्य
एषदाज्यं कृत्वा अंजलिनादाय ऊनं मे पूर्यतां पूर्णं मे मा व्यगात् स्वाहेति मंत्रेण कामाहुतिं जुहोति इदमग्नये ततो दधिमधुघृ

अ=

नमिश्रंहुतशेषंपायसंश्रामात्याः पुत्रादयः आयालिंद्र इत्यनुवाकेन पूर्यंपात स्वस्तिभिः सदानइत्येतेनअवेक्षंते ततोब्रा
ह्मणभोजनंकृतेतत्कर्मांगनयाब्राह्मणमेकंभोजयिष्ये अथसीतायज्ञः अथेदानींसीतायज्ञकर्म व्याख्यास्यतइतिशेषः तत्रकृ
षिप्रवृत्तश्रोपासनिकोधिक्रियते ब्रीहियवानांयत्रयत्रयजेततन्मयंस्थालीपाकंश्रपयेत् तत्रसीतायज्ञेब्रीहयश्चयवाश्चब्री
हियवास्तन्मयेयत्रयत्रयस्मिन्यस्मिन्ब्रीहिकालेयवकालेवायजेतसीतायज्ञेनतन्मयंब्रीहिमयंब्रीहिकालेयवमयंयवकाले
स्थालीपाकंचरुंश्रपयेत् कामादीजानोन्यत्रापिब्रीहियवयोरेवान्यतरंस्थालीपाकंश्रपयेत् कामातइच्छातः अन्यत्रापियस्मा
दिमभ्रतिपुइजानोयागंकुर्वन् ब्रीहियवयोरेवअन्यतरंएकतरंस्थालीपाकंश्रपयेत् नपूर्वचोदितत्वात्संदेहः अत्रब्रीहियवयो
रन्यतरस्ययागमात्रसाधनद्रव्यत्वेनसंदेहः कुतः पूर्वचोदितत्वात् पूर्वोपदिष्टत्वात् कुत्रेतिचेत् ब्रीहीन्यवान्वाहविषिइत्यत्रक
ल्पे अतोनसंदेहः कुतः पूर्वचोदितत्वात् पूर्वोपदिष्टत्वात् कुत्रेतिचेत् ब्रीहीन्यवान्वाहविषिइत्यत्रकल्पे अतोनसंदेहः असं
भवाद्विनिवृत्तिः ननुयावकस्यचरोर्विनिवृत्तिर्दृश्यते कथमन्यतरंस्थालीपाकंश्रपयेदितिचेत् उच्यते यावकस्यचरोर्यानिवृत्तिः सा
असंभवात्नशास्त्रात् अतोनायंअसंभवविनिवृत्तस्ययावकस्यचरोः प्रतिप्रसवः यतः सामान्यशास्त्रविहितंकचिच्छास्त्रां
तरेणप्रतिषिद्धंपुनर्विधीयमानंहिप्रतिप्रसवमुच्यते इदंत्वसंभवात्प्रतिषिद्धं कथमसंभवइतिचेत् अनवस्थावितानंतरोष्मप

केईषदसिद्धे तंडुलपाके चरुशब्दप्रयोगप्रत्ययात् अतोवा चनिकोपावस्थालीपाको यत्र तत्र गुलिकाभिः संपाद्यते यत्र पुनर्वि
कल्पः तत्रासंभवाद्विनिवृत्तिरिति क्षेत्रस्य परस्तादुत्तरतो वाश्वचौ देशे कृष्टफलानुपरोधेन क्षेत्रस्य सस्यवतः परस्तात्पूर्वस्यां दि
शि उत्तरतो वा उदीच्यां वा श्वचौ ग्रामे ध्यद्भ्रमरहिते देशे कृष्टे फालेन विलिखिते फलस्य सस्यस्य अनुपरोधः अवाधः फलानुरो
धेन सीतायज्ञः कर्तव्यः ग्रामे चोभयसंप्रयोगात् यद्वा ग्रामे कर्तव्यः कृतः उभयसंप्रयोगात् उभयं क्षेत्रं ग्रामश्च संप्रयोक्तृअ
धिकरणतया संबद्धुं शक्यते फलानुपरोधेन कृष्टत्वेन वा परस्तादुत्तरतो वाश्वचौ देशे कृष्टे इति ग्रामस्यापि विशेषणत्वेन संबध्यते
अविरोधात् ननु क्षेत्रग्रामयोः एकतरोपादानेन अन्यतरस्य बाधः प्रसज्येत ततो विरोध इति चेत् न अविरोधान्न विरोधः
अविरोधस्तस्माद्विरोधस्तस्माद्विरोधाद्विकल्पादेकतरोपादानेन दोषः व्यवस्थासंभवे हि अष्टदोषदुष्टोऽपि विकल्पः
आश्रीयते न्यायविद्भिः यत्र अपपियिष्यन्नुपलिप्त उद्धृतावीक्षितेऽग्निमुपसमाधाय तन्मिश्रे दर्भैः स्तीर्त्वाज्यभागाविष्ट्वाज्याहुती
र्जुहोति यत्र क्षेत्रे ग्रामे वा चरुं अपपिष्यन् भवति अपपितुमिच्छन् भवति तत्र उपलिप्ते गोमयोदकेन उद्धृते स्फेनोल्लिखिते अ
वीक्षिते मणिकोदकेन सिक्ते अग्निमावसथ्यं स्थापयित्वा अत्र पुनरुपलेपनाद्युपदेशः दृष्टेऽपि प्राप्त्यर्थः न पुनः परिसमूह
नोद्धरणनिवृत्त्यर्थः तन्मिश्रे दर्भैः स्तीर्त्वा तैः व्रीहिभिर्यवैर्वा मिश्रामिलितान् दर्भानास्तीर्य तन्मिश्रैर्दर्भैः अग्निं स्तीर्त्वा परिस्तीर्य

आज्यभागयागानंतरं वक्ष्यमाणमंत्रैः पृथिवी द्यौरित्यादिभिः पंचभिर्मंत्रैः क्रमेण पंचाज्याहुतीर्जुहोति स्थालीपाकस्य जुहोति
सीतायै यजायै शमायै भूत्यै इति मंत्रवत्प्रदानमेकेषां स्थालीपाकस्य इत्यवयवलक्षणा षष्ठी न स्य सीताद्याभ्यश्चतसृभ्यो देव
ताभ्यश्चतस्र आहुतीः क्रमेण तन्नामभिरेव चतुर्थ्यंतैः स्वाहाकारांतैश्च जुहोति एकेषामाचार्याणां मते मंत्रवद्देवप्रधानं
होमः न स्वाहाकारः किं कारणं आह स्वाहाकारप्रदाना इति श्रुतेः स्वाहाकारेण प्रदानं येषु ते स्वाहाकारप्रदानाः जुहोतयः इति
श्रुतेः श्रुतौ श्रौते कर्मणि स्वाहाकारप्रदानत्वं इदं तु स्मार्तं कर्म्म न तु वषट्कारेण चादेवेभ्योऽन्नं प्रदीयत इति सामान्यवचनात् गा
र्ह्येपि प्रवर्ततामिति चेत् न चात्र वषट्कारस्य प्रवृत्तिः किमिति याज्यापुरोनुवाक्यवत्त्वे वषट्कारस्य प्रवृत्तिरिति याज्यापुरोनुवा
क्यात्वे वषट्कारस्य श्रवणात् तेन सह पाठाच्च स्वाहाकारोप्यत्र निवर्तते न विनिवृत्तिः मंत्रवत्प्रदानमित्येतस्य पक्षस्य विनि
वृत्तिः निरासः अप्रवृत्तिः कुतः स्मार्तेपि कर्मणि स्मृतिकारैः स्वाहाकारस्य विधानात् यथाह च्छंदोगपरिशिष्टे कात्यायनः
स्वाहाकारवषट्कारनमस्कारा दिवौकसां हंतकारो मनुष्याणां स्वधाकारः स्वधाभुजामिति अथ सीतायज्ञे चरुपेन नमंत्रेण
तिदिग्भ्यो लांगलयोजनदेवताभ्यः तद्भूतोपात स्थालीपाकेनास्मिन्नवसरे जुहुयात् कुतः तत्स्थालीपाकहोमाधिकारात्
ततः स्विष्टकृदादि स्तरणशेषकूर्चेषु सीतागोप्तृभ्यो बलिं हरति पुरस्ताद्ये त आसत इत्यादि तत्र पुरस्ताद्धंव इत्यादिभिश्चतुर्भिर्मं.

त्रैस्तरणशेषभावउपसर्जनत्वंगताः प्राप्ताः तएवकुशास्तेषुस्तरणकुशेषुवलिंहरंतिकेभ्यः सीतागोप्तृभ्यः सीतालांगलपद्धतीः
गोपायंतिपालयंतियेतेसीतागोप्तारस्तेभ्यः स्तरणशेषकूर्चाग्राच्यादिषु चतसृषुदिक्षुयथालिंगं प्रकृतादन्यस्मादाज्यशेषेण
चपूर्ववद्बलिकर्म प्रकृतात्प्रधानदेवतासंबंधिनोव्रीह्याद्यावाद्यस्थालीपाकात् अन्योयः सिद्धोपात्तश्चरुस्तस्मात्स्थालेनान्न
शेषेणच पूर्ववत्लांगलयोजनवत् बलिकर्म इंद्रपर्जन्यादिभ्योबलिहरणंकर्तव्यं स्त्रियश्चोपयजेरन्नाचरितत्वात्स्त्रिय
श्चभार्यादिकाः उपयजेरन् बलिकर्मणानाभ्यएवदेवताभ्यः पूजांकुर्युः कुतएवमत् आचरितत्वात् प्राचीनाभिस्त्रीभिः
बलिकर्मणः कृतत्वात् संस्थितेकर्मणिब्राह्मणान्भोजयेत् संस्थितेसमाप्तेसीतायज्ञाख्येकर्मणिब्राह्मणान्विप्रान्त्रिप्र
भृतीन्भोजयेत् आशिषोवृद्धस्यभोज्यादिभिः द्विरुक्तिरत्रकांडसमाप्तिनिबंधना इतिसूत्रार्थः अथप्रयोगः अथसीतायज्ञः
कृषिंकुर्वतः साग्नेः व्रीहिनिष्पत्तिकालेयवनिष्पत्तिकालेचभवति तत्रप्रथमप्रयोगेमातृपूजाभ्युदयिके भवतः अनंत
रंक्षेत्रस्यपूर्वतउत्तरतोवाकृष्टेशुचौदेशेयत्रसस्यानिननश्यंतितत्रेदंकर्मकुर्यात् यद्वाग्रामेपूर्वतउत्तरतोवाशुचिदे
शस्यकर्षणंविधायतत्रकर्तव्यं एवंदेशद्वयान्यतरेदेशेपंचभूसंस्कारान्कृत्वाऔपासनाग्निमुपसमाधायब्रह्मोप
वेशनादिकुर्यात् तत्रविशेषः व्रीहिकालेव्रीहिसस्यमिश्रैर्दर्भैरग्निंपरिस्तृणाति यवकालेयवसस्यमिश्रैः तथाव्री

138

हि काले व्रीहिमयं एकमेव चरुं यवकाले यवमयं श्रपयति अपरं स्थालीपाके सिद्धमेवासादयति तंदुलानंतरं उपकल्पयति
बलिपटलकं बलिपटलक मिति शूर्पादिकं वैणवं पात्रं कल्माषौदनमुक्तमुच्यते तंदुलानंतरं सिद्धचरुं प्रोक्षति आज्यभा
गानंतरं पंचाज्याहुतीर्जुहोति यथा पृथिवी द्यौः प्रदिशो दिशो यस्मै द्युभिरावृतानमिहेंद्रमुपह्वये शिवा नः संतु हेतयः स्वाहा
इदमिंद्राय यन्मे किंचिदुपेप्सितमस्मिन्कर्मणि वृत्रहन् तन्मे सर्वं समृध्यतां जीवतः शरदः शतं स्वाहा इदमिंद्राय संप
त्तिर्भूतिर्भूमिर्वृष्टिर्ज्यैष्ठ्यं श्रीप्रजामिहावतु स्वाहा इदमिंद्राय यस्या भावे वैदिकलौकिकानां भूतिर्भवति कर्मणां इंद्रपत्नीमु
पह्वये सीतां सा मे त्वनपायिनी भूयात्कर्मणि कर्मणि स्वाहा इदमिंद्रपत्न्यै अश्वावती गोमती सूनृतावती भर्तिया प्राण
भृतो अतंद्रिता खलमालिनी मुर्वरामस्मिन्कर्मण्युपह्वये ध्रुवां सा मे त्वनपायिनी भूयात्स्वाहा इदं सीतायै अथ प्रकृत
स्य स्थालीपाकस्य चतस्र आहुतीर्जुहोति यथा सीतायै स्वाहा इदं सीतायै यजायै स्वाहा इदं यजायै शमायै स्वाहा इ
दं शमायै भूत्यै स्वाहा इदं भूत्यै अथ सिद्धेन स्थालीपाकेन लांगलयोजनदेवताभ्यो अष्टाहुतीर्जुहोति न द्यथा इंद्राय स्वा
हा इदमिंद्राय पर्जन्याय स्वाहा इदं पर्जन्याय अश्विभ्यां स्वाहा इदमश्विभ्यां मरुद्भ्यः स्वाहा इदं मरुद्भ्यः उदलाका
श्यपाय स्वाहा इदमुदलाकाश्यपाय स्वाहेतिकायै स्वाहा इदं स्वातिकायै सीतायै स्वाहा इदं सीतायै अनुमत्यै स्वा

स्वाति

हा इदमनुमत्यै यथादैवतं त्यागः प्रकृतान्सिद्धान्नचरोः स्विष्टकृतः ततो महाव्याहृत्यादि ब्राह्मणे दक्षिणादानांतंकृ
त्वाग्नेरस्य पुरस्तादारभ्य प्रादक्षिण्येन प्रतिदिशं स्तरणशेषकुशतृणान्यास्तीर्य तेषु स्रुवेण चरुणा यथास्तरणं वक्ष्यमा
णमंत्रैर्वलीन्हरति यथा पुरस्ताद्य एतस्मासनेसुधन्वानिषंगिणः तेत्वा पुरस्ताद्गोपायंत्वप्रमत्ता अनपायिनो नमः एषां
करोम्यहं वलिमेभ्यो हरामीमं इति पुरस्ताद्वलिहरणमंत्रः इदं सुधन्वभ्यो निषंगिभ्यः अथ दक्षिणतो निमिषा वर्मिण आसने
तेत्वा दक्षिणतो गोपायंत्वप्रमत्ता अनपायिनो नमएषां करोम्यहं वलिमेभ्यो हरामीमं इति दक्षिणतो वलिहरणमंत्रः इदम
निमिषेभ्यो वर्मिभ्यः अथ पश्चाद्भुवः प्रभुर्वो भूतिर्भूमिः पार्ष्णिः शुनंकुरिः तेत्वा पश्चाद्गोपायंत्वप्रमत्ता अनपायिनो न
मएषां करोम्यहं वलिमेभ्यो हरामीमं इति पश्चिमतो वलिहरणमंत्रः इदमाभूभ्य आभूत्यै भूम्यै पार्ष्ण्यै शुनंकुर्यै अथोत्तर
तोभीमा वायुः समाजवो तेत्वोत्तरतः क्षेत्रस्यालेगृहे ध्वनिर्गोपायंत्वप्रमत्ता अनपायिनो नमएषां करोम्यहं वलिमेभ्यो
हरामीमं इत्युत्तरतो वलिहरणमंत्रः इदं भीमेभ्यो वायुसमाजवेभ्यः अथ सिद्धचरुशेषं स्थालीनाज्यशेषेण सन्नीय
तेनैंद्रादिभ्योऽनुमत्यंतेभ्यो लांगलयोजनदेवताभ्यो वलिंहरति ततो वलिंपटलके नस्त्रियश्वद्रादिभ्यो हलयोजनदेवता
भ्यः अन्येभ्यश्च गृहव्यवहारसिद्धेभ्यः क्षेत्रपालादिभ्यः वलिदानं कुर्युः ततो ब्राह्मणान्भोजयेत् इत्यग्निहोत्री हरिहर

विरचितायां पारस्करगृह्यसूत्रव्याख्यानपूर्विकायां प्रयोगपद्धतौ द्वितीयः कांडः॥ ॥ ❖ ॥ ❖ ॥ ❖ ॥ ०

श्रीगणेशाय नमः॥ अनाहिताग्नेर्नवप्राशनं अनाहिताग्निरेव सस्थिकः तस्य नवान्नप्राशननिमित्तं नवप्राशनाख्यं कर्म आ॰
ख्यास्येत इति सूत्रार्थः नवप्राशनमिति संज्ञा त्वन्वर्थः ततश्चैतत्कृत्वा नवं प्राश्यते तेन कृत्वा अत्र किं नवमात्रं निषिध्यते उतकीति
पयानि इत्यपेक्षिते गृह्यसंग्रहकारः नवयज्ञाधिकारस्थाः श्यामाकाव्रीहयो यवाः नाश्नीयात्तानहुत्वैव मन्येष्वनियमः स्मृतः एष्
वः सर्वेंशुगाश्च नीवाराश्चणकास्तिलाः अकृत्वाग्रयणे श्नीयात्तेषां नोक्ता हविर्गुणाः इति नवास्याग्रयणशब्दवाच्यता तेन पौर्णे
मासस्यामावास्या नियमो नास्ति व्रीहियवपाकोचितत्वात् शरद्वसंतावाद्रियेते तेन वर्षं स्थालीपाकं श्रपयित्वाज्यभागाविष्ट्वा
ज्याहुतीर्जुहोति शतायुधायेत्यादि नवं शरदि नवं व्रीहिमयं वसंते नूतनयवमयं स्थालीपाकं चरुं त्यक्त्वाज्यभागयोरंते शतायुधाये
चत्वार इत्येताभ्यां प्रतिमंत्रं द्वे आज्याहुतीर्जुहोति स्थालीपाकस्याग्रयणदेवताभ्यो हुत्वा जुहोति स्विष्टकृते च स्विष्टमग्न इति अथ स्था
लीपाकस्य आग्रयणदेवताभ्य इंद्राग्नी विश्वेदेवा द्यावापृथिवी इत्येताभ्यः प्रत्येकमेकैकामाहुतिं हुत्वा स्विष्टमग्न इत्यनेन मंत्रेण स्वि
ष्टकृद्धोमात्पूर्वं चकारात्पश्चाच्चाज्याहुतिं जुहोति मध्ये स्थालीपाके नैसो विष्टकृते अथ प्राश्नात्यग्निः प्रथम इति ततो महाव्या
हृत्यादि प्राजापत्यांते अग्निः प्रथम इति मंत्रेण सकृत्सर्वं प्राश्नाति अत्र हुतशेषप्राशने गुणविधिरेवं मंत्रेण अन्नपतीयया वा अन्न

गृ·सू·
ह·भा·
९१

पतिर्ह्यग्निर्देवतायस्याः साअन्नपतीयाऋक्तयाअन्नपतीययाऋचाअन्नपतेन्नस्येत्यादिकयाविकल्पेनप्राश्नाति यद्वाअन्न
पतिशब्दोयस्यामृचिअस्तिसान्नपतीया अथयवानामेतमुक्तमिति अथव्रीहिप्राशनमंत्राभिधानानंतरंयवानांप्राशनेमंत्रमाह
एतमुक्तमित्यादिसुदानवइत्यंतंमंत्रंयवप्राशने पैठीनसिः अग्निमेवोपासीतनान्यदेवतंअग्निर्भूम्यामितिविज्ञायतेनप्रवसेन
यदिप्रवसेदुक्तमुपस्थानंयजमानस्यप्राशितमग्नौजुहुयात् नवेष्टामेवोपासनिकस्य ततोब्राह्मणभोजनं इतिसूत्रार्थः
अथप्रयोगः तत्रशरदिवसंतेचअनाहिताग्नेः नवप्राशनंकर्मभवति प्रथमप्रयोगेमातृकापूजाभ्युदयिकेविदध्यात् आव
सथ्याग्नौब्रह्मोपवेशनादिप्राशनांतेविशेषः नवंस्थालीपाकंश्रपयित्वाज्यभागानंतरंआज्याहुतिद्वयंजुहोति यथा शतायु
धायशतवीर्यायशतोतयेअभिमातिषाहे शतंयोनःशरदोजीजानिंद्रोनेषदतिदुरितानिविश्वास्वाहा इदमिंद्राययेचत्वारःप
थयोदेवयानाअंतराद्यावापृथिवीवियंति तेषांयोज्यानिमजीजिमावहात्तस्मैनोदेवापरिधत्तेहसर्वेस्वाहा इदंँसर्वेभ्यो
देवेभ्यः इन्द्राग्नीविश्वेदेवाद्यावापृथिवीस्थालीपाकेनाग्रयणदेवताः इन्द्राग्निभ्यांँस्वाहा इदमिन्द्राग्निभ्यांउपांशुवि
श्वेभ्योदेवेभ्यःस्वाहा इदंविश्वेभ्योदेवेभ्यः उपांशुद्यावापृथिवीभ्यांँस्वाहा इदंद्यावापृथिवीभ्यां इतितिस्रआहुतीर्हु
त्वास्विष्टमग्नेअभितत्पृणीहिविश्वाश्चदेवःपृतनाअभिष्यक् सुगन्नुपंथांप्रदिशन्नएहिज्योतिष्मध्येह्यजरंनआयुःस्वा

रामः
९१

142

गृ·सू·
भा·ह·
९३

शयीरंश्चतुरोमासान्यथेष्टंवा अनूर्ध्वंचतुरोमासान् पौषमाघफाल्गुनचैत्रान् अधःखट्वायुदसभूमौशयीरन्गृहप
तिप्रमुखाः यथेष्टंवा अथवाद्दृष्टमनतिक्रम्ययथेष्टंयथाकामं अधोवाखट्वायांवाशयीरन्नितिविकल्पार्थः इतिसूत्रार्थः
अथप्रयोगः मार्गशीर्ष्यांपौर्णमास्यामाग्रहायणीकर्मभवति तत्रप्रथमारंभेमातृपूजाभ्युदयिकंविधायआवसथ्याग्नौ
ब्रह्मोपवेशनादिप्राशनांतेविशेषः शूर्पंसक्तून् उल्कांउदपात्रंदर्वींकंकतत्रयमंजनमनुलेपनंस्रजश्चेत्युपकल्प्यआज्य
भागानंतरंअनपराजहीत्याहुतिंत्वयंश्रवणाकर्मवद्धुत्वाअपरांश्चतस्रआज्याहुतीर्जुहोति वक्ष्यमाणैश्चतुर्भिर्मंत्रैः प्रतिमं
त्रंयथायांजनाः प्रतिनंदंतिरात्रींधेनुमिवायतीं संवत्सरस्ययापत्नीसानोअस्तुसुमंगलीस्वाहा १ इदꣳरात्र्यै संवत्सरस्य
प्रतिमायाताꣳरात्रीमुपास्महे प्रजाꣳसुवीर्यांकृत्वादीर्घमायुर्व्यश्नवैस्वाहा २ इदꣳरात्र्यैसंवत्सरायपरिवत्सरायेदाव
त्सरायेद्वत्सरायवत्सरायकृणुतेबृहन्नमः तेषांचयंसुमतौयज्ञियानांज्योग्जीताअहतास्यामस्वाहा इदꣳसंवत्स
रायपरिवत्सरायेदावत्सरायेद्वत्सरायवत्सरायच ग्रीष्मोहेमंतउतनोवसंतः शिवावर्षाअभयाशरन्नः तेषांव
यꣳसुमतौयज्ञियानांनिवातएषामभयेवसेमस्वाहा इदंग्रीष्मायहेमंतायवसंतायवर्षाभ्यःशरदेवततःस्थाली
पाकेनचतस्रआहुतीर्जुहोति तद्यथासोमायस्वाहा इदंसोमाय मृगशिरसेस्वाहा इदंमृगशिरसे मार्गशीर्ष्यांपौर्ण

रामः
९३

143

यं श्रेष्ठोदधातु नाविंत्येतं मंत्रं जपति पश्चादग्नेः प्रात्वमंजलिं करोति दैवीन्नावमिति निसृभिः अग्नेः पश्चिमतः स्थित्वा प्रागग्र
मंजलिं करसंपुटं विदधाति दैवीं नावमित्यारभ्य मध्वारजा ४ सिसुकृतं इत्यंताभिस्तिसृभिर्ऋग्भिः स्वस्तरमारोहंतिब्र
ह्माणमामंत्रयते ब्रह्मन् प्रत्यवरोहामेति स्वस्तरं यथोक्तं आरोहंति इदानीं स्वामिप्रभृतयः पूर्वं यत्प्रत्यवरोहंतीति तद्विधानार्थं
तत्र स्वामि ब्राह्मणं आमंत्रयते पृच्छति कथं ब्रह्मन्प्रत्यवरोहामेति वाक्येन ब्रह्मानुज्ञाताः प्रत्यवरोहं त्वायुः कीर्तिर्यशो बलम
न्नाद्यं प्रजामिति प्रत्यवरोहध्वमिति वाक्येन ब्रह्मणानुज्ञाताः प्रसूताः प्रत्यवरोहंति स्वस्तरमभितिष्ठंति आयुः कीर्तिमित्य
नेन मंत्रेण अत्र स्त्रीणामपि मंत्रपाठः उपेता जपंति सुहेमंतः सुवसंत इत्यादिकं तत्र ये उपेताः उपनीतास्ते जपंति सुहेमं
त इत्यादिकं मंत्रं स्योना पृथिवि नो भवेति दक्षिणपार्श्वैः प्राक्शिरसः संविशंति स्वस्तरमारुह्य स्योना पृथिवीत्यनेन मं
त्रेण स्वामि जाया पत्यानि प्राक्पूर्वं शिरो येषां ते प्राक्शिरसः दक्षिणपार्श्वैः उदङ्मुखाः संविशंति स्वपंति शेरते स्वस्तरोपरि
इत्यर्थः उपोदुत्तिष्ठंत्युदायुषा स्वायुषोत्पर्जन्यस्य पृथिव्याः सप्तधामभिरिति उपस्वस्तरसमीपे उदत्तिष्ठंति उत्थायतिष्ठं
ति उपपदमनर्थकं उदायुषा स्वायुषेत्यनेन मंत्रेण स्वस्तरात् एवं द्विरपरं ब्रह्मानुज्ञाताः एवमुक्तेन प्रकारेण ब्रह्मन् प्रत्य
वरोहामेत्यारभ्य उत्थानपर्यंतं ब्रह्मानुज्ञाताः संतो द्विवारं अपरं अन्यत् स्वस्तरमारोहंति संविशंति उत्तिष्ठंति च अधः

णप्रभृतिशालायावहिर्निष्क्रमणादिआमार्जनात् द्वारदेशेमार्जनंयावत् अप्रदक्षिणाकर्मवत्कुर्यात् मार्जनांतउत्सृष्टोवलिरित्या
हमार्जनस्यांतेअवसानेउत्सृष्टोवलिरितिवचनंब्रूयात् एतावदाग्रहायणीकर्मअथान्यत्कर्माभिधीयते पश्चादग्नेस्त्रस्तर
मास्तीर्याहतंचवासआप्लुताहतवाससःप्रत्यवरोहंतिपश्चादग्नेःआवसथ्यस्यपश्चिमदेशेस्त्रस्तरंप्रागग्रैःकुशैःस्त्रस्तरंआ
स्तीर्य विस्तार्यतच्चास्तरमग्निशालातोग्रहांतरेप्रयुज्यतेअग्निशालायाहौपसध्यरात्रिमंतरेणशयनप्रतिषेधात् अहतंचवसनं
सकृत्प्रक्षालितंवस्त्रंतदुपरिआस्तीर्यैतिसंबंधःआप्लुताःस्नाताःअहतेनवसदशेसकृत्प्रक्षालितेप्रत्येकंवाससीयेषांते
अहतवाससःस्वामिप्रभृतयःप्रत्यवरोहंतिस्त्रस्तरंनिविशंते दक्षिणतःस्वामीजायोत्तरयथाकनिष्ठमुत्तरतःकथं
प्रत्यवरोहंतिसर्वेषांदक्षिणतःस्वामीगृहपतिर्भवति तस्योत्तराजायापत्नी तस्याउत्तरतःअपत्यानि इतिशेषःकथंयथा
कनिष्ठंयोयस्मात्कनिष्ठःसनस्मादुत्तरतःतस्मादपियःसउत्तरतइति दक्षिणतोब्रह्माणमुपवेश्योत्तरतउदपात्रंशमी
शाखांसीतालोष्ठमश्मनोनिधायाग्निमीक्षमाणोजपत्यग्निर्वीरतमइति तत्रस्वामीस्त्रस्तरंप्रत्यवरोहन् दक्षिणतोग्नेःब्रह्मा
णंयथाविधिउपवेश्यउत्तरतउदपात्रंजलपूर्णभाजनं शमीवृक्षस्यशाखां सीतालोष्ठंहलपद्धतिभवंमृच्छकलं अश्मा
नंप्रस्तरंनिधायस्थापयित्वाअग्निमीक्षमाणःआवसथ्यंपश्यन् अयमग्निर्वीरतमोयंभगवत्तमःसहस्रसातमःसुवीर्यो

हेत्यनेन मंत्रेण आज्याहुतिं जुहोति इदमग्नये ततः स्थालीपाकात् अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते हुत्वा पुनः भ
स्विष्टमग्न इत्यादिनाज्याहुतिं जुहोति इदमग्नइतित्यागः ततो महाव्याहृत्यादि प्राजापत्यहोमांतं कृत्वा अग्निः प्रथमः प्राश्नातु स
हि वेद यथा हविः शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः भद्रान्नः श्रेयः समनैष्ट देवाः त्वया वशेन समशीमहि त्वा स नो मयोभूः
पिता आविशस्व शं तोकाय तन्वे स्योन इत्यनेन मंत्रेण सक्तुवं प्राश्नाति अन्नपतेन्नस्य नो देहीत्यनेन यज्ञीवा प्राश्नाति यवान्नप्राशने तु ए
तमुत्यमधुना संयुतं यवं सरस्वत्या अधि वनाय चकृषुः इंद्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानव इत्यनेन
यवसंस्तवं प्राश्नाति ततो ब्राह्मणभोजनं मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकर्म मार्गशीर्ष्या आग्रहायण्यां पौर्णमास्यां आग्र
हायणी संज्ञकर्म भवति स्थालीपाकं श्रपयित्वा श्रवणावदाज्याहुती हुत्वाऽपरा जुहोति यां जनाइत्यादि तत्र चरुं श्रपयित्वा श्र
वणाकर्मणि यथा द्वे आहुती जुहोति तथात्र अपश्वेतपदा जहीति द्वाभ्यां मंत्राभ्यां हुत्वा ततोनंतरमपराः यां जनाइत्यादिभिश्चतु
र्भिर्मंत्रैश्चतस्र आज्याहुतीर्जुहोति स्थालीपाकस्य जुहोति सोमाय मृगशिरसे मार्गशीर्षे पौर्णमास्यै हेमंताय चेति ततः स्थाली
पाकेन सोमायेत्यादिभिश्चतुर्भिर्मंत्रैः स्वाहांतैश्चतस्र आज्याहुतीर्जुहोतीति चकारः समुच्चयार्थः प्राशनांते सक्तुशेषं शू
र्पेणुप्यापनिष्क्रमणप्रभृत्यामार्जनात् ततः स्विष्टकृतप्रभृति प्राशनांते बलिहरणार्थं सक्तुशेषं शूर्पे कृत्वा उपनिष्क्रम

मासे स्वाहा इदं मार्गशीर्ष्यै पौर्णमास्यै हेमंताय स्वाहा इदं हेमंताय ततः स्थालीपाकेन सौविष्टकृतं कृत्वा महाव्याहृत्यादि दक्षिणा
दानांते सक्तुशेषं शूर्पेनुपोपनिःक्रमणप्रभृति आमार्जनांतं श्रवणाकर्मवत्कृत्वा मार्जनांते उत्तरस्यां वलिरित्युच्चैर्ब्रूयात् ततस्तां रात्रिं
वत्सान् स्वमातृभिस्सह संसर्जेत् इत्याग्रहायणीकर्म अथ स्त्रस्तरारोहणं तत्र प्रथमप्रयोगे मातृपूजाभ्युदयिके विधाय स्त्रस्तरा
स्तरणप्रदेशगृहे सर्वमावसथ्याग्निं नीत्वा पंचभूसंस्कारपूर्वकं स्थापयित्वा अग्नेः पश्चिमायां दिशि कुशैः स्त्रस्तरास्तरणं कुर्यात्
स्त्रस्तरस्यस्तरणं अग्निशालायां गृहांतरे युज्यते अग्निशालायामौपवसथ्यरात्रिमंतरेणाशयननिषेधात् तस्योपरि नूतनं स
कृत्प्रक्षालितं उदक्दशं वासः संस्तरेत् अग्निं दक्षिणेन ब्रह्माणमुपवेश्य उत्तरतमुदपात्रं शमीशाखां सीतालोष्टं अश्मानं च वि
धाय स्त्रस्तरपश्चिमतः स्वामी स्थित्वा तमुत्तरेण पत्नी तामुत्तरेणापत्यानि यथाकनिष्ठं तत्र गृहपतिरग्निमीक्षमाणो जपति अ
यमग्निर्वीरतमो यं भगवत्तमः सहस्रसात्तमः सुवीर्यो यं श्रेष्ठे दधातु नो इत्येतं मंत्रं ततः पश्चादग्नेः प्रांचमंजलिं करोति दै
वीन्नावं स्वरित्रामनागसं इत्यादिभिर्मध्यारज्जाभिः सुकृत इत्यंताभिस्तिसृभिर्ऋग्भिः ततो ब्रह्मन्प्रत्यवरोहामेति ब्रह्मा
णमामंत्र्य प्रत्यवरोहध्वमिति ब्राह्मणः प्रत्यनुज्ञाताः सर्वे स्नाताः अहतवाससः आयुः कीर्तिर्यशो वलमन्नाद्यं प्रजामित्य
नेन मंत्रेण स्त्रस्तरमारोहंत्यधितिष्ठंति स्त्रियोपि मंत्रेण तमारुह्यांतेषु येउपनीतास्ते सुहेमंतः सुवसंतः सुग्रीष्मः प्रतिधीयतां नः

गृ·सू·
भा·हृ·
९४

शिवानोवर्षाःसंतुशरदःसंतुनःशिवाइत्यृमुंमंत्रंजपंति अथस्योनापृथिवीत्यनयर्चास्वामिप्रभृतयःस्त्रियउपनीताअनुप
नीताश्चसर्वेयथोक्तक्रमेणदक्षिणपार्श्वैःप्राक्शिरसःसंविशंतिस्वपंति ततउदायुषास्वायुषोत्यजेन्यस्यहस्तास्पृथिव्या
सप्तधामभिरित्यनेनमंत्रेणोत्तिष्ठंतिसद्यैततःस्वस्तरादुत्तीर्यब्रह्मानुमंत्रणप्रत्यवरोहणोपेतजपसंवेशनोत्थानानिवारद्वय
मेवंकुर्युःततआरभ्यचतुरोमासानसर्वेअधःशयीरन्कामतोवाशय्यायांपुनरावसथ्यंपंचभूसंस्कारपूर्वकंस्वस्थानेस्थाप
येत्इतिस्वस्तरारोहणंमुख्यकालेयदावश्यकर्मकर्तुंनशक्यते गौणकालेपिकर्तव्यंगौणाप्यत्रेदृशोभवेत्आसायमाहुते
कालात्कालोस्तिप्रातराहुतेःप्रातराहुतिकालात्प्राक्कालःस्यात्सायमाहुतेःपौर्णमासस्यकालोस्ति प्रागदर्शस्यकालतःपौर्णमा
स्यस्यकालात्प्रागदर्शकालेपिविद्यते वैश्वदेवस्यकालोस्तिप्राक् प्रघासविधानतःप्रघासानांचकालःस्यात्साकमेधीयका
लतःस्यात्साकमेधकालेपिआशुनासीरीयकालतःशुनासीरीयकालेपिआवैश्वदेवकालतःश्यामाकैर्व्रीहिभिश्चैवयवै
रन्योन्यकालतःप्राक्सस्युज्यतेवर्षणनत्वत्राग्रयणात्परःदक्षिणायनकालेवापश्चिज्यावोत्तरायणे अन्योन्यकालतःपूर्वं
यस्यप्रोक्तेउभेअपिएवमागामीयागीयमुख्यकालादधस्तनःस्वकालादुत्तरोगौणःकालःपूर्वस्यकर्मणःयद्वागामिक्रि
यामुख्यकालस्याप्यंतरालवत् गौणकालत्वमिच्छंतिकेचित्प्राक्तनकर्मणिगौणोघेनेषुकालेषुकर्मचोदितमाचरेत्प्रायश्चित्तं।

एम:
९४

148

रेणसुतोत्पत्तिर्वानप्रस्थाश्रमग्रहः दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च समुद्रपानं स्वीकारः कमंडलुविधारणं महाप्र
स्थानगमनं गोपशुश्च सुराग्रहः अग्निहोत्रहवण्याश्च लेहो लीढापरिग्रहः असवर्णासु कन्यासु विवाहश्च द्विजातिषु वृत्त
स्वाध्यायसापेक्षमघसंकोचनं तथा अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेव च प्रायश्चित्तविधानं च विप्राणां मरणांतिकं सं
सर्गदोषः पापेषु मधुपर्के पशोर्वधः दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः शामित्रे चैव विप्राणां सोमविक्रयणं तथा दीर्घका
लं ब्रह्मचर्यं नरमेधाश्वमेधकौ कलौ युगे त्विमान्धर्मान्वर्ज्यानाहुर्मनीषिणः इति स्मरणात् गोपशोः अस्वर्ग्यत्वाल्लोकविद्वि
ष्टत्वात् कलौ विशेषतो वर्जनीयत्वाच्च न गवालंभः कर्तव्यः किं तु अनिषिद्धश्चान्तरेण अवश्यकर्तव्याष्टकादिकर्मनिवर्त्त
नीयं तस्य वपां जुहोति वह वपां जातवेदः पितृभ्य इति तस्य इति षष्ठीस्थाने चतुर्थी तस्याः गोवपां वह वपामित्यादिनाम
त्रेण जुहोति पुनर्विश्वेदेवेभ्यः स्वाहेत्यवदानानि जुहोति शेषं पशुकल्पं पशुश्चेदित्यादिना उपरिष्टाद्वक्ष्यति रूपं कालान्
निर्वापः श्रपणं देवतातथा आदौ येविहिताः पक्षास्त इमे सर्वदाः स्मृता इत्येतस्य संहितासु अदर्शनात् समूलत्वेन
निर्वापादिसमभिव्याहारेण श्रौतमात्रविषयत्वात् वस्तुतस्तु नान्यस्य तंत्रे प्रततेऽन्यस्य तंत्रे प्रतीयतां इति प्रापिकं सांत
पनीयाधिकरणेन्यतंत्रमध्येऽग्निहोत्रदर्शनात् श्वोन्वष्टकासु सर्वासां पार्श्वे सक्थि सव्याभ्यां परिवृत्ते पिंडपितृयज्ञवत्

म्रो

त्वात् अष्टम्योप्यनेका इति किं मासस्संवंधिन्यां अष्टम्यां अष्टकानामधेयं कर्मेति संदेहापत्तौ पक्षाष्टम्यामित्याह पक्षेअपर
पक्षेपौर्णमास्यामूर्द्ध्वमितिवचनसामर्थ्यात् कृष्णाष्टमीपक्षाष्टमी न पुनः सौरसावननाक्षत्रमाससंवंधिनी तेषां शुक्लकृष्णप
क्षत्वाभावात् तस्यां पक्षाष्टम्यां कथं स्थालीपाकं चरुं श्रपयित्वा उक्तविधिना संस्थाप्य आज्यभागौ आहुतिविशेषो हुत्वा दशआ
हुतीः त्रिंशत्स्वसार इत्यादिभिर्मंत्रैः प्रतिमंत्रं जुहोति स्थालीपाकस्य जुहोति शांता पृथिवीत्यादि स्थालीपाकस्य चरोः जुहोति
शांताः पृथिवीत्यादिभिश्चतुर्भिर्मंत्रैश्चतस्र आहुतीर्जुहोति प्रतिमंत्रं अत्र ऐंद्री प्रथमाष्टकेति प्राधान्यमिन्द्रस्योक्तं अपूपे
त्यनेन हविषः यागावसरश्च नोक्तः सूत्रकृता अतः संदेहः कुत्र क्रियतामिति किं तावत्प्राप्तं साधनत्वात्प्रधानत्वादाज्यभा
गानंतरं क्रियतामिति न तत्र आज्यभागाविष्ट्वाज्याहुतीर्जुहोतीति सूत्रकारेण आज्याहुति विधानात् नहि तदंते स्तुन त
थापि स्थालीपाकस्य जुहोतीति आज्यहोमानंतरं स्थालीपाकहोमाविधानात् तस्मात्तदनंतरं प्रयुज्यते ततअपूपेन इन्द्राय
स्वाहेत्येकामाहुतिं जुहुयात् एवमुत्तरत्रापि एवं प्रथमाष्टकेति कर्तव्यतामनुविधाय अधुना इयमेवोत्तरे स्वप्यष्टकासु इति कर्त
व्यता इत्यभिप्रेत्य तासां विशेषमात्रमनुविधत्ते मध्यमागवेत्यादिभिः सूत्रैः मध्यमा तिणाद्वितीयेत्यर्थः सा च गवा गोपशुना
कर्तव्या इति सूत्रशेषः अत्राचार्येण यद्यपि गोपशुरुक्तस्तथापि अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नत्विति स्मरणात् तथादेव

द्वितीया वैश्वदेवी विश्वेदेवा देवता अस्या इति वैश्वदेवी विश्वेदेवदैवत्येत्यर्थः तृतीया प्राजापत्या प्रजापतिर्देवता अस्या इति
प्राजापत्या प्रजापतिदैवत्येति यावत् चतुर्थी पित्र्या पितरो देवता अस्या इति पित्र्या पितृदैवतेत्यर्थः अपूपं च मांसं च शाकं च अपू
पमांसशाकाः तैः अपूपमांसशाकैः यथासंख्यं यायस्याः यथासंख्यात् तां तामनतिक्रम्य यथासंख्यं यजेतेत्यध्याहारः एतदुक्तं भवति
प्रथमायां अपूपेनइंद्रं यजेत् द्वितीयायां मध्यमा गवेति वक्ष्यमाणत्वात् गोमांसेन विश्वान्देवान् तृतीयायां शाकेन प्रजापतिमिति अ
त्र निरूढपक्रमपि त्रेत्यनेन चतुर्थ्या अभिधानं अयुक्तमिति चेत् न उपक्रांतानां निरूपणादेवताभिधानावसरे चतुर्थ्या अपि देवता
या आचार्यस्य बुद्धिस्थत्वात् तदभिधानस्य दोषः अत्राष्टकाशब्दः कर्मवचनोपि कालोपलक्षकः यथा वा त्रैयम्बौ पौर्णमासीवृध
न्वंती अमावास्यां यत्र कर्माभिधायकौ पौर्णमास्यमावास्यशब्दौ कालस्याप्युपलक्षकौ अन्यथा आग्रहयण्या ऊर्द्ध्वं तिस्रोष्टका इ
त्यनेन न प्रति पद्येवाष्टकाकर्मप्राप्तिः स्यात् तस्मादष्टकाशब्देन अष्टम्युपलक्ष्यते तथा च श्रुतिः द्वादश पौर्णमास्यो द्वादशाष्ट
का द्वादशामावास्या इति आश्वलायनस्मृतिश्च हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका इति एवमष्टकाकर्म
सुद्रव्यदेवते अभिधाय उद्देशक्रमेण तदितिकर्तव्यतामाह प्रथमाष्टका पक्षाष्टम्यार्थं स्थालीपाकं श्रपयित्वाज्यभागावि
ष्ट्वाज्याहुती जुहोति प्रथमाष्टका अष्टकानामधेयं कर्म भवतीति सूत्रशेषः कदा पक्षाष्टम्यां अत्र सौरादिभेदेन मासानामनेक

त्तप्रकरणेप्रोक्तां निष्कृतिमाचरेत् प्रायश्चित्तमकृत्वा वा गौणकाले समाचरेत् नित्येष्टिमग्निहोत्रं च भारद्वाजीयभाष्यतः मु
ख्यकाले हि मुख्यं चेत्साधनं नैव लभ्यते तत्कालद्रव्ययोगस्य मुख्यत्वं गौणतापि वा मुख्यकालमुपाश्रित्य गौणमप्यस्तु सा
धनं न मुख्यद्रव्यलोभेन गौणकालप्रतीक्षणं एकपक्षगते याया वा न होमसंध्यो विपद्यते पक्षहोमविधानात्तं हुत्वा तंतुमतीं
यजेत् ऊर्ध्वमाग्रहायण्यास्तिस्रोऽष्टकाः ऊर्ध्वमुपरि आग्रहायण्याः मार्गशीर्ष्याः पूर्णिमायाः तिस्रः अष्टकाः त्रीण्यष्टकानि क
र्माणि भवन्ति तानि च सकृत् संस्कारकर्मत्वात् अतः संस्कारकर्मत्वेनेति चेत् सुमन्तुगौतमादिभिः अष्टकाः पार्वणश्राद्धं श्राव
ण्याग्रहायणी चैत्र्याश्वयुजीति पाकयज्ञसंस्था इत्यादिना अष्टकादीनां संस्कारत्वेन स्मरणात् ननु संस्कारकर्मणामपि पंचम
हायज्ञपार्वणस्थालीपाकपार्वणश्राद्धानां कृतोसकृत्करणमभ्यासश्रवणात् तथा हि अहरहः स्वाहाकुर्यादाकाष्ठादित्या
दिना पंचमहायज्ञादीनां पक्षादिष्विति बहुवचनात् स्थालीपाकस्य मासि मासि वोऽशनमिति श्राद्धस्य न तथाष्टकानामभ्या
सः श्रूयते येन ताः पुनः पुनरनुष्ठीयेरन् एवं च सन्ति चत्वारिंशत्संस्कारकर्मणां मध्ये येषां अभ्यासः श्रूयते तान्यसकृद्भवन्ति
इतराणि सकृदिति निर्णयः ऐन्द्री वैश्वदेवी प्राजापत्या पित्र्येत्यपूपमांसशाकैर्यथासंख्यं एवं अष्टकाकर्माणि कतेष्यन्वि
न विधाय तत्र द्रव्यदेवतापेक्षायां द्रव्याणि देवताश्चाभिधत्ते तत्र प्रथमा ऐन्द्री इन्द्रो देवता यस्या इति ऐन्द्री इन्द्रदेवतेत्यर्थः

ष्टः अष्टम्यां उत्तरेद्युः अन्वष्टकां अनुपश्चात् भवंतीत्यन्वष्टकाः तासु सर्वासां चतसृणामष्टकानां क्रमो भवति इति शेषः के
न चरुः श्रेणेत्याह पार्श्वसक्थिसव्याभ्यामिति पार्श्वं च सक्थि च पार्श्वसक्थिनी च ते सव्ये च पार्श्वसक्थिसव्ये ताभ्यां पार्श्वसक्थि
सव्याभ्यां अत्र तुल्याधिकरणो विशेषणीभूतस्य सव्यशब्दस्यान्तरपदत्वं छांदसं परिवृत्ते सर्वतः प्रच्छादिते आवसथ्याग्निस
दने इति कर्तव्यतापेक्षयामाह पिंडपितृयज्ञवत् अपराह्णे पिंडपितृयज्ञवत्तथा तदुक्तं पिंडपितृयज्ञविधिना स्त्रीभ्यश्च
पिंडपितृयज्ञवत् इत्यनेन पितृपितामहप्रपितामहानां पिंडदानं प्राप्तं ततोऽधिकमुच्यते स्त्रीभ्यः मातृपितामहीप्रपिताम
हीभ्यः पिंडान्दद्यादिति चकारेण समुच्चीयते अत्र सामान्यापि स्त्रीशब्दः पित्रादिसन्निधानात् मात्रादिपरोऽवसीयतेऽ
वगम्यते उपसेचनं च कर्षूषु सुरया तर्पणेन चांजनानुलेपनं स्रजश्च न केवलं स्त्रीभ्यः पिंडान्दद्यात् किंतु उपसेचनं कु
र्यात् कया सुरया मद्येन कासु कर्षूषु न केवलं सुरया तर्पणेन च तर्पयत्यनेनेति तर्पणं साधनं सक्त्वादि तेन चकार उप
सेचनक्रियासमुच्चयार्थः करणाधिकरणयोश्चेति तर्पणशब्दो ल्युडंतः अंजनं नेत्रे ककुदं सुवीरांजनं प्रसिद्धं तदला
भे लौकिकं कज्जलं अनुलेपनं सुगंधिद्रव्यं चंदनादि स्रजः अप्रतिषिद्धसुरभिपुष्पमालाः चकारोद्दद्यादिति क्रिया
समुच्चयार्थः आचार्यांतेवासिभ्यश्चानपत्येभ्य इच्छन् यदि कामयेत तदा आचार्याय अंतेवासिभ्यश्च शिष्येभ्यः पिंडान्द

गृ॰ सू॰
भा॰ टी॰
९७

द्यात् यदि ते अनपत्याः स्युः मघ्यावर्षे चतुरीया शाकाष्टका एवमष्टकात्रयं सामान्यतो विशेषतश्च अनुविधाय पित्रोस्तु
द्देशक्रमप्राप्तं विशेषतश्चतुर्थी अष्टकामाह मघ्यामध्येवर्षे दृष्टिकालेप्रोष्ठपद्यामूर्ध्वमष्टमीत्यर्थः तुरीया चतुर्थी शा
काष्टका शाकेन कालशाकाख्येन निर्वर्त्य अष्टकाशाकाष्टका इति सूत्रार्थः अथाष्टकाकर्मपद्धतिः तत्र मार्गशीर्षाद्
र्ध्वं कृष्णाष्टम्यां मातृपूजापूर्वाभ्युदयिकश्राद्धं विधायावसथ्याग्नौ कर्म कुर्यात् केषांचित्पक्षे अष्टकाकर्मसु आभ्युदयि
कं नास्ति नाष्टकासु भवेच्छ्राद्धमिति वचनात् तत्र ब्रह्मोपवेशनादि प्राशनांते विशेषः तंडुलानंतरं पूर्वं औपासनाग्निसिद्ध
स्यैवापूपस्य आसादनं प्रोक्षणं च प्रोक्षणकालेनतः आज्यभागांतं कृत्वा त्रिः शतस्व सारइत्येवमाद्यादशाहुतीर्हुत्वा स्था
लीपाकेन शांताः पृथिवीत्यादिभिश्चतुर्भिर्मंत्रैश्चतस्र आहुतीर्हुत्वा अपूपादिंद्राय स्वाहेत्येकामाहुतिं दत्त्वा स्थालीपाक
दपूपाच्च स्विष्टकृतं जुहोति तद्यथा आज्यभागानंतरं त्रिः शतस्व सारउपर्यंतितिनि कृतिः समानकेतुं प्रतिमुंचमानाः
न्नं तूनं स्तन्वनेक वयः प्रजानतीमेघ्येच्छंदसः परियंतिभास्वती स्वाहा १ इदं स्वसृभ्यः ज्योतिष्मती प्रतिमुंचते नभो रात्रीदे
वी सूर्यस्य व्रतानि विपश्यंति पशवो जायमाना नानारूपा मातुरस्या उपस्थे स्वाहा २ इदं रात्र्यै एकाष्टका तपसा तप्यमाना ज
जान गर्भं महिमानमिंद्रं तेन दस्यून्व्यसहंत देवा हंतासुराणामभवच्छचीभिः स्वाहा ३ इदमष्टकायै अनानुजामनुजां मा

राम
९७

154

मकर्त्तः सत्यं वदन्त्यन्विच्छ येतत् भूयासमस्य सुमतौ यथा यूयमन्या वो अन्या मति मा प्रयुक्तः स्वाहा इदं रात्रीभ्यः ४ अभून्मम
सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविदद्धि गाधं भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्त स्वाहा इदं रात्री
भ्यः ५ पंच व्युष्टीरनु पंच दोहा गां पंचनाम्नीमृतवोनु पंच पंच दिशः पंचदशेन क्लृप्ताः समानमूर्ध्नीरधिलोकमेकं स्वाहा
इदं रात्रीभ्यः ६ ऋतस्य गर्भः प्रथमा व्यूषुष्यपामेका महिमानं बिभर्ति सूर्यस्यैका चरति निष्कृतेषु घर्मस्यैका चरति नि
ष्कृतेषु घर्मस्यैका सवितैकां नियच्छतु स्वाहा इदं रात्र्यै ७ या प्रथमा व्यौच्छत्सा धेनुरभवद्यमे सा नः पयस्वती धुक्ष्वोत्त
रामुत्तरां समां स्वाहा इदं रात्र्यै ८ शुक्रऋषभा नभसा ज्योतिषागाद्विश्वरूपा शबली रग्निकेतुः समानमर्थं स्व
पस्यमाना विभ्रती जरामजर उष आगात्स्वाहा इदं रात्र्यै ९ ऋतूनां पत्नी प्रथमेयमागादन्हां नेत्री जनित्री प्रजानां एका स
ती बहुधोषो व्यौच्छत्सा जीर्णा त्वं जरयसि सर्वमन्यत्स्वाहा इदं रात्र्यै १० अथ स्थालीपाकेन चतस्र आहुतयः शांता
पृथिवी त्यादिभिर्मंत्रैः प्रतिमंत्रं जुहोति तद्यथा शांता पृथिवी शिवमंतरिक्षं शन्नो द्यौरभयं कृणोतु शन्नो दिशः प्र
दिश आदिशो नो होरात्रे कृणुतं दीर्घमायुर्व्यश्नवै स्वाहा इदं पृथिव्या अंतरिक्षाय दिवे दिग्भ्यः प्रदिग्भ्य आदिग्भ्यो होरात्रा
भ्यां च आपो मरीचीः परिपांतु सर्वतो धाता समुद्रोऽअपहंतु पापं भूतं भविष्यदकृतद्विश्वमस्तु मे ब्रह्माभिगुप्तः सुरक्षितः

155

गृ·स·
भा·हृ·
९८

स्वाथंस्वाहा इदमग्नीमरीचिभ्यो धात्रेसमुद्रायब्रह्मणेच २ विश्वेआदित्यावसवश्चदेवारुद्रागोप्तारोमरुतश्चसंतुजूर्जं
प्रजाममृतंदीर्घमायुःप्रजापतिर्मेपिपरमेष्ठीद धातुनःस्वाहा इदंविश्वेभ्यःआदित्येभ्योवसुभ्योदेवेभ्योरुद्रेभ्योमरु
द्भ्यःप्रजापतयेपरमेष्ठिनेच ३ अष्टकायैस्वाहा इदमष्टकायै ४ अथपूर्णादेकाहुतिः इंद्रायस्वाहा इदमिन्द्रायस्था
लीपाकादपूपाच्चस्विष्टकृत् ततोमहाव्याहृत्यादिप्राजापत्यांतंहोमंविधायप्राशनादिसमापयेत् श्वोन्वष्टकाक
र्मावसथ्याग्नावेव तत्रनित्यवैश्वदेवानंतरं अपराह्णेप्राचीनावीती नीवीबंधनंकृत्वादक्षिणामुखःपरिवेष्टितेऽग्नि
समीपेअग्नेरुत्तरतःउपविश्याग्रयादिदक्षिणांतमप्रदक्षिणमग्निंदक्षिणाग्रैःकुशैःपरिस्तीर्यअग्नेःपश्चिमतःदक्षिण
संस्थानिपात्राण्येकैकश आसादयति यथा स्रुवं चरुस्थालींवास्रुवपक्षेस्रुगनंतरंचरुस्थालीमुदकं आज्यंमेक्षणंस्र
उदपात्रं सकृदाछिन्नानिक्रीतयोर्लब्ध्ययोर्वाछागस्यपार्श्वसक्थ्योर्मांसं सुरांसक्तून् अंजनं अनुलेपनं स्रजःसू
त्राणिच ततःपार्श्वसक्थ्योर्मांसंश्लक्ष्णंअणुशश्छित्वाप्रक्षिप्तासादितोदकायांचरुस्थाल्यांप्रक्षिप्याग्नावधिश्रित्य
प्रादक्षिण्येमेक्षणेनचालयित्वाशृतंमांसमासादितेनघृतेनाभिघार्य दक्षिणेनउद्वास्यपूर्वेणाग्निमानीयोत्तरतःस्था
पयेत् ततःसर्वंजात्वा चमेक्षणेनमांसमादायाग्नयेकव्यवाहनायस्वाहेत्येकमाहुतिंहुत्वाइदमग्नयेकव्यवाहना

राम
९८

156

यतित्यागंविधायपुनर्मेक्षणेनमांसमादायसोमायपितृमतेस्वाहेतिहुत्वाइदंसोमायपितृमतइतित्यागंविधायमेक्ष
णमग्नौप्रास्याग्नेर्दक्षिणतःपश्चाद्वादक्षिणामुखउपविश्यसव्यंजान्वाच्योपलिप्यस्फ्येनापहताअसुरारक्षांसिवेदिष
दइतिलेखांउल्लिख्यतथैवद्वितीयांउदकमुपस्पृश्ययेरूपाणीत्युल्मुकंप्रथमलेखाग्रेनिधायतथैवद्वितीयलेखाग्रेउ
दकमुपस्पृशेत् ततउदपात्रमादायप्रथमलेखायांपितृतीर्थेनामुकसगोत्रास्मत्पितरमुकशर्मन्नवनेनिक्ष्वेएवंपिता
महप्रपितामहयोरवनेजनंदत्वाद्वितीयलेखायांअमुकसगोत्रेऽस्मन्मातरमुकीदेवीअवनेनिक्ष्वत्येवंपितामहिप्रपि
तामह्योःअवनेजनंदत्वासकृदुपमूललूनानिदक्षिणाग्राणिबर्हींषिलेखयोरास्तीर्य तत्रावनेजनक्रमेणामुकगोत्रास्म
त्पितरमुकशर्मनेतत्तेमांसंस्वधानमइतिपिंडंदत्वापितामहप्रपितामहयोश्चैवंप्रदायापरलेखायांअमुकगोत्रे।
स्मन्मातःअमुकदेविएतत्तेमांसंस्वधानमइतिपिंडंदत्वापितामहीप्रपितामहीपिंडद्वयंप्रदायप्रतिपिंडदानंइदंपित्रेइदं
पितामहायइदंप्रपितामहायइदंमात्रेइदंपितामह्यैइदंप्रपितामह्यैइतित्यागंविधायइच्छयास्त्रीपिंडसन्निधानेअवने
जनसकृदाछिन्नास्तरणपूर्वकंअनपत्येभ्यःआचार्यांतेवासिभ्यश्चयथाक्रमंमांसपिंडानदद्यात् चकारादन्येभ्यो।
पिसपिंडाभिन्नःस्त्रीपिंडसन्निधानेअवटत्रयंखात्वातेषुअमुकगोत्रअमुकीदेवीदेसुरांपिबस्वेतिकत्रावटेसुरांप्रसि

157

च्यतथैवपितामही प्रपितामही इतरयोरवटयोरासिच्यसक्तूनादायामुकगोत्रेऽमुकिदेविदेत्तप्यस्वेतिमातृप्रभृतिभ्यः
सक्तूनवटं प्रक्षिप्यनतस्तथैव अंजस्वेतिमातृप्रभृतिभ्योंजनंदत्वाअनुलिंपस्वेत्यनुलेपनंचदत्वास्रजोपिनह्यस्वेतिस्र
जोदत्वाऽत्रपितरइत्यर्धर्चंजपित्वापराङ्मुखत्वचायुधारयन्नातमनात् उदङ्मुखआसित्वातेनेवावृत्यामीमदंतेत्यर्धर्चं
जपित्वा पूर्ववदवनेज्यनीवींविस्रंस्यनमोवइतिप्रतिमंत्रमंजलिंकरोति गृहान्नइत्याशिषंप्रार्थ्यैतद्वइतिप्रतिपिंडं
सूत्राणिदत्वोर्जंमितिपिंडेष्वपोनिषिच्यपिंडानुत्थाप्यउखायामवध्रायावजिघ्रति सकृदाच्छिन्नान्यग्नौप्रास्योल्मुकंच
प्रक्षिप्योदकंचसंस्पृश्याचम्यआन्वष्टक्यंश्राद्धंकुर्यात् उखाताम्रमयीमृन्मयीवा शिल्पिभ्यःस्थपतिभ्यश्चआदृदीतम
तीसदा उखामांससान्नाप्योस्वाचतोखापश्चूउखापिंडपितृयज्ञोखा इत्येकाष्टका पौष्याऊर्ध्वंकृष्णाष्टम्यांद्वितीयाष्ट
का तत्रप्रथमप्रयोगेमातृपूजापूर्वकंआभ्युदयिकंकृत्वाआवसथ्याग्नौकर्मकुर्यात् तत्रब्रह्मोपवेशनं प्रणीताप्रण
यनपरिस्तरणंविधाय पात्राण्यासादयति पवित्रच्छेदनानि पवित्रे प्रोक्षणीपात्रंआज्यस्थालीद्वेचरुस्थाल्योसंमा
र्गकुशाःउपयमनकुशाःसमिधःस्रुवःआज्यंकाष्मर्यमय्यौ हस्तमात्र्योवयाश्रपण्योशाखाविशाखेअष्टकाचरुतं
डुलाःहस्तमात्रंवारणंमूलं पशुश्रपणार्थमुखाताम्रमयीमृन्मयीवा पायसुकचरुतंडुलाश्चइत्येतानिअथापकल्पनीयां

राम
९९

न्युपकल्पयंति श्लक्ष्णशाखा पलाशशाखा त्रिहस्तप्रमाणा आममात्रा कौशी त्रिगुणरशना उपाकरणतृणमेकं दर्भतरुणं द्वि
गुणरशना कौशी व्याममात्री पशुश्छागः पान्नेजनी उदकपूर्णा स्थाली असिः शस्त्रं हिरण्यशकलानि षट् पदार्थं दधि चेति
ततः पवित्रकरणादि प्रोक्षणांते विशेषः विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामीति पाशुकचरुतंडुलानां प्रोक्षणं आज्यनिर्वापानंत
रमष्टकाचरुपात्रे तंडुलान्प्रक्षिप्य पाशुकचरुपात्रे तंडुलचरुप्रक्षेपं कुर्यात् ततो ब्रह्माज्यं स्वयमष्टकाचरुमन्यः पत्नी चा पाशुक
चरुं युगपदग्नौ उदकंसस्थमधिश्रपयंति ततः पर्यग्निकरणादि प्रोक्षण्युत्सवनांतं यजमान एव कुर्यात् अथाग्नेः पश्चाद्दक्षिणेन
आरभ्य उदकंसस्थाः प्रागग्राः कुशास्तरणे परिश्लक्ष्णशाखा आस्तीर्य अग्नेः प्राग्दक्षिणेन पुरस्तात् कृत्वा पलाशशाखामग्निकुंडलग्नां उद
ग्रशाखा पविष्टः वितस्तिमात्रनिखातां त्रिगुणरशनामादाय प्राग्दक्षिणेन पलाशशाखां त्रिर्वेष्टयति अथोपाकरणतृणेन विश्वेभ्यो दे
वेभ्य उपाकरोमीति पशुमुपाकरोति स्पृशति शरीरे द्विगुणरशनया शृंगमध्ये तन्तूष्णीं दक्षिणकर्णाधस्ताद्बध्नाति विश्वेभ्यो देवेभ्यो
नियुनज्मीति पलाशशाखायां पशुं नियुनक्ति अथ प्रोक्षणीरादाय ब्रह्मन्हविः प्रोक्षिष्यामीति ब्रह्माणमामंत्र्य ॐ इत्येवं प्रोक्षेति ब्र
ह्मणानुज्ञातो विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामीति पशुं प्रोक्ष्य प्रोक्षणीजलं पशोरास्ये कृत्वा शेषं पशोरधस्तादुत्सिंच
ति अथ यथागतमागत्य स्वासने उपविश्य उपयमनकुशानादाय समिधोऽभ्याधाय पर्युक्ष्य ब्रह्मणान्वारब्ध आघारौ हुत्वा आज्यलिप्तेन

तत्स्रुवाग्रेण ललाटे अंसयोः श्रोण्योश्च पशुं समनक्ति अंजनं करोति ततोसिमादाय स्रुवेणैव संयोज्यासिस्रुवाग्राभ्यां पशोर्लला
टमभिस्पृशति ततोग्नेरुल्मुकमादाय त्र्याय प्रदक्षिणं परिगच्छन् पशुं आज्यं शालामग्निं पर्यग्निं कृत्वोल्मुकमग्नौ प्रास्यतावत्
तिपरीत्य अप्रादक्षिण्येनागत्य आस्तरणतृणद्वयमादाय पशुं शिरस उन्मुच्य कंठे बध्वा पलाशशाखां तत उन्मुच्य रशनया वाम
करेण धृत्वा दक्षिणेन वपाश्रपणीभ्यामन्वारब्धमुदङ्मुखं नयति तत्रैकं तृणं भूमौ धृत्वा तस्मिन्नत्यक्तशिरसं प्राक्शिरसं वा उदक्पादं प
शुं निपात्य स्वासने उपविशति यजमानः परः कश्चित्स्रुवं संगृह्य संज्ञपयति संज्ञप्यमाने यजमानः पूर्णाहुतिवदाज्यं संस्कृत्य स्वा
हा देवेभ्य इत्येकामाहुतिं हुत्वा इदं देवेभ्य इति त्यागं कृत्वा संज्ञप्ते देवेभ्यः स्वाहेति तेनैवाज्येन द्वितीयां दत्वा इदं देवेभ्यः अपरायं
चाहुती तूष्णीं जुहोति इदं प्रजापतये इति त्यागः पंचसु तत उत्थाय पशुं मोचयित्वा वपाश्रपणीभ्यां नियोजनीं त्यजति ततः पा
त्नीजननीमादाय पशोः प्राणान् स्वयमेव शुंधति यथा पात्नेजननीजलमादायादाय मुखं दक्षिणोत्तरनासिके दक्षिणोत्तरे चक्षु
षी दक्षिणोत्तरे कर्णौ नाभिं मेढ्रं पायुं एकीकृत्य पादांश्च क्रमेण शुंधति शेषं पशोः पश्चान्निषिंचन्निति ततः पशुमुत्तानं कृत्वा ना
भ्यग्रे उदगग्रं तृणं निधाय असिधारया तृणमभिनिधाय छिनत्ति अथ यद्द्विधाभूतस्य तृणमूलमादाय उभयतो लोहितेनाक्त्वा नि
रस्यव पासुन्निवदति अनंतरं वपाश्रपण्या वा दाय प्रोर्णोति ततश्छिनत्ति वपां तां च प्रस्ताल्स अग्नेरुत्तरतः स्थित्वा प्रतप्य शाखा

ग्नौरंतरेणाहुत्वाऽग्नेर्दक्षिणतःस्थित्वावपांश्रपयतिश्रप्यमाणांचस्रुवेणाज्यंगृहीत्वाभिघार्यपत्यांहृत्यब्रह्माणंप्रदक्षिणीकृत्य
स्वासनेउपविश्यस्रुवेणाज्यंगृहीत्वावपायांप्राणदानंविधायप्लक्षशाखाशाखासादयतिआलभेतचततःब्रह्मणान्वारब्धआज्य
भागौहुत्वात्रिंशत्स्वसारइतिदशाहुतीरन्वारब्धोहुत्वाअष्टकाचरुणाशांतापृथिवीत्यादिकाश्चतस्रोहुत्वावपाहोमायपवा
महस्तस्येस्रुवेआज्यमुपस्तीर्यहिरण्यशकलमवधायवपांद्विर्धाऽवदायगृहीत्वापुनर्हिरण्यशकलमवधायद्विरभिघार्य
वहवपांजातवेदःपितृभ्यःइतिप्राचीनावीतिनोदक्षिणामुखस्यवपाहोमःइदंपितृभ्यःइदंजातवेदसइतित्यागंविधाय
यज्ञोपवीतीभूत्वोदकंस्पृष्ट्वावपाश्रपण्यौविपर्यस्तेअग्नौप्रास्यपशुंविशास्ति तद्यथाहृदयंजिह्वांक्रोडंसव्यंबाहुंपार्श्वेयकृत्
तद्वृक्कौगुदमध्यंदक्षिणाश्रोणिरिति ११ सर्वावदानपक्षेदक्षिणंबाहुंगुदंतृतीयांसव्यांश्रोणिरितिअंगानिस्विष्टकृदर्थानि
यदात्रीणितदाहृदयंजिह्वांक्रोडमितित्रीणि पंचावदानपक्षेहृदयंजिह्वांक्रोडंसव्यंबाहुंपार्श्वेइतिपंच अवद्यति खंडयतित
स्मिन्पक्षेशेषान्स्विष्टकृतेऽवद्यतिततःअवदानानिप्रक्षाल्यशूलेनहृदयंप्रतप्यउखामग्नावधिश्रित्य अवदानानिप्रक्षि
पति स्वल्पमुदकंचततःश्रप्यमाणेहृदयमुपरिकृत्वापृषदाज्येनहृदयमभिघार्यइतराण्यवदानानिअंगवर्जितानिआज्ये
नाभिघारयतिअथोखामुद्वास्यअवधानात्सहृत्यकस्मिंश्चित्पात्रेहृदयादिक्रमेणउदकंसस्थानिनिधायस्रुवेणाज्यमादा

161

हितपांसोवैश्यस्यकृष्णपांसोवास्तुशास्त्रमतेवैश्यस्यपीतपांसोकृष्णस्यशूद्रपांसोस्थिरांश्रेष्ठाएकवर्णाअशुष्कंअभूधरेम
रोमनिर्जलेदेशेब्रह्मवर्चसकामस्यतृणयुक्ते पशुकामस्यमृदुलतेशालासंमितेमंडलाद्वीपसंमितंवास्वयंखातेनश्वभवति वाय
शस्कामस्यबलकामस्यप्राग्द्वारांपत्रपशुकामस्योदग्द्वारांसर्वकामस्यदक्षिणद्वारांनप्रत्यक्द्वारांमुख्यद्वारसहितांपूर्वादि
तःप्रदक्षिणक्रमेणाश्वत्थप्लक्षवटोदुंबरवृक्षवर्जितंकारयेत् भवनस्यपूर्वादौवटोदुंबराश्वत्थप्लक्षाःसार्वकामिकाः
विपरीतास्त्वसिद्धिदाइति मत्स्यपुराणेनथाकंटकीक्षीरवृक्षश्चआसन्नःसफलोद्रुमःधनहानिप्रजाहानिकुर्वंतिक्रमशस्त
था नच्छिंद्याद्यादितानेद्यानंतरेस्यापयेच्छुभान् पुनागाशोकवकुलशमीतिलकचंपकान् दाडिमीपिप्पलीद्राक्षास्तथाकुसु
ममंडपंजंबीरपूगपनसद्रुममंजरीभिर्जातीसरोजशतपत्रिकमल्लिकाभिःयन्नालिकेरकदलीदलपाटलादिभिर्युक्तंतदत्र
भवनंश्रियमातनोति तस्याअवटमभिजुहोत्यच्युतायभौमायस्वाहेति अत्रावटमित्येकवचनंअन्येषांत्रयाणामुपलक्षणार्थं
खातंअभिमुखेनजुहोतिअच्युतायभौमायस्वाहेति अत्रावटमित्येकवचनं अन्येषांत्रयाणामुपलक्षणार्थंसंस्कार्यत्वाविशे
षात् गृहंसंमार्ष्टीतिवदेकवचनं चत्वारोवटाःकृतइतिचेत् धवलगृहस्यस्तंभशालारूपस्यचतुर्षुकोणेषुचत्वारोमूलस्तंभाभ
वंतितेचशिलामुच्छ्रीयंतेशिलाश्चअवटेघ्रियन्तएवचत्वारंयतश्चतुर्षुकोणेषुआग्नेयादिषुचत्वारोवटाभवंतितेषुन्येनैवाज्यंनहो।

षः चरुस्थालीद्वयं तंडुलानंतरं कालिकशाकमासादयेत् कालकसाकचरुसंबंधिमासादनादिहोमांतकर्म प्राचीनावी

तिर्दक्षिणामुखः कुर्यात् अन्यद्यज्ञोपवीती पूर्वाभिमुख कालकशाकचरुसंबद्धं कर्म कृत्वा उदकमुपस्पृशेत् अपूपहोमस्था

ने पितृभ्यः स्वाहेति शाकचरोरेकामाहुतिं जुहुयात् प्रातरन्वष्टकाकर्म पूर्ववत् अथातः शालाकर्म अथ अष्टकाकर्मानंतरं

यतः आवसथ्याधानादीनि शालायां संपाद्यानि अनुविहितानि शालाकरणं च नोक्तं अतो हेतोः शालाकर्म शालायाः गृहस्य क्रि

याया आख्यास्यते इति सूत्रशेषः पुण्याहे शालां कारयेत् पुण्यं शुभं मलमासा वाल्यवृद्धास्तमितगुरुशुक्रगुर्वादित्य सिंहस्थगुरु

क्षयमासदिनग्रहक्रूरग्रहाक्रांतयुक्तानक्षत्रादिदोषरहितं ज्योतिःशास्त्रादिनोक्तग्रहारंभविहितमासपक्षतिथिवारनक्ष

त्रयोगकरणमुहूर्तचंद्रताराबललग्नादिगुणान्वितं अहः पुण्याहं तस्मिन्पुण्याहे शालागृहं कारयेत् निर्मापयीत पुनः पुण्या

हग्रहणं उदगयनशुक्लपक्षयोरनियमार्थं शालां कारयेदित्युक्तं तच्च शालाकरणं देशमंतरेण न संभवति इति सामान्य

तो देशे प्राप्ते यन्नाम्नातं स्वशाखायां पारक्यमविरोधि यत् विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवदिति वचनात् पारस्कराचा

र्येणानुक्तमपि गोभिलगृह्यसूत्रोक्तदेशविशेषं अविरोधात् अपेक्षितत्वाच्चात्र लिखामः तद्यथा कीदृशे देशे शालां कारये

त् समे लोमशे अविभ्रंशिनि प्राचीनप्रवणे उदक्प्रवणे वा अक्षारार्कट्कीकटुकौषधिवति विप्रस्य गौरपांसौ क्षत्रियस्य लो

यहृदयादीनामंगवर्जितानां क्रमेण श्राणदानं कृत्वा शाखाग्रोरं नरेण हृत्सम्भक्षशाखासु हृदयादिक्रमेणोदकं संस्थाप्यासाद
यति ततस्त्वंगवर्जितान्यालभते अथ प्रधानहोमार्थं स्रुवेण आज्यमुपस्तीर्य हिरण्यशकलमवधाय हृदयादिभ्यः क्रमेण द्वि
र्द्विरवदाय स्रुवे सिक्त्वा स्थालीपाकाच्चसकृदवदायोपरि क्षिप्त्वा तदुपरि हिरण्यशकलं दत्वा सकृदभिघार्य विश्वेभ्यो देवेभ्यः स्वा
हेति जुहुयात् इदं विश्वेभ्यो देवेभ्यः ततः स्विष्टकृदर्थं स्रुव उपस्तीर्य हिरण्यशकलं दत्वाऽङ्गेभ्यो द्विर्द्विरवदाय स्रुवे कृत्वा चरु
हृद्याच्च सकृत्सवदाय हिरण्यशकलमवधाय द्विर्द्विरभिघार्य अग्नये स्विष्टकृते स्वाहेति जुहुयात् इदमग्नये स्विष्टकृते इति
त्यागः असर्वावदानपक्षे प्रधानावदानशेषात् स्विष्टकृद्धोम इति शेषः ततो महाव्याहृत्यादि प्राजापत्यांतान् वाज्याहुतीर्हु
त्वा ब्रह्मान्वारब्धो हुत्वा संस्रवं प्राश्य ब्रह्मणे पश्वंगं दक्षिणां दद्यात् ततः स्मृत्यनरोक्तं पंचविंशति ब्राह्मणभोजनं च दद्यात्
अस्यैव पशोः सव्यपार्श्वसक्थिभ्याम परदिने अन्वष्टकाकर्म पूर्ववत् माघ्याः ऊर्ध्वं कृष्णाष्टम्यां तृतीया प्राजापत्या
ष्टका सा यथा प्रथमाष्टका तत्र अपूपस्थाने कालशाकचरुस्तदग्निसिद्ध एव तमासादयेत् आसादनकाले प्रोक्षणका
ले प्रोक्षयेत् ततोऽपूपयागस्थाने प्रजापतये स्वाहेति कालशाकं जुहुयात् शेषं समानं कालशाकालाभे वास्तुकं अन्येद्युः
पूर्ववदन्वष्टकाकर्म प्रोष्ठपद्याः ऊर्ध्वं कृष्णाष्टम्यां चतुर्थी पित्र्या शाकाष्टका सा च प्रथमाष्टकावत् एतावान्विशेषः

165

मः स्तंभमुच्छ्रयतीमामुच्छ्रयामीत्यादिस्तंभमुच्छ्रयतिउत्थापयतिअवटेमिनोतीत्यर्थः केनमंत्रेण इमामुच्छ्रयामीत्याश्रेयोवसान
इत्यनेन चतुरः ततोनैनेवमंत्रेणनैर्ऋत्त्यावटेवायव्यावटेचतुरः स्तंभानुच्छ्रयति इतरगृहेषुचतुर्षुकोणेषुशिलान्यासएवनभव
ति एभिर्मंत्रैः प्रपद्यंतेयतः शालांप्रपद्यतेप्रविशति अभ्यंतरतोग्निमुपसमाधायदक्षिणतोब्रह्माणमुपवेश्योत्तरतउदपात्रंप्र
तिष्ठाप्यस्थालीपाकं श्रपयित्वानिष्क्रम्यद्वारसमीपेस्थित्वाब्रह्माणमामंत्रयतेब्रह्मन्प्रविशामीतिब्रह्मानुज्ञातः प्रविशत्यृ
तंप्रपद्येशिवंप्रपद्यइतिअभ्यंतरतः अद्यनिष्पन्नायाः शालायामध्येअग्निमावसथ्यंउपसमाधायपंचभूसंस्कारपूर्वकंस्थाप
यित्वा दक्षिणतोब्रह्माणमुपवेश्यउत्तरतः अग्नेरुत्तरप्रदेशेउदपात्रंजलपूर्णंताम्रादिभाजनंप्रतिष्ठाप्यनिधायअत्रपुनर्ब्रह्मो
पवेशनवचनंउदपात्रप्रतिष्ठापनावसरज्ञापनार्थंस्थालीपाकंचरुं श्रपयित्वायथाविधिपक्त्वाब्रह्माणंऋत्विजंआ
मंत्रयते संबोधयति कथंब्रह्मन्प्रशमंविशमीति आमंत्रितेनब्रह्मणाप्रविशेत्यनुज्ञातः प्रसूतः प्रविशतिशालांप्रपद्ये
ऋतंपद्येशिवंप्रपद्यइतिमंत्रेणआज्यं संस्कृत्यत्येहरतिरित्याज्याहुतीर्हुत्वापराजुहोतिवास्तोष्पइत्यादिअत्रप्राप्तम
प्याज्यसंस्कारविधानंआघारादर्वाक्इहरतिरितिआज्यहोमप्राप्त्यर्थंआज्यसंस्कारानंतरंपर्युक्षणांते इहरतिहरमध्व
ग्निधृतिस्वाहेत्येका उपसृजमित्यादिसुदीघरत्स्वाहेतिद्वितीयामाहुतींजुहोतिवास्तोष्पतइतिचतसृभिर्ऋग्भिरपराः

प्रत्युच्चवतस्तत आज्याहुतीर्जुहोति तत आघारावाज्यभागौ स्थालीपाकस्य जुहोति अग्निमिंद्रमित्यादि ततः स्थालीपाकस्यच
शेरग्निमिंद्रमित्यादिभिः षड्भिर्मंत्रैः प्रतिमंत्रमंत्राहुतीर्जुहोति प्राशनांतेकांस्ये संभारानौदुंबरपलाशाणि समुराणि शाडू
लंगोमयंदधिमधुघृतंकुशान् यवांश्चासनोपस्थानेषु प्रोक्षेत् ततः स्विष्टकृदादिसंस्रवप्राशनावसानकांस्ये कांस्यमये पात्रे
संभारान् वक्ष्यमाणानोप्यकृत्वा औदुंबरपत्राणिसमुराणिसक्षीराणिशाडूलंदूर्वा गोमयं अरोगिणय द्विगोः सकृत् दधिमधुघृ
तंयवान् निगदव्याख्यातान् आसनानिच उपस्थानानिच आसनोपस्थानानि वास्तुशास्त्रोपदिष्टानि प्रोक्षेत् अभिषिंचेत् इ
त्यर्थः अत्र आसनानि नागदंतादीनि स्थाना उपस्थानानि देवतास्थानानि पूर्वे संधावभिमृशति श्रीश्चत्वेति ततः शालायाः पू
र्वसंधौ अभिमृशति पूर्वसंधिप्रवेशं आलभते श्रीश्चत्वेति मंत्रेण एवं दक्षिणसंधौ यज्ञस्य त्वेति मंत्रेण तथैव पश्चिमसंधौ अन्नं
च त्वेति तद्वदुत्तरे अर्कश्च त्वेति निष्क्रम्य दिश उपतिष्ठते एवं शालायाः पूर्वाधिसंधि अत्र अभिमर्शनं कृत्वा बहिर्निष्क्रम्य दिशः प्रा
चीप्रमुखाश्चतस्रः केता च मा सुकेता चेत्यादिभिश्चतुर्भिर्मंत्रैः प्रदक्षिणक्रमेण प्रतिमंत्रं तूपतिष्ठते स्तौति निष्ठितां प्रपद्यते ध
र्मस्थूण इति निष्ठितां निर्मितां संपूर्णामिति यावत् प्रपद्यते प्रविशति धर्मस्थूणेत्यादिना सतुर्वसतइत्यंतेन मंत्रेण ततो ब्राह्मण
भोजनमिति सूत्रार्थः अथ प्रयोगपद्धतिर्लिख्यते अथ शालाकर्मोच्यते तत्र प्रथमाहे मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं

कृत्वा पूर्णाहुतीवदाज्यं संस्कृत्य स्तंभस्थानावटेषु चतुर्षु प्रत्यवटं माग्नेयकोणादारभ्य अच्युताय भौमाय स्वाहेत्यनेन मं-
त्रेणैकैकामाज्याहुतिं जुहुयात् इदमच्युताय भौमायेति प्रत्याहुतित्यागः अथ होमक्रमेण अवटेषु तूष्णीं शिलां स्था-
पयित्वा तदुपरि इमामुच्छ्रयामीत्यादिना मंत्रेण श्रेयोवसान इत्यंतेन इमामुच्छ्रयामि भुवनस्य नाभिं वसोर्धारां प्रत-
रणीं वसूनां इहैव ध्रुवां निमिनोमि शालां क्षेमे तिष्ठतु घृतमुक्षमाना अश्वावती गोमती सूनृतावत्युच्छ्रयस्व महते सौभगा-
य आत्वा शिशुराक्रंदत्वा गावो धेनवो वश्यमानाः आत्वा कुमारस्तरुण आवत्सो जगदैः सह आत्वा परिस्रुतः कुंभ आदध्नः
कलशैरुप क्षेमस्य पत्नी बृहती सुवासा रयिं नो धेहि सुभगे सुवीर्यम् अश्वावद्गोमदूर्जस्वत्पर्णं वनस्पतेरिव अभि नः पूर्यतां
रयिरिदमनु श्रेयोवसान इत्यनेन मंत्रेण होमक्रमेणैव चतुर्षु अवटेषु चतुरः स्तंभानुच्छ्रयति मिनोति स्तंभाभावे अनेनै-
व मंत्रेण प्रत्यवटं शिलां स्थापयेत् अहर्निष्पन्नायां शालायां तन्मध्यप्रदेशे पंचभूसंस्कारपूर्वकं आवसथ्याग्निं स्था-
पयित्वा ब्रह्माणमुपवेश्य उत्तरत उदपात्रं प्रतिष्ठाप्य प्रणीताप्रणयनं विधाय कुशकंडिकापूर्वकं चरुं श्रपयित्वा।
प्रोक्षण्युत्पवनांते बहिर्निष्क्रम्य द्वारसमीपे गृहाभिमुखं स्थित्वा ब्रह्मन्प्रविशामीति ब्रह्माणमामंत्र्य प्रविश इति
ब्रह्मणानुज्ञातः ऋतं प्रपद्ये शिवं प्रपद्य इति मंत्रेण शालायां प्रविशेत् अथ स्वासने उपविश्य उपयमनकुशानादाय समि-

गृ·सू
भा·ह
१०५

त्रेणप्राचीदिशमुपस्थायाथदक्षिणतः गोपायमानं चरक्षमाणा चदक्षिणतोगोपायेतामितिदक्षिणांदिशमुपस्थायाथ
पश्चिमांदीदिविः त्यहवैगोपायमानꣳ रात्रीरक्षमाणानोप्रपद्येताभ्यांनमोस्तुतेमादक्षिणतोगोपायेतामिप्राणोजायबिलो
प्रपद्येताभ्यांनमोस्तुतेमापश्चाद्गोपायेतामितिमंत्रेणोपस्थाय अथोत्तरं अस्वप्नश्चमाणवद्रागश्चोत्तरतोगोपायेतामिति
चंद्रमावाअस्वप्नोवायुरणवद्राणस्तौप्रपद्येताभ्यांनमोस्तुतोमोत्तरतोगोपायेतामिति चंद्रमावाअस्वप्नोवायुरनवद्रा
णस्तौप्रपद्येताभ्यांनमोस्तुतोमोत्तरतोगोपायेतामितिमंत्रेणउपतिष्ठते ततः समाप्तायांशालायांजपातिविदुपदिष्टपएव
हनिप्रवेशेनववेश्मनइतिवचनात् मातृपूजाभ्युदयिकेविधायब्राह्मणैः कृतस्वस्त्ययनोमंगलतूर्यगीतशांतिपाठनस
जलकलशब्राह्मणपुरःसरः शुक्लमाल्यानुलेपनस्नातःशस्यकलपत्रपौत्रादिसमेतः सुशकुनसूचिताभ्युदयः तोर
णाद्यांशालांद्वारेणप्रविशति धर्मस्थूणाराजꣳश्रीस्तूपमहोरात्रेद्वारफलकेइन्द्रस्यग्रहावसुमंतोवरूथिनस्तानहं प्रप
द्येसहप्रजयासहपशुभिर्यन्मेकिंचिदस्त्युपहतः सर्वगणःसखायःसाधुसंवृतस्तांत्वाशालेरिष्टवीराम् गृहाःतः संतुसर्वत
इत्यनेनप्रविशेत् ततोब्राह्मणभोजनं इतिशालाकर्म अथातोमणिकावधानं अथशालाकर्मानंतरंयतः शालायांमणिको
नभवितव्यं अंतः मणिकावधानंव्याख्यास्यते उत्तरपूर्वस्यांदिशिपूपवदवटंखात्वाकुशानास्तीर्याक्षतानरिष्टकांश्चामा

एम:
१०५

168

त्रेचव्युष्टांदेवीमहायथां एतान्त्सर्वान्प्रपद्येहंवास्तुमेदत्तवाजिनःस्वाहा इदंपूर्वान्हायमध्यंदिनायप्रदोषायार्द्धरात्राय व्युष्टायैदेव्यैमहापथायैच कर्तारंचविकर्तारंविश्वकर्माणमोषधीश्चवनस्पतीन् एतान्सर्वान्प्रपद्येहंवास्तुमेदत्तवाजिनःस्वाहा इदंकर्त्रेविकर्त्रेविश्वकर्मणेओषधीभ्योवनस्पतिभ्यश्च धातारंचविधातारंनिधीनांचपतिंसहएतान्सर्वान्प्रपद्येहंवास्तुमेदत्तवाजिनःस्वाहा इदंधात्रेविधात्रेनिधीनांपतयेचस्योनंशिवमिदंवास्तुदत्तंब्रह्मप्रजापतीन्सर्वाश्चदेवताःस्वाहाइदंब्रह्मणेप्रजापतयेसर्वाभ्योदेवताभ्यश्च ततःस्थालीपाकेनस्विष्टकृद्धोमंनिदध्यात्ततोमहाव्याहृत्यादिप्राजापत्यांतानवाज्याहुतीर्हुत्वासंस्रवप्राशनंकृत्वाब्रह्मणेदक्षिणांदत्वाकांस्यपात्रेअनुपहतेसक्षीराण्योदनयोपत्राणिहृयंगोमयं दधिमधुघृतकुशयवांश्चसंभारान्कृत्वाआसनानिनादंतादिस्थानानि उपस्थानिदेवतास्थानानिप्रोक्षितैःसंभारैःअथपूर्वेसंधौश्रीश्चत्वायशश्चपूर्वेसंधौगोपायेतामितिमंत्रेणअभिमर्शनंकरोतिततोदक्षिणेसंधौयज्ञस्त्वादक्षिणाश्चदक्षिणेसंधौगोपायेतामिति अनंतरंपश्चिमेसंधौ अन्नंचत्वाब्राह्मणाश्चपश्चिमेसंधौगोपायेतामिति अथोत्तरसंधौ ऊर्क्चत्वासूनृताश्चोत्तरेसंधौगोपायेतामिति अथगृहान्निष्क्रम्यवक्ष्यमाणैःमंत्रैःयथालिंगदिशउपतिष्ठतेकेताचमासुकेताचपुरस्ताद्गोपायेतामित्यग्निर्वैकेतादित्यःसुकेतातौप्रपद्येताभ्यांनमोस्तुतौमापुरस्ताद्गोपायेतामितिनिम

दाधानपर्युपंक्षणानिकृत्वा इहरतिरिहरमध्वमिह धृतिरिहस्वधृतिः स्वाहेति आज्याहुतिंजुहुयात् इदमग्नयेइतित्यागं
विधायउपसज्जंधरुणंमात्रेधरुणोमातरंधयन् रायस्पोषमस्मासुदीधरत्स्वाहेति मंत्रेणपुनर्जुहुयात् इदमग्नये अपरा
श्वतस्त्रआहुतयोवास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोअनमीवोभवानः यत्त्वेमहेप्रतितन्नोजुषस्वशन्नोभवद्विपदेशंचतुष्प
देस्वाहा इदंवास्तोष्पतये वास्तोष्पतेप्रतरणोनएधिगयस्फानोगोभिरश्वेभिरिंद्रो अजराससस्तेसख्येस्यामपितेवपुत्रान्प्रतिन
न्नोजुषस्वस्वाहेति द्वितीयां इदंवास्तोष्पतये वास्तोष्पतेशग्मयासꣳसदातेसक्षीमहिरण्मयागातुमत्या पाहिक्षेमउत्तयो
गेवरन्नोयूयंपातःस्वस्तिभिःसदानः स्वाहेतितृतीयां इदंवास्तोष्पतये अमीवहावास्तोष्पतेविश्वारूपाण्याविशन्सखासु
शेवएधिनः स्वाहेत्यनेनचतुर्थींजुहुयात् इदंवास्तोष्पतयइतिचतत्स्तत्त्यागः ततः आघारावाज्यभागौहुत्वाचरु
णाअग्निमिंद्रंइत्यादिभिः षड्भिर्मंत्रैः षडाहुतीर्जुहुयात् तद्यथा अग्निमिंद्रंबृहस्पतिंविश्वांश्चदेवानुपह्वये सरस्वतीं
चवाजिनीचवास्तुमेदत्तवाजिनः स्वाहा इदमग्नयेइंद्रायबृहस्पतये विश्वेभ्योदेवेभ्यः सरस्वत्यैवाजिन्यैच सर्पदेवजनान्सर्वा
न्हिमवंतꣳसुदर्शनंवसूꣳश्चरुद्रानादित्यानीशानंजगदैःसह एतान्त्सर्वान्प्रपद्येहंवास्तुमेदत्तवाजिनः स्वाहाइदंसर्पदेवज
नेभ्योहिमवतेसुदर्शनायवसुभ्योरुद्रेभ्यआदित्येभ्यईशानायजगदेभ्यश्च पूर्वान्हमपरान्हंचोभौमध्यंदिनासहप्रदोषमर्ध

171

निचाभिमंगलानि च तस्मिन्निमनोति मणिकं समुद्रोसीति तत्रशालायां उत्तरपूर्वस्यां ऐशान्यां दिशि यूपवत् अश्वादा
नपरिलेखपूर्वकं अवटं मणिकवृद्धौवस्थानपर्याप्तं गर्त्तं खात्वा निखाय ततः प्रांचः पांसून पोह्यावटस्योपरि प्रागग्रान् दी
र्घान् कुशानास्तीर्य कृत्वा अक्षतान् यवान् अरिष्टकान् अरिष्टफलानि अन्यानि च मंगलानि शङ्खहृद्धिक्षिप्यर्थकादीनि ओ
प्य चकारः समुच्चयार्थः तस्मिन्नवटे त्मनिकं उदकधानीमिनोति स्थापयति समुद्रोसिन भस्वानार्द्रदानुः शंभूरित्येतावदा
तामंत्रेण अप आसिंचत्यापोरेवतीः क्षयथाहिवस्वः क्रतुंच भद्रं विभृथामृतं चाएयश्वस्थस्वपत्तस्य पत्नीः सरस्वतीतद्गृ
णेतवयोधाइति तस्मिन्मणिके अप उदकं नद्यादेः अभूद्राहृतं आसिंचति अपोरेवतीरितिमंत्रेणप्रक्षिपति आपोहिष्ठे
ति च तिसृभिः आपोहिष्ठामयोभुवइत्यादिभिस्तिसृभिर्ऋग्भिः पुनर्मणिके सकृदप आसिंचति ततोब्राह्मणभोजनम् अ
थपद्धतिः ततोमणिकावधाननिमित्तं मातृपूजापूर्वकं अभ्युदयिकं श्राद्धं कृत्वा अग्नेरैशानप्रदेशे देवस्यत्वासवितुः प्रसवे
श्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यां आददेनार्यसीतिमंत्रेणाभ्रिमादाय इदमहं रक्षसां ग्रीवा ऽ अपिकृन्तामीत्यवटं भांडानु
मानं परिलिख्य उदकस्पर्शं कृत्वा खात्वा प्रपंचः पांसून पास्यकुशानास्तीर्य अक्षतान् रिष्टकान् ऋद्धिवृद्धिहरिद्रादूर्वादिमं
गलद्रव्यं निक्षिप्य तदुपरिसमुद्रोसिनभस्वानार्द्रदानुः शंभुरित्येतावता मंत्रेण मणिकं अवटे अवधाय आपोरेवतीः क्षयथाहि व

गृ॰सू॰ भा॰ह॰ १०६

स्वः क्रतुं च भद्रं बिभृयाम् ऋतं च राय च स्थः स्वपपत्यस्य पत्नी सरस्वती तद्गुणं ते वयो धाइत्यंतेन मंत्रेण आपो हि ष्ठा मयो भुव
इत्यादि त्रिकेन च मणिके अप आसिंचति ब्राह्मणमेकं च भोजयेदिति मणिकावधानम् अथातः शीर्षरोगभेषजं अथ म
णिकावधानानंतरं शिरोरोगवान् किंचित्कर्म कर्तुं न शक्नोति अतः शीर्षणि मूर्धनि रोगस्तस्य भेषजं प्रतीकारः आस्यास्य ते पा
णी प्रक्षाल्य भ्रुवौ विमार्ष्टि चक्षुर्भ्यां श्रोत्राभ्यां गोदानाच्छुबुकादधि यक्ष्मं थ्यं रराटाद्विवृहामीममिति यदि स्वस्य परस्य वा
शिरसि पीडा भवति तत्र पाणी स्वकीयौ हस्तौ प्रक्षाल्य अद्भिर्वनेनिज्य भ्रुवौ युगपत्ताभ्यां पाणिभ्यां विमार्ष्टि प्रोक्षति अन्यस्य वा
स्वयं करोति चक्षुर्भ्यां श्रोत्राभ्यां गोदानाच्छुबुकादधि यक्ष्मं शीर्षण्यं रराटाद्विवृहामीममित्यनेन मंत्रेण अर्द्धवेदस्त्वभेदक विरूपा
क्षः श्वेतपक्षो महायशाः अथो चित्रपक्षः शिरो मास्याभितोप्सीरिति अर्द्धं चेत् शीर्षं व्यथते तदा पूर्ववत् पाणी प्रक्षाल्य दक्षिणेन
पाणिना यदि शिरसो दक्षिणभागे रुक् तदा दक्षिणं वामे वामं अवभेदक विरूपाक्ष श्वेतपक्षो महायशाः अथो चित्रपक्षः शिरो मा
स्याभिताप्सीरित्यनेन मंत्रेण एकां भ्रुवं विमार्ष्टि स्रेम्यो ह्येव भवति हि स्फुटं एवं कृते स्रेम्यः शिरोरोगरहित एव भवति उत्तूलपरिमेहः अन्
त्यस्य दुर्विनीतस्य दासस्य परि समंतात् मेहः सेवनं वशीकरणं कर्म कथ्यते यथा स्वपतो जीवविषाणे स्वं मूत्रमासिच्य आपसलवित्रिः
परिषिंचन्नरीपात्परित्वा गिरेरहं परिमातुः परिस्वसुः परिपित्रोश्च भ्रातोश्च सख्येभ्यो विसृजाम्यहं उत्तूलपरिमीढोसि परिमीढः

राम: १०६

172

क्व गमिष्यसि इति ततः सदासः यदास्त्वपि निनं दागवादेः पशोर्जीवतः विषाणे शृंगे स्वं मूत्रं आसिच्य कृत्वा तत्स्वस्वपतः अपसल
विभिः अपसव्येन अप्रादक्षिण्येन विषाणस्थं मूत्रं परिसमंतात् सिंचन् उक्तस्तन्त्रिः त्रीन्वारान्वपरीयान् परिभ्रमेत् परित्वा गिरेर
हं परिमातुः परिस्वसुः परिपित्रोः भ्रात्रोः सखिभ्यो विसृजाम्यहं उन्नूलपरिमीढोसि परिमीढः क्व गमिष्यसीत्यनेन मंत्रेण
संपदि भ्रम्याद्वा दावाग्निमुपसमादाय घृताक्तानि कुशेहानि जुहुयात् परिताहुलनोहुलानिवृत्ते द्रवी रुद्र इंद्र पाशेन छित्वाम
द्यामुत्का थानमानयेदिति सदासः यदि अस्मिन्कर्मणि कृते पश्चम्यात् स्वेच्छया विचरेत् तदा नष्टसांर्थमिदं कर्म कुर्यात् तथा
पंचभूसंस्कारपूर्वकं दावाग्निं वनदहनं स्थापयित्वा ब्रह्मोपवेशनादि पर्युक्षणांते आघारावाज्यभागौ महाव्याहृति सर्वप्राय
श्चित्त प्राजापत्य स्विष्टकृदंता श्चतुर्दशाहुतीर्हुत्वा कुशेष्वनिजुहुयात् कुशानां इन्द्रादिकं इलाकाराणि पत्राणि घृताक्ता
नि त्रीणि परत्वाहुलइत्यादिना अथान्नमानयेदित्यनेन मंत्रेण सकृदेव जुहुयात् इदमिंद्रायेति त्यागः ततः संस्रवप्राशनं
ब्रह्मणे दक्षिणादानं तत्कुर्यात् क्षेम्योह्येव भवति अस्मिन्कर्मणि कृते हि स्फटं क्षेम्यः वश्यः दास एव भवति संपद्येत इ
त्यूलदासवश्यकर्म शूलगवः स्वर्ग्यः पशव्यः पुत्र्यो धन्यो यशस्य आयुष्यः अथ स्वर्गादिकामस्य शूलगवाख्यं कर्म याग
विशेषमनुविधास्यन्नाह शूलगव इति स च स्वर्ग्यः स्वर्गोपहितः पशव्यः पशुभ्यो हितः पुत्र्यः पुत्रेभ्यो हितः धन्यः धनाय

173

हितः पशव्यः पशवे हितः आयुष्यः आयुषे हितः अयमर्थः यदा यजमानः स्वर्गपशुपुत्रधनयशआयुष्यमनन्ततम
कामो भवति तदानेन शूलगवाख्येन यजेत अनेककामानां युगपदुत्पत्तिसंभवात् औपासनमरण्यं ह्रत्वा वितानं सा
धयित्वा रौद्रं पशुमालभते सांडं औपासनं आवसथ्याग्निं अरण्यं अटवीं ह्रत्वा तत्र वितानं त्रेताग्निविन्यासं साधयित्वा शू
लोक्तप्रकारेण विरचय्य रुद्रे रुद्रो देवता अस्येति रौद्रस्तं रौद्रं पशुं छागं आलभते संज्ञपयति कथंभूतं सांडं सह अंडाभ्यां वर्त्त
त इति सांडस्तं अनपुंसकमित्यर्थः गोर्वा शब्दात् वा शब्दः पक्षव्यावृत्तौ नैव छागः पशू रौद्रः अपितु सांडो गौः कुतः शब्दात्
शूलगव इत्येतस्माच्छब्दात् वपां श्रपयित्वा स्थालीपाकमवदानानि च रुद्राय वपामंतरिक्षाय वसां स्थालीपाकमि
श्राण्यवदानानि जुहोति अग्नये इत्यादि वपां पक्त्वा स्थालीपाकं अवदानानि च ह्रदयादीनि सहैव श्रपयित्वा न तु पशु
तंत्रे विहसत्यमि[illegible]ऽग्नौऽवदानं श्रपणं वपाश्रपणं चाह वनीये हृष्टं अत्र तन्माभूदिति वपां श्रपयित्वा स्थालीपा
कमवदानानि सह श्रपणमुच्यते रुद्राय वपामंतरिक्षाय वसां तत्र रुद्राय वपां जुहोति अंतरिक्षाय वसां जुहो[illegible]
हारः स्थालीपाकमिश्राण्यवदानानि जुहोत्यग्नये इत्यादि अवदानहोमावसरे ह्रदयादीन्यवदानानि स्थालीपाकेण च
रुणा मिश्राणि संयुतानि जुहोति अग्नौ प्रक्षिपति न वक्तव्य अग्नये स्वाहेत्यादिभिर्वक्ष्यमाणैर्नवभिर्मंत्रैः अग्नये रुद्राय श

र्वीयपशुपतयेउग्रायाशनयेभवायमहादेवायशानावपेति वनस्पतिस्विष्टकृदंतेदेआघारणंवनस्पतिश्चस्विष्टकृच्चव
नस्पतिस्विष्टकृतौतयोर्वनस्पतिस्विष्टकृतोरंतेआघारणंकर्तव्यं तत्रआघारणदिशंवसयाकुर्यात् तत्रवनस्पतिहोमः।
स्विष्टकृद्धोमाद्र्वाक् एषद्राज्येनभवतिपशोस्तथादृष्टत्वात् स्विष्टकृद्धोमश्चसवीवदानपक्षेऽंगेभ्यः असवीवदानपक्षेत्वं
नेभ्यएवावशिष्टेभ्यः अत्रसूत्रेआघारणमेवनिबद्धं तत्रद्रव्यदेवतापेक्षायांसर्वपशुप्रकृतिभूताग्नीषोमीयदर्शनात् वसाद्र
व्यंदिशोदवआघारणधर्मतयालभ्यतेआघारणांतेपत्नीः संयाजयंतीन्द्राण्यैरुद्राण्यैशर्वाण्यैभवान्याअग्निंगृहपति
मिति व्याघारणस्यदिशामभिघारणस्य अंतेऽवसानेपत्नीः पंचवक्ष्यमाणाःसंयाजयंति जायान्यापश्वंगेणकथइन्द्रा
ण्याइत्यादिभिः पंचभिर्मंत्रैः स्वाहाकारांतैः प्रतिमंत्रंलोहितंपालाशेषुकूर्चेषुरुद्रायसेनाभ्योवलिंहरंति यस्तेरुद्रे
त्यादि ततोमहाव्याहृत्यादिहोमांते लोहितंततस्यैवपशोरुधिरंपालाशेषुपलाशपत्रेषुकूर्चेषुआसनेषुप्राक्संस्थेषु
उदक्संस्थेषुवारुद्रायसेनाभ्यः रुद्रायदेवतायैसेनारुद्रायसेनाः अलुक्समासः ताभ्यावलिमुपहारंहरंतिदद्दातिया
स्तइत्यादिभिः षड्भिर्मंत्रैःषड्सुपलाशकूर्चेषुप्रतिमंत्रंप्रत्येकं ऊवध्यंलोहितलिप्तमग्नौप्रास्यंतिअधोवानिखनंति ऊवध्यं
पुरीषाधानीपात्रीतिप्रसिद्धंलोहितेनरक्तेनलिप्तंसंस्पृष्टंलोहितलिप्तंअग्नौआहवनीयेप्रास्यतिप्रक्षिपतिवाअधःभूमौ

निखनतिनिदधाति अनुवातंपशुमवस्थाप्यरुद्रैरुपतिष्ठते प्रथमोत्तमाभ्यांवानुवाकाभ्यां अनुवातंवातमनुलक्षीकृत्य
वातानाभिमुखमित्यर्थः पशुं अवशिष्टंपशुशरीरं अवस्थाप्यनिधायरुद्रैर्नमस्तइत्यध्यायेनाम्नातैः उपतिष्ठतेयद्वा प्रथमोत्त
माभ्यांअनुवाकाभ्यांमंत्रसमुदायाभ्यां प्रथमोनुवाकः नमस्तइत्यारभ्यषोडशर्चः उत्तमोंतिमः द्रापेअंधसस्पतइत्या
द्यष्टविंशतिकंडिकात्मकः नैतस्यपशोर्ग्रामंहरंति एतस्यरौद्रस्यपशोर्मांसंग्रामंनहरंतिग्रामंप्रतिननयंतियाज्ञिकाः
किंतुआरण्यएवोत्सृजंति एतेनैवगोयज्ञोव्याख्यातः एतेनैवशूलगवेनैवगोयज्ञोगोयज्ञनामधेयोयागःव्याख्यातःक
थितः तत्रद्रव्यविशेषमाह पायसेनानर्थलुप्तः पायसेनपयसासंसिद्धेनचरुणा अनर्थलुप्तः शूलगवप्रधानदेवताहो
मलोपरहितः तस्यतुल्यवयागौर्दक्षिणा तस्यपशोःतुल्यवया शूलगवपशोः वयसातुल्यंसमंवयजन्मातिक्रांतिकालो
यस्यगोःसतुल्यवयागौपुंगवः दक्षिणाप्ररिक्तयद्द्रव्यंब्राह्मणेदेयमितिसूत्रार्थः अथप्रयोगः स्वर्गपशुपुत्रधनयशआ
युष्कामानांशूलगवपशुर्बंधोविहितः तत्रमातृपूजापूर्वकमाभ्युदयिकंश्राद्धंकृत्वाऔपासनाग्निमादायारण्यंगच्छेत्तत्र
नमुचौदेशेगार्हपत्यायतनेसप्तविंशत्यंगुलमष्टत्वेविधायतन्मध्यनिखातशंकोः अष्टौएकादशद्वादशवास्वकीयानिप
दानिपदानिप्राचीगत्वा तदंतेशंकुंनिखायतयोःशंक्वोःउभयतःपाशांरज्जुंप्रसार्यहवनीयायतनंरचयेत् तद्यथायावत्य

176

माणा रज्जुः स्यात् तावानेवागमो भवेत् आगमार्द्धं च शंकुः स्यात् तदर्द्धं च निरंछनम् इति शुल्ववचनानुसारेण अत्रायं रचनाप्रकारः
पूर्वस्माच्छंकोः द्वादशांगुष्ठपर्वपरिमितं देशं पूर्वतः पश्चिमतश्च परित्यज्य तत्र शंकुद्वयं निखाय चतुर्विंशत्यंगुलां रज्जुं परिमा
य तावतीमेवमधिकां गृहीत्वा उभयतः पाशौ कृत्वा रज्जोरागमार्द्धे शंकुस्थानं सत्त्रादिनांकयित्वा अपरागमार्द्धं निरंछनं आर्ष
ण सूत्रगुणमोप्य पूर्वार्द्धापरार्द्धयोः शंक्वोः तस्या रज्वाः पाशद्वयं निक्षिप्य निरंछेन गुणेन दक्षिणत आकृष्य शंकुस्थाने शंकु
निखाय पुनस्तामेव रज्जुमुत्तरतो नीत्वा तथैवाकृष्य शंकुस्थाने अपरं शंकुं निहन्यात् अथ रज्वाः पाशौ परिवर्त्य पूर्ववत् निरंछ
नगुणेन दक्षिणत आकृष्य शंकुस्थाने शंकुं निखाय पुनस्तामेव रज्जुमुत्तरतो नीत्वा तथैवाकृष्य शंकुस्थाने शंकुं निहन्यात्
एवं चतुरस्रं चतुर्विंशत्यंगुलायामविस्तारमाहवनीयायतनं संपद्यते ततो गार्हपत्याहवनीययोरन्तरालसंमितां रज्जुं षड्गुणां
सप्तगुणां वा विधाय षष्ठांशं सप्तमं वा तत्राधिकं निक्षिप्य प्रसार्य त्रिगुणीकृत्य अपरवितृतीये शंकुस्थानं ज्ञानार्थमंकयित्वा
गार्हपत्याहवनीयमध्यगतयोः शंक्वोः पाशौ प्रतिमुच्य गार्हपत्यायतनाद्दक्षिणत आकृष्य अपरवितृतीयांके शंकुं निखाय
तस्मिन् शंकौ अन्यरज्जुपाशं प्रतिमुच्य षोडशांगुलानि परिमाय वृत्तं मंडलं विरचयेत् तन्मध्यशंकोश्चत्वार्यंगुलान्युत्तरतः परित्य
ज्य तत्र पूर्वापरायतां मंडलसंमितां रज्जुं निपात्य रेखामुल्लिखेत् एवं धनुषाकृति दक्षिणाग्न्यायतनं संपद्यते अथ तामेव रज्जुं प

177

गृ॰सू॰
भा॰हृ॰
१०९

रिवर्तेआहवनीयादुत्तरतः वितृतीयेनाकृष्य वितृतीयस्थाने उत्करं कुर्यात् एवं वितानं साधयित्वा तेषु पंचभूसंस्कारान्कृ

त्वा गार्हपत्यायतने औपासनाग्निं स्थापयित्वा मृन्मयेन पात्रेण गार्हपत्यैकदेशमादायाहवनीयायतने आहवनीयं प्रणयेत

ततः एवमेव दक्षिणाग्निरवरे दक्षिणाग्निं आहवनीयस्य दक्षिणतो ब्रह्मासनमास्तीर्य शूलगवेण रौद्रेण पशुनाहं यक्ष्ये तत्र मे

त्वं ब्रह्मा भवेति ब्राह्मणं प्रार्थ्य भवामीति तेनोक्तः आसने तं उपवेशय उत्तरतः प्रणीताप्रणीय पवित्रच्छेदनानि पवित्रे प्रोक्षणीपा

त्रं वज्रं अंतर्द्धानतृणं इत्येतानि पंच आसादयेत् ततः रज्जुशंकुशम्या अग्निं पुरीषाहरणं उदकं सिकताः आच्छादनवस्त्रं इत्य

ष्टौ उपकल्पयेत् ततः पवित्रे कृत्वा प्रोक्षणीः संस्कृत्य वज्रमंतर्धानतृणं च प्रोक्ष्य प्रोक्षणीं निधाय वस्त्रमादाय वेदिं मिमीते स्फ

न आहवनीयस्य दक्षिणतः प्राचीं त्र्यरत्निं पश्चिमतश्चतुररत्निं उत्तरतस्त्र्यरत्निं पूर्वतस्त्र्यरत्निं एवं परिमितां वेदिं त्रिभिः कुशैः

परिसमुह्य उत्तरतो वज्रेणोत्करं परिलिखन् तदंतके वज्रं निधाय तदुपरि वेदितृणं कृत्वा सतृणं वज्रमादाय दक्षिणहस्तेन स

व्यपाणावाधाय दक्षिणेनालभ्यते न वज्रेण पृथिवीमात्मानं वा संस्पृशन् वेद्यामुदगग्रं निधाय तदुपरि तेन प्रहृत्य पतद्येण पुरी

षमादाय वेदिं प्रेक्ष्य पुरीषमुत्करे कृत्वा पुनस्तथैव प्रहृत्य पुरीषमादाय वेदिं प्रेक्ष्य ममुं पुरीषमुत्करे करोति एवमेव द्वितीयं करोति

पुरीषकरणांते दक्षिणोत्तराभ्यां पाणिभ्यां उत्करे भिन्न्यासं करोति ततस्तृतीयं प्रहरणादि चतुर्थं कृत्वा ब्रह्मन्पूर्वं परिग्रहं परिग्रही

रामः
१०९

ष्यामित्यामंत्रितेनब्रह्मणापरिग्रहाणेत्यनुज्ञातः स्फेनवेदिंदक्षिणतः प्राचीपश्चिमतः उदीचींउत्तरतः प्राचीपरिगृह्णातिअ
थवेद्यांप्राचीस्तिस्रोलेखा उल्लिख्यअनामिकांगुष्ठाभ्यांदक्षिणाप्रभृतिभ्योलेखाभ्यः पृथक्पृथक्पुरीषमादायोत्करे प्रक्षिप्य
क्रमेणलेखाः संमृशति तत्रैतेवेदिमानादिपदार्थाः स्वयंकर्तृकाः मंत्ररहिताश्च ऋत्विगंतराभावान्समाम्नायाभावाच्च अथाह
वनीयस्यपुरस्तादुत्तरवेदिस्थानेपंचभूसंस्कारान्कृत्वापूर्वार्द्धेशंकुंनिखायद्वात्रिंशदंगुलंशम्यामादायचतुरस्रांउत्तरवेदिंश
म्यामात्रींमिमीते ततस्तथैवशम्ययाउत्तरतश्चात्वालंमिमीते तद्यथा पश्चादुदीचींशम्यानिपात्यलेखामुल्लिखेत् पुरस्तात्स्फे
नतावन्तींलेखामुल्लिख्यतथैवदक्षिणतः प्राचीमुत्तरतः प्राचींशम्यांनिपात्यरेखांउल्लिखेत् उदीचींशम्यांनिपात्य एवंचतु
रस्रशम्याप्रमाणंचात्वालंसंपद्यते ततश्चात्वालमध्येस्फ्याग्रेणप्रहृत्यपुरीषमादायउत्तरवेदौसंक्रुसमीपेप्रक्षिप्यअभिमासं
निधायपुनरेवंद्विःपरंप्रहृत्यपुरीषमादायोत्तरवेदिपुरीषप्रक्षेपातिमासान्कृत्वाचतुर्थवेलायां अभ्माचालंखात्वायावतापुरु
षेणशम्यामात्रीउत्तरवेदिः ऊर्ध्वापूर्यतेतावत्पुरीषाहरणेनचात्वालादादायप्रक्षिपेत् एवमुत्तरवेदिंचयित्वामध्येप्रादेशमात्रींच
तुरस्रांनाभिंकृत्वाप्रोक्षणीभिः प्रोक्ष्यसिकतामुपकीर्यवाससाच्छादयति अथगार्हपत्येपूर्णाहुतिवदाज्यंसंस्कृत्यस्रुचेगृहीतं
गृहीत्वाआज्यप्रोक्षणपाहवनीयसोपयमनीकाधिश्रितेध्मस्याग्नीत्तुद्यम्यउत्तरवेदिसमीपंगत्वा पुरस्तात्पश्चाद्दक्षिणतउत्तरतश्चान्ते

रवेदिंप्रोक्षणीभिःप्रोक्ष्यप्रोक्षणीशेषमुत्तरवेदेःआग्नेयकोणसमीपेवहिर्वेदींनिनीयपंचगृहीतेननाभिंआघारयतिकोणे हिरण्यं
पश्यपन्नूपयथापूर्वंदक्षिणस्यांस्त्रक्त्यांआघार्योत्तरापरस्यांततोदक्षिणापरस्यांततःपूर्वोत्तरस्यांमध्येवाघार्यशेषमाज्यंस्तुवमुद्य
म्यार्ध्वमुक्षिपति ततोनाभिंपैतुदारवैःपरिधिःपरिदधाति यथा प्रथमंउदगग्रेणपश्चिमतःततःप्रागग्रेणदक्षिणतःततःप्रा
गग्रेणोत्तरतःततोनाभिमध्येगुल्गुलसुगंधितेजनंवृष्णस्तुकाःशीर्षघ्नाःअभावेन्यानिदधाति तदुपरियउपयमनीगतमग्निं
स्थापयतिउपयमनींतत्समीपेनिवपतिचात्वालेप्रणीयमानमग्निंब्रह्मानुगच्छति ततोयजमानःप्रणीताउत्तरवेदेःउत्तरेणकु
शासनेप्रणीयाहवनीयंपरिस्तीर्यगार्हपत्यंचपात्राण्यासादयति आज्यस्थालीसमार्गकुशाःसन्नहनावच्छादनानिपरिधयःउ
पयमनकुशाःसमिधःस्तुवःआज्यंवपाश्रपण्यौचरुस्थालीशूलंउखातंडुलाःदक्षिणार्थंतुल्यवयागौश्चेति उपकल्पनीया
नुपकल्पयति वहिप्लक्षशाखापलाशशाखात्रिगुणरशनाउपाकरणत्रिणंद्विगुणरशनागोपशुःअसिःपात्रेजनिःदृषिहिर
ण्यशकलानिषट् पलाशपत्राणिचेति ततःआसादनक्रमेणपात्राणिप्रोक्षतिरुद्रायत्वाजुष्टंप्रोक्षामीतितंडुलान्प्रोक्षतिआज्य
स्थाल्यामाज्यनिरूप्यगार्हपत्येऽधिश्रित्यपर्यग्निंकुर्यात् ततोवेदिंमध्येसंग्रहीतां अभ्यारवात्वाब्रह्मानुतरंपरिग्रहं परिग्रहीष्यामी
तिब्रह्माणमामंत्र्यपरिगृहाणमेतितेनअनुज्ञातपूर्ववत्स्फेनदक्षिणपश्चिमोत्तरतोवेदिंपरिगृह्यानुमार्ष्टिआहवनीयमप

रेणप्रोक्षणीरासाद्यप्रणीतोदकेनपाणीअवनिज्यप्रणीतानांपश्चिमतःप्रागग्रंस्फ्यंनिधायतदुपरिइध्माबर्हिषीआसाद
यतिततस्स्रुवंप्रथमंसंमृज्याभ्युक्ष्यपुनःप्रतप्यनिदध्यात् आज्यमुद्वास्यप्रोक्षणीनामपरेणाकृत्वाउत्पूयावेक्ष्यप्रोक्षणीरुत्पू
यवेदिंप्रोक्ष्यबर्हिश्चप्रोक्ष्यप्रोक्षण्येकदेशेनबर्हिर्मूलानिसिक्त्वाबर्हिर्विस्रस्यसंनहनंचविस्रस्यदक्षिणस्यांवेदिश्रोणौनि
धायसंहननाच्छादनेरवच्छाद्यवेदिंस्तृणाति तद्यथा बर्हिःपूलकंत्रिधाविभज्यप्रथमंभागंदक्षिणेनोत्थाप्याङ्केकृत्वाहिद्वि
तीयंभागंदक्षिणेनोत्थाप्यितंसव्येनसंगृह्यअङ्कस्थितंप्रथमभागंदक्षिणेनादायवेद्यांस्तृणन्नुदक्संस्थंतथैवतृतीयंभा
गंगृहीत्वाअङ्केकृत्वासव्यस्थितंदक्षिणेनादायअङ्कगतंसव्येनसंगृह्यपूर्वस्तृतबर्हिर्मूलानिद्वितीयबर्हिर्भागाग्रैश्छादयन्स्तृ
त्वातृतीयभागंदक्षिणेनादायस्फ्योपग्रहेणतथैवस्तृणाति पश्चादपवर्गंततउपरिस्रस्तशाखास्तृणाति अथाहवनीयंक
ल्पयति ततोमध्यमदक्षिणोत्तरान्परिधीन् आहवनीयेपरिधायआहवनीयमवेक्ष्य अग्रेणाहवनीयंपरीत्यपलाशशा
खांनिखनतिततोत्रिगुणरशनयात्रिःपरिव्ययति तत्रशकलमुपगूहतिरुद्रायत्वोपाकरोमीत्युपाकरणंतृणेनपशुमुपा
करोतिततोद्विगुणरशनयांतराशृंगंपशुंबध्वारुद्रायनियुनज्मीतिसांखायांनियुनक्ति अथरुद्रायत्वाजुष्टंप्रोक्षामीतिपशुं
प्रोक्षणीभिःप्रोक्ष्यशेषंआस्यउपगृह्यअधस्तादुपोक्षतिततउपयमनकुशानादायसमिधौअभ्याधायप्रोक्षणीभिःपर्युक्ष्यपूर्वाघार

181

माचार्यउन्नरां नेमुवाग्रेणललाटंसश्रोणिपुपशुंसमानक्ति ततः चालालेस्ववेसिभ्मांपशोर्लेलाटमुपस्पृशति स्वरूपमवगृह्य
असिंएकतः घृतेनाभ्यज्यनिदधात् अथाहवनीयस्योत्तरतः स्फेनशामित्रायपरिलिख्यआहवनीयस्योल्मुकेनपश्चाज्यशा
मित्रदेशाशास्वाचालालाहवनी यानुपर्यग्निंकुर्यात्रिःउल्मुकमाहवनीयेप्रक्षिप्यनावत्प्रतिगच्छेत् पुनराहवनीयादुल्मु
कमादायपशुंकृच्छ्रेवध्यावपाश्रपणीभ्यामन्वारभ्यउदग्गच्छेत् तत्रवेदित्तृणद्वयमादायशामित्रेउल्मुकंनिधायशामित्रस्य
पश्चात् एकंतृणंआस्तीर्यतत्रपशुंप्राक्शिरसंप्रत्यक्शिरसंवाउदक्पादंनिपात्यअवाश्यमानंमुखंसंगृह्यतमनेनशामि
त्रेणसंज्ञपयतिसत्यन्यस्मिन्पुरुषे शमितरियजमानआहवनीयंप्रत्येत्यपूर्णाहुतिवदाज्यंसंस्कृत्यस्वाहादेवेभ्यइत्येकामा
हुतींआहवनीयेहुत्वासंज्ञप्तेपशौदेवेभ्यः स्वाहेतितेनेवाज्येनअपरांहुत्वा तूष्णीमपराः पंचजुहोति अथवपाश्रपणी
भ्यांनियोजनीयंचत्वालेप्राश्यपांनेजनीभिः पशोः प्राणशोधनंस्वयमेवकरोति यथामुखंनासिकेचक्षुषीद्वेकर्णौद्वौना
भिंमेढ्रंपायुंसंहत्यपादान्एकैकंपात्रेजनीजलेनस्पृशतिशेषेणशिरःप्रभृतिमुखनासिकेप्रभृतिकर्णपर्यंतंपुनस्तथे
वाप्याय्यततोंगानिनिषिच्यशेषंपशोःपश्चाद्भागेनिषिंचति ततउत्तानंपशुंकृत्वानाभ्यग्रेतृणंनिधायप्रज्ञातयासिधारया
भिधायतृणांतंचच्छित्वातृणमूलेउभयतोलोहितेनाङ्क्त्वातृणंभूमौनिरस्यतदुपरिस्वयंपादौकृत्वापुनरागत्योपविश्यवपामुत्खिद्य

पाश्रणीभ्यांप्रोर्णूर्यस्थित्वाऽऽज्येनाभिघार्यप्रशास्यपशुंविशास्तिहृदयादीनिसर्वाणित्रीणिवापंचवायथाकामंअवदानान्यवद्य
जाघनींचावद्यप्लक्षेउपस्थाप्यमवधायलोहितंचावधायचरौतंडुलानोप्यवपांशामित्रेप्रतप्य आहवनीयस्योत्तरतःस्थित्वाऽऽह
वनीयेपचप्रतप्यशाखयोरंतरेणाहृत्यदक्षिणतःस्थित्वास्रुवेणाज्येनाभिघारयन्श्रपयति गार्हपत्येस्थालीपाकंशामित्रेहृदयादी
निअवदानानिचरुंच तत्रहृदयंशूलेचरुंपर्यग्निंकृत्वावपामभिघारयति श्रथत्रिः प्रच्युतेपशौहृदंउपरिकृत्वापृषदाज्येनहृद
याभिघार्यइतराण्यवदानान्याज्येनसर्वाणिचत्र्यंगवर्जमभिघार्यस्थालीपाकमुद्वास्यअनंतरमुखावपाया अंगानांचप्राप्यादानं
कृत्वावपादीनिक्रमेणसाद्यश्रंगानिशाखयोरंतरेणाहृत्यसवेद्यामासाद्यवपामवदानानिचालभ्यब्रह्मणान्वारब्धआज्यभागौहु
त्वावपाहोमायस्रुवेआज्यमुपस्तीर्यहिरण्यशकलमवधायवपांगृहीत्वापुनर्हिरण्यशकलंदत्वाह्यभिघार्यरुद्रायस्वाहेतिवपां
जुहोति वपाश्रपण्यौचाग्नौपास्यति ततउत्थाप्यवसांगृहीत्वा अंतरिक्षायस्वाहेतिजुहुयात् अथावदानहोमार्थंस्रुवेउपस्तीर्य
हिरण्यशकलमवधायहृदयाद्यंगेभ्यः प्रत्येकंद्विर्द्विरवदायावदायस्रुवेक्षिप्त्वास्थालीपाकाच्चसकृदवदायक्षिप्त्वाउपरिहि
रण्यशकलंदत्वासकृदभिघार्यअसर्वाणिचेत्स्नाताभ्यंगंकृत्वाअग्नयेस्वाहेतिजुहोति एवंपुनःस्रुवेउपस्तरणाहिरण्यशकलावधा
नद्विर्द्विरवदानग्रहणसकृत्स्थालीपाकावदानहिरण्यशकलावदानानिधारणानिकृत्वारुद्रायसर्वायपशुपतयेउग्रायअशन

गृ·सू
भा·ह
११२

यभवायमहादेवायईशानायेत्यैतैर्नामभिर्मंत्रैःस्वाहाकारांतैरेकैकस्मैजुहोति एवंनवप्रधानहोमाःसंपद्यंते ततःपृषदाज्येनवनस्प
तयेस्वाहेतिहोमंविधायस्विष्टकृद्धोमार्थंस्रुवमुपस्तीर्यहिरण्यशकलंदत्वासर्वावदानपक्षेत्र्यंगेभ्योद्विर्द्विरवदाय असर्वावदान
पक्षेतेभ्यएवप्रधानार्थेभ्योद्विर्द्विरवदायसकृच्चरोरवदायहिरण्यशकलमवधायद्विरभिघार्याग्नयेस्विष्टकृतेस्वाहेत्यग्नेयपहत्त
रप्रदेशेजुहुयात् ततःस्रुवेणावसांगृहीत्वाहवनीयस्यपुरस्तात्दिशःस्वाहा इदंदिग्भ्यःदक्षिणतःप्रदिशःस्वाहाइदंप्रदिग्भ्यः
पश्चिमतःआदिशःस्वाहा इदमादिग्भ्यःउत्तरतःविदिशःस्वाहाइदंविदिग्भ्यःमध्यतःउद्दिशःस्वाहाइदमुद्दिग्भ्यःजांघनींगृही
त्वागार्हपत्यंप्रत्येत्यजाघन्याःस्रुवेणावदायावदायइंद्राण्यैस्वाहाइदमिन्द्राण्यै रुद्राण्यैस्वाहा इदंरुद्राण्यैशर्वाण्यैस्वाहाइदं
शर्वाण्यैभवान्यैस्वाहा इदंभवान्यै अग्नयेगृहपतयेस्वाहा इदमग्नयेगृहपतये एताःपंचपत्नीसंयाजाहुतीर्जुहुयात् ततःआ
हवनीयेमहाव्याहृत्यादिप्राजापत्यहोमांतेसंस्रवप्राशनानंतरं शूलगवपशुनातुल्यवयस्कंगांब्रह्मणेदक्षिणांदद्यात्तत
तःपलाशपत्रेषुषट्सुमांसकंसेषुउदककंसेषुवा पशुलोहितेन यास्तेरुद्रपुरस्तात्सेनास्ताभ्यएषबलिस्ताभ्यस्तेनमःइदंरुद्राय
सेनाभ्यइतिसर्वबलिषुत्यागःएवं यास्तेरुद्रदक्षिणतःसेनास्ताभ्यएषबलिस्ताभ्यस्तेनमःइदंरुद्रायसेनाभ्यःयास्तेरुद्रपश्चा
त्सेनास्ताभ्यएषबलिस्ताभ्यस्तेनमःइदंरुद्रायसेनाभ्यःयास्तेरुद्रोत्तरतःसेनास्ताभ्यएषबलिस्ताभ्यस्तेनमःइदंरुद्रायसेनाभ्यः

रामः
११२

184

याास्ते रुद्रोपरिष्टात्सेनास्ताभ्य एष बलिस्ताभ्यस्तेनमः इदं रुद्राय सेनाभ्यः यास्ते रुद्राधस्तात्सेनास्ताभ्य एष बलिस्ता
भ्यस्तेनमः इदं रुद्राय सेनाभ्यः ऊवध्यस्य लोहितलिप्तस्याग्नौ प्रक्षेपः अधोनिखननं वा कृत्वा अनुवातं पशुमवस्थाप्य रुद्राध्या
येननमस्तइत्यादिना प्रथमोत्तमाभ्यां वानुवाकाभ्यां रुद्रानुपस्थाप उदकमुपस्पृशेत् एतस्य पशोर्मांसं ग्राममनानयेत् समाप्तः शूलगवः
अथ गोयज्ञपद्धतिः तत्र विहितमात्र पूजाभ्युदयिकः स्वर्गपशुपुत्रधनयशआयुर्बलफलानामन्यतमफलकामः औपासनमर
ण्यं नीत्वा तत्र परिसमूहनादिभिः संस्कृतायां भूमौ स्थापयेत् ततो ब्रह्मोपवेशनांते विशेषः सक्षीरं प्रणयनं कृत्वा पायसं श्रपयि
त्वा आज्यभागाविष्ट्वा शूलगवदेवताभ्य अग्निरुद्रसर्वपशुपत्युग्राशनिभवमहादेवेभ्यो नमोभ्यः स्वाहाकारांतैर्नामभिश्चतुर्थ्यंतैर्नव
भिर्मंत्रैः पायसेन प्रत्येकं जुहुयात् ततः स्विष्टकृदादि प्राजापत्यहोमांते संस्रवं प्राश्य पूर्णपात्रवरयोरन्यतरं ब्रह्मणे दद्यात्
इति गोयज्ञपद्धतिः अथ वृषोत्सर्गः अथ शूलगवानंतरं वृषोत्सर्गः वृषस्य वक्ष्यमाणलक्षणस्य उत्सर्गः उत्सर्जनं व्याख्यास्य
ते स च कामाधिकारात् फलस्यवानभिधानात् किं विश्वजिन्न्यायेन स्वर्गः फलं कल्प्यते उत पूर्वोक्त शूलगवानंतरमभिधाना
त्तत्फलमिति संदेहः तत्र विश्वजिन्न्यायस्य सर्वथाश्रुतफलकर्मविषयत्वात् नात्र प्रवृत्तिः कुतः सन्निधिश्रुतस्य शूलगवफ
लस्य स्वर्गादेरिवान्वययोग्यत्वात् तस्मात् अयमपि पशुः स्वर्गपशुपुत्रधनयशआयुष्कामस्यैवेत्यभिप्रेत्याह गोयज्ञेनज्ञा

गृ·सू·
भा·हृ·
११३

ख्यातःसचगोयज्ञेनगवारौद्रेणपशुनायज्ञःगोयज्ञःतेनव्याख्यातःगोयज्ञफलेनेतिकर्त्तव्यतामित्यर्थःततश्चास्मिन्नपि
स्वर्गपशुपुत्रधनयशआयुष्कामस्याधिकारःसकृदाकर्त्तव्यइत्यपेक्षायामाहकार्त्तिक्यांपौर्णमास्यांरेवत्यांवाश्वयुजस्य
कार्त्तिक्यांपौर्णमास्यांआश्विनस्यरेवत्यांरेवतीनक्षत्रेवाकर्त्तव्यःशास्त्रान्तरात्तुचैत्र्यामाश्वयुज्यांवामध्येगवांसुसमिद्धमग्निं
कृत्वाज्यंसंस्कृत्येहरतिषट्जुहोतिप्रतिमंत्रंमध्येगवंगोष्ठेपंचभूसंस्कारपूर्वकंआवसथ्याग्निंसुसमिद्धंप्रज्वलितंकृत्वा
आज्यसंस्कारेणानंतरंपर्युक्षणांतेइहरतिरित्यादिभिःवन्हिमंत्रैःप्रतिमंत्रंषडाज्याहुतीर्जुहोति अत्रमध्येगवामितिदेशवि
शेषनियमानुविधानात्देशांतरस्येहयागानंगत्वंपूषागाअन्वेतुनःपूषारक्षतुसर्वतःपूषावाजंसनोतुनःस्वाहेतिपौष्णस्यजु
होतिपूषादेवतास्येति पौष्णःचरुःतस्यपूषागाइत्यादिमंत्रेणजुहोतिहोमसंख्यानभिधानात्सकृत्श्रपणानुपदेशात्सिद्धए
वापादीयतेअयंपौष्णःचरुःपिष्टमयोभवतिकुतःतस्माद्धिपूष्णेचरुंकुर्वंतिप्रपिष्टानामेवकुत्तःश्रुतेःरुद्रान्जपित्वैकवर्णोद्विव
र्णोवायोवायूथंछादयतियंवायूथंछादयेद्रोहितोवैवस्यात्सर्वांगैरुपेतोजीववत्सायाःपयस्विन्याःपुत्रोयूथेचरूपस्विन्तमःस्या
त्तमलंकृत्ययूथमुख्याचतस्रोवत्सतर्यस्ताश्चालंकृत्यैनंयुवानंपतिंवोददामितेनक्रीडंतीश्चरथप्रियेणमानःसाप्तजनुषसु
भगारायस्पोषेणसमिषामदेमेत्येतयैवोत्सृजेरन् रुद्रान्नमस्तइत्यध्यायाम्नातांजपित्वाजपधर्मेणपठित्वाअत्रमूलगवामितिदेश

राम:
११३

186

प्राप्नोपिरुद्रजपविधिः प्रथमोत्र मानुवाकजपविकल्पनिवृत्त्यर्थः जपावसरज्ञापनार्थो वा तन्न अपूर्वश्चायं जपस्तेनाप्राप्त

त्वात् अहूतो लोहि रुद्राणांगमुपस्थानेकरणत्वेन विहितत्वात् एक एव शुक्लादिवर्णरूपं यस्य स एकवर्णः तं अथवा द्वौ वर्णौ यस्य

स द्विवर्णः तं वृषवर्णविशेषनियममभिधाय अथ वृषस्य परिमाणविशेषनियममाह यो वृषः यूथं कृष्णवर्गं छादयति स्वपरिमाणे

न अधः करोति वा यं वृषं यूथवर्गः छादयेत् अधः करोति तं वा यूथादधिकपरिमाणं वा न्यूनपरिमाणं वेत्यर्थः रोहितः लोहितः

लोहितो वा एव स्यात् एकारेण लोहितस्य एकवर्णद्विवर्णाभ्यां प्राशस्त्यमुच्यते पुनः कीदृक् सर्वैः अंगैः उपेतः समन्वितः न पुनः

हीनांगः अधिकांगो वा तथा जीवाः प्राणन्तो वत्सा प्रसूतिर्यस्याः सा जीववत्सा न स्यात् गौः तथा पयः बहु क्षीरं विद्यते यस्याः सा पय

स्विनी तस्याः बहुक्षीराया इत्यर्थः तथा यूथवर्गविषये रूपमस्यास्तीति रूपस्वी अतिशयेन रूपस्वी तमः वृषः स्यात् तं उक्तगु

णविशिष्टं च वृषं अलंकृत्य वस्त्रमालानुरूपहेमपादिकाग्रैवेयकघंटादिभिर्वृषोचितभूषणैः भूषयित्वा न केवलं वृषमलंकृ

त्य नाश्च वत्सतरीः अलंकृत्यालंकृताः कार्या यूथे सत्वर्गे मुख्या गुणैः श्रेष्ठा वत्सतर्यः कति च नस्त्रः चतुः संख्योपेताः एतं युवा

नमित्येतत् पर्यन्तं उत्सृजेरन् उत्सृजेयुः न भ्यस्तमभिमंत्रयते मयो भूरित्यनुवाकशेषेण नाभ्यस्थं वत्सतरीणां मध्ये तिष्ठंतं अभिमंत्र

यते आभिमुख्येन मंत्रयते मंत्रैः स्तौतीति केन मयो भूरभिमावाहि स्वाहेत्यारभ्य स्वर्णे सूर्यः स्वाहेत्यन्तं तेन अनुवाकशेषेण अ

थपायसप्राशनंनामांतरंकर्मसर्वासांपयसिपायसंश्रपयित्वाब्राह्मणान्भोजयेत्यस्यपावंतोगावःदोग्ध्र्यःसंतिसः तासां
सर्वासांपयसिदुग्धेपायसंश्रपयित्वासाधयित्वाब्राह्मणान्त्रिभसृतोन्यथाशक्तिभोजयेत्तर्पयेत् पशुमप्येकेकुर्वंति तस्य
शूलगवेनकल्पोआख्यातः एकेआचार्याः पशुमपिछागंचकुर्वंतिआलभंतेउक्तविधिनापायसश्रपणपूर्वकंब्राह्मणान्भो
भोजयंतितस्यपशोःशूलगवेनशूलगवाख्येनकर्मणाकल्पःइतिकर्त्तव्यताकलापोआख्यातःकथितःइतिसूत्रार्थः अ
थप्रयोगः तत्रस्वर्गादीनामन्यतमफलकामः कार्त्तिक्यांपौर्णमास्यांआश्वयुजस्यरेवत्यांवाशास्त्रांतरात्चैत्र्यांआश्वयुज्यां
वामातृपूजापूर्वकमाभ्युदयिकंकृत्वागोष्ठेगवांमध्येपंचभूसंस्कारान्कृत्वाआवसथ्याग्निंस्थापयेत् प्रणीताप्रणयनेप्र
णीतापात्रस्यमध्येपिष्टादिनाअंतर्धानंविधायमूलदेशेपयःइतरत्रजलंप्रक्षिप्यप्रणयेत् तंडुलानंतरंपोक्षमपिष्टचरुंसि
द्धमासादयेत्प्रणीतेनपयसापायसंश्रपयेत् पर्युक्षणांतेसुसमिद्धेग्नौइहरतिःस्वाहाइदमग्नयेइहरमध्वंस्वाहाइदमग्नये
इहधृतिःस्वाहाइदमग्नयेइहस्वधृतिःस्वाहा इदमग्नयेरायस्पोषमस्मासुदीधरत्स्वाहाइदमग्नयेइतित्यागसहिताःषडा
ज्याहुतीर्जुहोतिततआघारावाज्यभागौतेपायसेनशूलगवदेवताभ्योग्न्यादिभ्यःईशानांतेभ्यःपायसेननवाहुतीर्हुत्वापि
ष्टकचरोःपूषागाअन्वेतुनःपूषारक्षतुसर्वतः पूषावाजांसनोतुनःस्वाहेतिमंत्रेणएकामाहुतिंहुत्वाइदंपूष्णइतित्या

गंविधायपायसपोष्णाभ्यांस्विष्टकृतेहुत्वामहाव्याहृत्यादिहोमसंस्रवप्राशनांतेपूर्णपात्रवरयोरन्यतरंब्रह्मणेदद्यात्अ
थनमस्तेरुद्रमन्यवइत्याख्यायासमाप्तेःरुद्राञ्जपित्वाएकवर्णादिगुणविशिष्टंवृषभंचतसृभिर्वत्सतरीभिःसहितंवस्त्रमाल
हेमालंकारादिभिरलंकृतंएतंयुवानंपतिंवोददामितेनक्रीडंतीश्चरथप्रियेणमानःसाप्तजनुषासुभगारायस्पोषेणसमि
षामदेमतेएतयाऋचाउत्सृजेरनंततोवत्सतरीमध्यस्थंवृषभंमयोभूरभिमावाहिस्वाहेत्यारभ्यवरुणःसूर्यःस्वाहेत्यंतेनअनुवा
केशेषेणअभिमंत्रयतेइतिवृषोत्सर्गःअत्रपत्न्येतत्कृत्यंतदन्योक्तंलिख्यतेनत्रप्रेतपित्रादिगतनानाविधसमुचितस्वर्गा
दिफलकामस्यस्वर्गतपुराणातिशयाशोकमोक्षगतिकामस्यवाधिकारःतत्रप्रथमसंवत्सराभ्यंतरेकृतसपिंडीकरणस्यच
मातृस्थापनपूजनश्राद्धानिभवंतिसूतकांतेद्वितीयमहरेवापरंतस्यवृषोत्सर्गकालःनकार्तिकादिःप्रथमसंवत्सरेकाम्य
कर्माभ्युदयिकयोरनधिकारात्उक्तंतःतच्चैवकाम्यंयत्कर्मवत्सरात्प्रथमादृतइतिवचनात्सूतकांतेद्वितीयेह्निइतिवचनेनैव
वकाम्यंयत्कर्मेतिवचनंबाधित्वैवप्रवर्ततेइतिअनन्यविषयत्वात्कार्तिकादितुसंवत्सरोत्तरकालीनकार्तिकादिषुसंकोचअन
याबाधापेक्षत्वाभ्यांवैषम्यापत्तेःततश्चसंवत्सरानंतरंकार्तिकादौपित्रादिगतनानाविधित्वश्राद्धादिक्रमेणक्रियमाणोवृषोत्स
र्गोमातृस्थापनपूजनश्राद्धपूर्वकएवकर्तव्यःतस्यचकार्तिकीचैत्रीआश्वयुजीरेवत्यांकालःअथफलश्रुतिःउत्सृष्टोवृषभोयस्मिन्

189

६ दि

गृ॰सू॰
भा॰ह॰
११५

वन्पथजलाशयेश्रृंगेणोल्लिखतेभूमौयत्रक्वचनदर्पितःपितॄणामन्नपानंतत्प्रभूतिमुपतिष्ठतेवृषोत्सगोहृतेनान्यत्पुराण मस्ति
महीनलेतथावृषभस्यतुशब्देनपितरःसपितामहाःआवर्त्तेमानाहृश्यंतेस्वर्गलोकेनसंशयःजलेप्रक्षिप्यलांगूलंततोयंयेयोद्धृ
तिवृषःदशवर्षसहस्राणिपितरस्तेनतर्पिताःकूलेसमुद्धृतायावच्छृंगेणतिष्ठतिमृत्तिका भक्ष्यभोज्यमयैःशैलैःपितरस्तेनतर्पिताःप
र्वांमध्येयदाचैववृषभःक्रीडतेतुयत् अप्सरोघसहस्रेणक्रीडंतिपितरस्ततःलांगूलमुद्यम्ययावत्तोयेषुक्रीडतेतुसःअप्सरोगणसं
घैश्चक्रीडंतिपितरःसदा सहस्ररत्नपात्रेणकनकेनयथाविधि नतृप्तिस्तुयापितॄणांवैसावृषेणसमोद्यते एतानिचार्थवादकफ
लानिसमुदितान्येवाकामनाविषयःअथवृषस्वरूपंजीववत्सायाःपयस्विन्याःपुत्रमुखपुच्छपादेषुसर्वश्रुक्लःनीलोलोहितोवा
वृषःतथाउन्नतस्कंधककुद्मान्मृदुलांगूलभूषणःमहाकटितटस्कंधोवैडूर्यमणिलोचनःप्रवालगर्भशृंगाग्रसुदीर्घऋ
जुवालधिःनवाष्टदशसंख्यैस्तुतीक्ष्णाग्रैर्दशनैःशुभैःमल्लिकाख्यश्चमोक्तव्यस्तथावर्णास्तुताम्रकःकपिलोवृषभःश्रेष्ठोब्रा
ह्मणस्यप्रशस्यते श्वेतोरक्तश्चकृष्णश्चगौरःपाटलएवच तथा पृथुकर्णोमहास्कंधःसूक्ष्मरोमाचयोभवेत् रक्ताख्यःकपिलो
यश्चरक्तशृंगगलोभवेत् श्वेतोदरःकृष्णपृष्ठोब्राह्मणस्यप्रशस्यते स्निग्धवर्णेनरक्तेनक्षत्रियस्यप्रचक्षते कांचनाभेनवैश्यस्य
कृष्णःशूद्रस्यशस्यते यस्यप्रागायतेशृंगेश्चमुखाभिमुखेसदासर्वेषामेववर्णानांसचसर्वार्थसाधकः तथा मार्जारपादकपिलःत

राम:
११५

स्तेषु वनेषु अनेन प्रियेण पत्या सह चरथ स्वच्छन्दं भ्रमथ चरन्तः तृणानि स्वादयथ तिवा चरगतिभक्षणायोः नो स्माकं गृहे षु सा पन्नजन्म
षा सप्तजन्मपर्यन्तं असुभगा मा चरथ किं च युष्मत्प्रसादात् अयस्योषेण धनपुष्ट्याद्युषा अन्नेन च संमदेम संमद्य क्त्तवः तृप्येमेति द्रत्वाशं
सानदुक्ता नतः प्रमुदिता स्तेन वृषेण च समन्विताः वनेषु गावः क्रीडन्ति वृषोत्सर्गः प्रसिद्धिततो वत्सतरी मध्यस्थं मंत्रयते मयो
भूरित्यनुवाक शेषेण ततो यवतिलयुतं जलं पित्रादिभ्यः पितृतीर्थेन दद्यादनेन मंत्रेण स्वधा पितृभ्यो मातृभ्यो बंधुभ्यश्चापितृ
तये मातृपक्षाश्च ये केचित्ये चान्ये पितृपक्षजाः गुरुश्वशुर बंधूनां ये कुलेषु समुद्भवाः ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जि
ताः वृषोत्सर्गेण ते सर्वे लभंतां तृप्तिमुत्तमां दद्यादनेन मंत्रेण तिलाक्षतयुतं जलं उत्सृष्टो नोपयुंजीत स्वामी वान्यो पि मानवः इ
ति यथा वापीकूपतडागादौ उत्सर्गे कृते परिस्मिंश्च स्वीकारिते निरिष्टिके तज्जलगोचरतया सर्वेषामोपादानिकत्वं भवति
न त्वेहापि सक्तानां वृषादीनां केनचिदप्यस्वीकृतानां निरिष्टिकानामोपादानिकं स्वत्वं कृतो न भवती त्याह न वाह्य इति न च तत्स्वी
कृतं पानं केन चित्क्वचित् न वाह्यो सो वृषश्चैषां तेगोमूत्रगोमये ततश्च यथेष्टविनियोगनिषेधात्मके श्लोके न किंचिदप्युपा
दानं कार्यं औपादानिकस्वत्वानंतरं विक्रीय कपर्दकादानमेवास्त्विति चेत् न नु वाह्य इत्यस्य विनियोगमात्रोपलक्षणत्वात्
विक्रयस्यापि यथेष्टविनियोगरूपत्वात् किं तु गोपशुविक्रयस्य निषेधः श्रुते कथं तदर्थमुपादानं उल्लंघितमर्यादो विक्र

यं करोति चेत् न स्यात्स्वच्छं खल्वेतेन हेयत्वात् शास्त्रानधिकृत्य शास्त्रप्रवृत्तेः संकल्पविरोधाच्च तर्ह्यनेन प्रियेणावनेषु नवच्छिन्नका
लं चरन्त्वेति संकल्पः ननु परोपेतं गोवलीवर्द्दरूपं मुचतामिति संकल्पः वापीकूपादौ नु सर्वभूतानि स्नानपानावगाहनादीनिय
थेष्टमिह कुर्वन्त्वनेन संकल्पः यदपि नु वत्सतरीणामपत्यानि केन चित्तु पादाय दोह्यन्ते नेदानदोषः तत्पर्यन्तं दोहनवाहननि
षेधवाक्यस्य तात्पर्यात् भवेद्वचनमिति न्यायात् अथ पायसप्राशनं नाम कर्मानन्तरं प्रकरणोक्तात्स्वर्गाद्यन्यतमकामस्याभि
धीयते नत्र कालविशेषानभिधानात् प्रकृतोत्सर्गकाल एव गृह्यते तेन तस्य वृषोत्सर्गविहितकार्तिक्याद्यन्यतमसमये मातृपूजा
भ्युदयिकपूर्वकमावसथ्याग्नौ स्वकीयानां सर्वासां दोग्ध्रीणां गवां पय आदाय तस्मिन्पयसि तंडुलान्प्रक्षिप्य पायसं श्रपयित्वा
त्रिमधुरं तान्यथाशक्ति यथासंभवं ब्राह्मणान्भोजयेत् अथवा शूलगवविधिना छागं पशुं चकायीत् इति पायसश्रपणं ए
ष वृषोत्सर्गविधिः स्वर्गादिकामस्योपासनाग्नौ साग्नेर्भवति यः पुनः प्रेतगतः स्वर्गादिफलस्य साधनभूतो ब्राह्मणादीनां
वर्णानां एकादशत्र्योदशवा षोडशैकत्रिंशत्तमेषु वृषोत्सर्गः स्मृत्यन्तरे विहितः तत्रापि द्विजातीनां साग्निनिरग्नी
नां का एव माध्यन्दिनीयशाखानुसारिणां लौकिकाग्निनानेनैव विधिना मातृपूजाभ्युदयिकश्राद्धरहितः कर्त्ता भवति
प्रेतस्य सपिंडीनां प्रथमेऽब्दे काम्याभ्युदयिकयोर्निषेधात् शूद्रस्य तु मंत्रवर्जं क्रियामात्रं निरग्नीनां तु स्वर्गादिकामानां

७४

कार्त्तिक्यान्यद्वान्यतमकालेलौकिकाग्नौकर्त्तव्योभवतीतिशेषः अत्रकेचिदाहुःएकादशेन्हिसंप्राप्तेयस्यनोत्सृज्यतेवृषः
प्रेतत्वंहिस्थिरंतस्यदत्तैःश्राद्धशतैरपीत्यादिस्मृतिवचनात्क्षत्रियवैश्यशूद्रैरपिएकादशाहएवअशौचमध्येनियतका
लीनत्वात्वृषोत्सर्गःकर्त्तव्यइतितदयुक्तंअत्रप्रकरणेएकादशाहद्वादशाहादिशब्दाःअशौचसत्वकांतकालोपलक्षकाःअ
न्यथाअहन्येकादशेनामनथा आनंत्यात्कुलधर्माणांमानुषश्च परिक्षयात्अस्थितेश्चशरीरस्यद्वादशाहःप्रशस्यतेइत्यादि
भिर्वचनैर्नामकरणसपिंडनादिक्रियासुक्षत्रियादीनांत्रयोदशेषोडशेएकत्रिंशत्तमेदिनेभवतितस्मादेकादशाहइत्यादिशब्दाः
सूतकांतमुपलक्षयंति अथोदककर्म अथपुरुषसंस्कारकर्मेक्रमप्राप्तंउदककर्मेउदकेनजलेनकर्मक्रियाअंजलिदान
मित्यर्थःव्याख्यास्यतेइतिसूत्रशेषःउपलक्षणमेतत्तेयेनआशौचादियमनियमाअपिवक्ष्यंतेअद्विवर्षेप्रेतेमातापित्रोरा
शौचंशौचमेवनेतरेषामेकरात्रंत्रिरात्रंवाद्विवर्षवयोयस्यसद्विवर्षःनद्विवर्षःतस्मिन्प्रेतेप्रकर्षेणइतोगतःप्रेतोमृतःतस्मिन्नि
मित्तेमाताचपिताचपितरौतयोःमातापित्रोःआशौचंअशुद्धिःवर्णाश्रमविहितःकर्मानुष्ठानसंकोचावस्थाइतरेषांमातापि
तृभ्यामन्येषांशौचमेवनाशुद्धिःकियंतकालंएकरात्रंएकमहोरात्रंवा अथवात्रिरात्रंअयंविकल्पःप्रेतस्यअकृतकृतचूडत्वेन
व्यवस्थितःइतरेषांसद्यःशौचमितिगृह्यकारस्यमतंस्मृत्यंतरेतुनेषामप्याशौचस्यविहितत्वात्आदंतजननात्सद्यइत्यादिनायच्च

193

गृ·सू·
भा·ह·
११८

पुंस उपनयनात्प्राक् स्त्रियाश्च विवाहात्प्राक् वयोवस्थाविशेषेण सद्यः एकरात्रत्रिरात्रादिकमाशौचमुक्तं तत्सवर्णावर्णसा
धारणं विशेषावगमस्याशक्यत्वात् शरीरमदग्ध्वा निखनंति ऊनद्विवर्षस्य प्रेतस्य शरीरं कुणपं अदग्ध्वा अग्निदाहमकृत्वा नि
खनंति गर्ते प्रक्षिपंति अंतःसूतके चेद्दोत्थानादाशौचं सूतकवत् चेद्यदि अंतर्मध्ये सूतके जननिमित्ताशौचे उत्थानात् उत्थ
नं सूतकांतं यावत् आशौचं जननाशौचांतरमापतति तदा सूतकवत् एवं मरणाशौचमध्ये यदा मरणाशौचमेवापतति तदा
पि पूर्वशेषेणैव उत्तरस्य शुद्धिः एतच्च सपिंडविषयं मातापित्रोस्तु विशेषः मातरि पूर्वं मृतायां आशौचमध्ये यदि पिता म्रियेत तत्त
दा पित्र्यमरणनिमित्ताशौचांतेऽशुद्धिः यदा पुनः पितरि मृते तदा पक्षिणं पते द्वादशप्रहारांते शुद्धिः किंच यदि सूतके रात्रिमात्राव
शिष्टे सूतकांतरमापद्यते शावे वा रात्रिमात्रावशिष्टे शावांतरमात्रावशिष्टे सूतकांतरमापद्यते शावे वा रात्रिमात्रावशिष्टे शावांतर
मापद्यते तदा द्व्यहमधिकं वर्तते यदि पुनर्याममात्रावशिष्टे सूतके शावे वा सूतकं शावं सजातीयं वापतति तदा त्र्यहमधि
कं वर्धते तथा च स्मृतिः मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता न पूर्वशेषाच्छुद्धिः स्यान्मातुः कुर्याच्च पक्षिणीं रात्रिशेषे द्व्य
हाच्छुध्येद्यामशेषे शुचिस्त्र्यहात् इति अन्ये तु इदं सूत्रं अन्यथा व्याचक्षते अंतःसूतके चेद्यदि बालस्य मरणमापद्यते तदा आ उ
त्थानात् अशौचं अशुद्धिः सूतकवद्भवति तन्नाशौचं निर्हरति अन्ये बालमरणनिमित्ताशौचस्याकालीनत्वं बहुकालीनज

एम
११८

वै

नजनेननिमित्ताशौचशोधनासमर्थत्वात् यतःसमानजातीयस्यसमानकालीनस्यैवपूर्वोत्पन्नस्यअंतरापतितस्यवा
शोधकत्वंनात्रोदककर्मअत्रऊनद्विवार्षिकेप्रेतेउदककर्मउदकांजलिदानंनभवतिद्विवर्षप्रभृतिप्रेतमाश्मशानास
र्वेनुगच्छेयुर्यमगाथांगायंतोयमसूक्तंजपंतइत्येकेद्विवर्षंवयोयस्यसद्विवर्षःतत्प्रभृतिःतदादिर्यःप्रेतःतंआश्मशानात्
श्मसानावधिसर्वेस्वपिंडाःअनुगच्छेयुःश्मशाननयनविधानाद्दाहउपलक्ष्यतेश्मशानशब्देनहिप्रेतदाहभूमिरुच्यतेतस्माद्दाह
मपिकुर्युःदाहसंनियोगशिष्टंउदकंचदद्युःएकेआचार्याःयमगाथांयमदेवत्यापाऽमृषिगीतंसामगायंतःपठंतःतथायम
सूक्तंयमदेवतानामृचांसमुदायंसूक्तशब्दवाच्यंजपंतोऽनुगच्छेयुरित्याहुःयद्युपेतोभूमिजोषणादिसमानमाहिताग्नेरोदकां
तस्यगमनात् यदिउपेतःउपनीतःप्रेतःस्यात्गृह्योक्तसंस्कारेषुतस्याधिकारात्वैतानिकस्यचमंत्रब्राह्मणकल्पसूत्रेषु
पृथक्संस्काराम्नानात् तदाभूमिजोषणादिकर्मसमंतुल्यंकेनआहिताग्नेःकर्मणायथाआहिताग्नेःऔपासनिकस्याग्नि
पर्यंतंआउदकंतस्यउदकसमीपस्यगमनात्एतदुक्तंभवतियद्युपनीतःप्रेतोभवतितदायथाहिताग्नेर्भूमिजोषणादिउ
दकांजलिदानपर्यंतंकर्मतथैवकुर्यात्शालाग्निनादहंतेनमाहितश्चेत्चेद्यदिअसौप्रेतःआहितःकृतावसथ्याधा
नःस्यात्तदाएनंप्रेतंशालाग्निनाऔपासनेनदहनेनदहंतिपुत्रादयःतूष्णींग्रामाग्निनेतरंतूष्णींमंत्रवर्जंग्रामाग्निनालौकिके

८

नपावकेनइतरमकृतावसथ्याधानंदहंतीत्यनुषंगः संयुक्तंमैथुनंचोदकंयाचेरन्नुदकंकरिष्यामहइतिसंयुक्तंकेनचित्संयो
नेनसंबंधेनसंबंधोमैथुनः एकदेशलक्षणयामैथुनशब्दवाच्याःयाभार्यायाःभ्रातारःश्यालाइत्यर्थः तंवाउदकंजलंयाचेरन्प्रा
र्थयेरन्उदकंकरिष्यामहइत्यनेनमंत्रेणकुरुध्वंमाचैवंपुनरित्यशतवर्षेप्रेतेएवंएष्टः संयुक्तःश्यालोवाप्रतिब्रूयात्किंकुरुध्वं
क्वअशतवर्षेप्रेतेशतवर्षेभ्योऽर्वाक्मृतेसतिकुरुध्वमेवेतरस्मिन्इतरःशतवर्षप्रभृतिः तस्मिन्मृतेकुरुध्वंइत्येवतावदेवप्र
तिब्रूयात्नसाचैवंपुनरितिसर्वेज्ञातयोयोभ्यवयंत्यासप्तमात्पुरुषाद्दशमाद्वाज्ञातयः सपिंडाःसमानोदकाश्चसर्वएवअपो
भ्यवयंतिस्नानार्थंनद्यादेर्जलंप्रविशंतिकियावत्आसप्तमात्पुरुषात्सप्तमंपुरुषमभिव्याप्ययावंतःसपिंडाःदशमाद्वापुरु
षात्आदशमंपुरुषमभिव्याप्ययावंतःसमानोदकाश्चतावंतइत्यर्थः समानग्रामवासेयावत्संबंधमनुस्मरेयुः समानेएकस्मि
न्ग्रामेवासःसमानग्रामवासः अवस्थानंग्रामावासइतितस्मिन्सतियावत्यदवधिसंबंधंसापिंड्यंसमानोदकत्वंसगोत्रत्वं
वाअनुस्मरेयुः अस्मिन्पुरुषेवयंसंबध्यामहेइतिजानीयुः तावंतः अयोभ्यवयंतिएकवस्त्राःप्राचीनावीतिनःसव्यस्या
नामिकयापनोद्यापनः ऽशोशुचदघमितिदक्षिणामुखानिमज्जंतिकथमित्याहएकंपरिधानीयमेवंवस्त्रंयेषांतेएकव
स्त्राःप्राचीनावीतिनःकृतापसव्याः प्राचीनावीतंविद्यतेयेषांतेप्राचीनावीतिनःसव्यस्यवामस्यपाणेःअनामिकयाउपकनिष्ठिकया

196

उदकमपनोद्यअपनःशोशुचदघमित्येतावतामंत्रेणापसार्यदक्षिणामुखाःनिमज्जंतियुगपत्सकृत्स्नातिप्रेतायोदकंस
कृत्प्रसिंचंत्यंजलिनासाचेतत्तउदकमितिप्रेतायउदकांजलिंसकृत्प्रसिंचंतिशुद्धायांभूमौप्रक्षिपंतिकथंअसौप्रेतएतत्तेउदकंइ
त्यनेनमंत्रप्रयोगेणउत्तीर्णान्शुचौदेशेशाड्वलवत्सुपविष्टांस्तत्रैवतानपवदेयुःउत्तीर्णान्जलाद्बहिर्निर्गतान्शुचौदेशेमूत्रपुरी
षभस्मतुषांगारास्थ्याद्यशुचिद्रव्यरहितेदेशेभूभागेपुनःकीदृशेशाड्वलवतिहरितत्तृणानियस्मिन्सन्तीतिशाड्वलवान्तस्मिन्
शाड्वलवतिउपविष्टान्आसीनान्अमेलोकयात्रिकाःसुहृदःएतान्प्रेतपुत्रादीन्अपवदेयुःप्रेतस्यगुणानुकथनेन
इतिहासपुराणादिविचित्रकथाभिःसंसारासारतास्थापनेनतान्शोकरहितान्कुर्युःअनपेक्षमाणाग्राममायांतिरी
तिभूताःकनिष्ठपूर्वाःअनपेक्षमाणाःपश्चादनवलोकयंतःरीतीभूताःश्रेणीभूताःपंक्तीभूताःकनिष्ठपूर्वाःकनिष्ठोल
घीयान्पूर्वःअग्रिमोयेषांतेकनिष्ठपूर्वाःस्वस्वकनिष्ठानुसारेणइत्यर्थःग्रामंआयांतिआगच्छंतिनिवेशनद्वारेपिचुमंद
पत्राणिविदश्याचम्योदकमग्निंगोमयंगौरसर्षपांस्तैलमालभ्याश्मानमाक्रम्यप्रविशंतिनिवेशनस्यगृहपतिविहित
गृहस्यद्वारेपिचुमंदस्यनिंबस्यपत्राणिछेदनानिविदश्यदंतैःखंडखंडाआचम्यस्मार्त्तमाचमनंविधायउदकंजलंअग्निंहारि
ध्रंतथागोमयमार्द्रंसर्षपान्गौरान्तैलतिलसंभवंएतानिप्रत्येकमालभ्यस्पृष्ट्वाअश्मानंप्रस्तरमाक्रम्यपादेनालभ्यप्रवि

197

शंति गृहं त्रिरात्रं ब्रह्मचारिणोऽधःशायिनो न किंचन कर्म कुर्युर्न प्रकुर्वीरन् त्रीण्यहोरात्राणि यावद्ब्रह्मचारिणः अकृतस्त्रीप्रसंगाः
अधःस्वट्वाव्यतिरेकेण शेरत इत्येवंशीलाः अधःशायिनः किंचनाकिमपि कर्म गृहत्यापणादि लौकिकं न कुर्युः न प्रकुर्वीरन् अन्येनैकार
येयुः अंतर्भूतो णिच् ज्ञेयः क्रीत्वा लब्ध्वा वा दिवान्नमश्नीयुरमांसं प्रेताय पिंडं दत्वाऽवनेजनदानप्रत्यवनेजनेषु नामग्राहं क्रीत्वा मूल्येन गृ
हीत्वा लब्ध्वा वा अन्यतः प्राप्य दिवा दिवसे न रात्रौ अश्नीयुः भुंजीरन् अमांसं मांसवर्जं किं कृत्वा प्रेताय पिंडं अवयवपूरकं दत्वा कथं ना
मग्राहं प्रेतस्य नाम गृहीत्वा केषु अवनेजनदानप्रत्यवनेजनेषु अवनेजनं पूर्वदानं च प्रत्यवनेजनं च अवनेजनदानप्रत्यवनेजनानि तेषु
त्रिरात्रमयं धर्मः मृन्मये ताꣳ रात्रिं क्षीरोदके विहायसि निदध्युः प्रेतात्र स्नाहीति मृन्मये शरावादौ पात्रे कृत्वा तां यस्मिन्दिने प्रेतोभू
त्तं संबंधिनं रात्रिं क्षीरं च उदकं च क्षीरोदके दुग्धपानीये पात्रे कवचन सामर्थ्यादेकीकृते विहायसि आकाशे निदध्युः स्थापयेयुः प्रे
तात्र स्नाहीत्यनेन मंत्रेण विज्ञानेश्वराचार्यस्तु द्रव्यद्वयनिधानसामर्थ्याद्द्वयोः पात्रयोः भेदेन निधानं मन्यते मंत्रे चाहतिप्रेतात्र
स्नाहि पिबस्वेदमिति त्रिरात्रं शावमाशौचं दशरात्रमेके एवं प्रेतस्य पुत्रादीनां मरणादिनकृत्यमभिधायाशौचकालनिर्णयार्थं
माह त्रिरात्रं त्रीण्यहोरात्राणि कालाध्वनोरत्यंतसंयोग इत्युपपदविभक्तिर्द्वितीया तेन संततं आशौचं अशुचित्वं एके आचार्याः म
न्वादयः उपनयनप्रभृति दशाहं मन्यंते दशाहं दशाहोरात्राणि अत्र प्रकरणे अहःशब्दो रात्रिशब्दश्च अहोरात्रोपलक्षकः एके त्रि